Each directory should have a file called README bib.txt. with bibliographic entry with following details:-

i.	Discipline	:	Sahitya
ii.	Name of the text	:	Vakrokti Jivitam
iii.	Author	:	Rajanaka Kuntak

File named “README_type_log.txt” containing the following details:-

i.	Name of the institute	:	Jaipur Campus
ii.	(a) Principal Investigator	:	Prof. Radhavallabh Tripathi
	(b) Investigator	:	Prof. R. Devnathan
	(c) Co-investigator	:	Dr. Shukla Mukherjee
	(d) Editor	:	Dr. Ramakant Pandey
iii.	Completion date of data entry	:	10.12.2010
iv.	Name of the proof reader	:	Dr. Ramakant Pandey
v.	Completion date of proof reading	:	25.01.2010
vi.	Name of the approval authority	:	Prof. Arkanath Chaudhari, Principal, Rashtriya Sanskrit Sansthan, Jaipur Campus.

Date of approval 22.03.2010

राजानककुन्तकविरचितम्

वक्रोक्तिजीवितम्

विषयानुक्रमणिका

प्रथमोन्मेषः

वृत्तिगतं मङ्गलाचरणम् –

कारिकागतं मङ्गलाचरणम् –

ग्रन्थाभिधानं प्रयोजनञ्च –

काव्यप्रयोजनानि –

काव्यतत्त्वनिरुपणम् –

काव्यसामान्यलक्षणम् –

काव्यविशेषलक्षणम् –

काव्ये शब्दार्थयोः स्वरुपम् –

वक्रोक्तेः अलङ्कारत्वसाधनम् –

स्वभावोक्तेः अलङ्कारत्वखण्डनम् –

शब्दार्थयोः साहित्यम् –

कविव्यापारवक्रतातद्भेदाश्च –

वर्णविन्यासवक्रता –

पदपूर्वार्धवक्रतातद्भेदाश्च –

प्रत्ययाश्रितवक्रतातद्भेदाश्च –

वाक्यवक्रता –

प्रकरणवक्रता –

प्रबन्धवक्रता –

काव्यबन्धस्य स्वरूपम् –

तद्विदाह्लादिकारित्वनिरूपणम् –

काव्यमार्गाः –

रीतिनां देशविशेषाश्रयत्वखण्डनम् –

कविस्वभावात् मार्गभेदनिरूपणम् –

सुकुमारमार्गस्य स्वरूपम् –

सुकुमारमार्गस्य गुणाः –

विचित्रमार्गस्य स्वरूपम् –

विचित्रमार्गस्य गुणाः –

मध्यममार्गस्य स्वरूपम् –

मध्यममार्गस्य गुणाः –

मार्गाणां सामान्यगुणाः –

द्वितीयोन्मेषः

वर्णविन्यासवक्रतायाः त्रैविध्यम् –

पदपूर्वार्धवक्रता –

पदपरार्द्धवक्रता –

उपसर्गनिपातजनितपदवक्रता –

तृतीयोन्मेषः

वस्तुवक्रता –

स्वाभावोक्तेः अलङ्कारत्वखण्डनम् –

वर्णनीयवस्तुनः द्वैविध्यम् –

चेतनपदार्थानां द्वैविध्यकथनम् –

पूर्वाचार्याभिमतरसवदलङ्कारस्य निराकरणम् –

प्रेयोऽलङ्कारादीनाम् अलङ्कारत्वखण्डनम् –

कुन्तकाभिमतः रसवदलङ्कारः –

दीपकालङ्कारः –

रूपकालङ्कारः –

अप्रस्तुतप्रशंसालङ्कारः –

पर्यायोक्तालङ्कारः –

व्याजस्तुतिः –

उत्प्रेक्षालङ्कारः –

अतिशयोक्तिः –

उपमालङ्कारः –

प्रतिवस्तूपमायाः उपमायामन्तर्भावकथनम् –

उपमेयोपमायाः उपमायामन्तर्भावकथनम् –

तुल्ययोगितायाः उपमायामन्तर्भावकथनम् –

अनन्वयस्य उपमायामन्तर्भावकथनम् –

निदर्शनायाः उपमायामन्तर्भावकथनम् –

श्लेषालङ्कारः –

व्यतिरेकालङ्कारः –

समासोक्तेः अलङ्कारत्वखण्डनम् –

सहोक्तेः उपमायामन्तर्भावकथनम् –

कुन्तकाभिमतसहोक्तिः –

दृष्टान्तः –

अर्थान्तरन्यासः –

आक्षेपः –

विभावना –

सन्देहः –

अपह्नुतिः –

संसृष्टिः –

सङ्करः –

यथासख्यस्य अलङ्कारत्वखण्डनम् –

हेत्वादीनामलङ्कारत्वखण्डनम् –

उपमारूपकयोः अलङ्कारत्वनिराकरणम् –

चतुर्थोन्मेषः

प्रकरणवक्रतानिरूपणम् –

प्रबन्धवक्रतानिरूपणम् -

श्रीकुन्तकविरचितं वक्रोक्तिजीवितम्

प्रथमोन्मेषः

जगत्त्रितयवैचित्र्यचित्रकर्मविधायिनम्।
शिवं शक्तिपरिस्पन्दमात्रोपकरणं नुमः॥१॥

यथातत्त्वं विवेच्यन्ते भावास्त्रैलोक्यवर्तिनः।
यदि तन्नाद्भुतं नाम दैवरक्ता हि किंशुकाः॥२॥

स्वमनीषिकयैवाऽथ तत्त्वं तेषां यथारुचि।
स्थाप्यते प्रौढिमात्रं तत्परमार्थो न तादृशः॥३॥

इत्यसत्तर्कसन्दर्भे स्वतन्त्रेऽप्यकृतादरः।
साहित्यार्थसुधासिन्धोः सारमुन्मीलयाम्यहम्॥४॥

येन द्वितयमप्येतत्तत्त्वनिर्मितिलक्षणम्।
तद्विदामद्भुतामोदचमत्कारं विधास्यति॥५॥

वन्दे कवीन्द्रवक्त्रेन्दुलास्यमन्दिरनर्तकीम्।
देवीं सूक्तिपरिस्पन्दसुन्दराभिनयोज्ज्वलाम्॥१॥

देवीं वन्दे, देवतां स्तौमि। कामित्याह- कवीन्द्रवक्त्रेन्दुलास्यमन्दिरनर्तकीम्। कवीन्द्राः कविप्रवरास्तेषां वक्त्रेन्दुर्मुखचन्द्रः स एव लास्यमन्दिरं नाट्यवेश्म, तत्र नर्तकीं लासिकाम्। किंविशिष्टाम्; सूक्तिपरिस्पन्दसुन्दराभिनयोज्ज्वलाम्। सूक्तिपरिस्पन्दाः सुभाषितविलसितानि तान्येव सुन्दरा अभिनयाः सुकुमाराः सात्त्विकादयस्तैरुज्ज्वलां भ्राजमानाम्। या किल सत्कविवक्त्रे लास्यवेश्मनीव नर्तकी सविलासाभिनयविशिष्टा नृत्यन्ती विराजते तां वन्दे नौमीति वाक्यार्थः। तदिदमत्र तात्पर्यम्- यत्किल प्रस्तुतं वस्तु किमपि

काव्यालङ्कारकरणं तदधिदैवतभूतामेवंविधरामणीयकहृदयहारिणीं वाग्रूपां सरस्वतीं स्तौमीति।

एवं नमस्कृत्येदानीं वक्तव्यस्तुविषयभूतान्यभिधानाभिधेयप्रयोजनान्यासूत्रयति-

वाचो विषयनैयत्यमुत्पादयितुमुच्यते।
आदिवाक्येऽभिधानादि निर्मितेर्मानसूत्रवत्॥६॥

इत्यन्तरश्लोकः

लोकोत्तरचमत्कारकारिवैचित्र्यसिद्धये।
काव्यस्यायमलङ्कारः कोऽप्यपूर्वो विधीयते॥२॥

अलङ्कारो विधीयते अलङ्करणं क्रियते। कस्य- काव्यस्य। कवेः कर्म काव्यं तस्य। ननु च सन्ति चिरन्तनास्तदलङ्कारास्तत्किमर्थमित्याह- अपूर्वः, तद्व्यतिरिक्तार्थाभिधायी। तदपूर्वत्वं तदुत्कृष्टस्य तन्निकृष्टस्य च द्वयोरपि सम्भवतीत्याह- कोऽपि, अलौकिकः सातिशयः। सोऽपि किमर्थमित्याह- लोकोत्तरचमत्कारकारिवैचित्र्यसिद्धये असामान्याह्लादविधायिविचित्रभावसम्पत्तये। यद्यपि सन्ति शतशः काव्यालङ्कारास्तथापि न कुतश्चिदप्येवंविधवैचित्र्यसिद्धिः।

अलङ्कारशब्दः शरीरस्य शोभातिशयकारित्वान्मुख्यतया कटकादिषु वर्तते, तत्कारित्वसामान्यादुपचारादुपमादिषु, तद्वदेव च तत्सदृशेषु गुणादिषु, तथैव च तदभिधायिनि ग्रन्थे शब्दार्थयोरेकयोगक्षेमत्वादैक्येन व्यवहारः, यथा गौरिति शब्दः गौरित्यर्थ इति। तदयमर्थः- ग्रन्थस्यास्यालङ्कार इत्यभिधानम्, उपमादिप्रमेयजातमभिधेयम्, उक्तरूपवैचित्र्यसिद्धिः प्रयोजनमिति॥२॥

एवमलङ्कारस्यास्य प्रयोजनमस्तीति स्थापितेऽपि तदलङ्कार्यस्य काव्यस्य प्रयोजनं विना यदपि सदपार्थकमित्याह—

धर्मादिसाधनोपायः सुकुमारक्रमोदितः।

काव्यबन्धोऽभिजातानां हृदयाह्लादकारकः॥३॥

हृदयाह्लादकारकश्चित्तानन्दजनकः काव्यबन्धः सर्गबन्धादिर्भवतीति सम्बन्धः। कस्येत्याकाङ्क्षायामाह- अभिजातानाम्। अभिजाताः खलु राजपुत्रादयो धर्माद्युपेयार्थिनो विजिगीषवः क्लेशभीरवश्च, सुकुमाराशयत्वात्तेषाम् तथा सत्यपि तदाह्लादकत्वे काव्यबन्धस्य क्रीडनकादिप्रख्यता प्राप्नोतीत्याह- धर्मादिसाधनोपायः। धर्मादेरुपेयभूतस्य चतुर्वर्गस्य साधने सम्पादने तदुपदेशरूपत्वादुपायस्तत्प्राप्तिनिमित्तम्।

तथापि तथाविधपुरुषार्थोपदेशपरैरपरैरपि शास्त्रैः किमपराद्धमित्यभिधीयते- सुकुमारक्रमोदितः। सुकुमारः सुन्दरः सहृदयहृदयहारी क्रमः परिपाटीविन्यासस्तेनोदितः कथितः सन्। अभिजातानामाह्लादकत्वे सति प्रवर्तकत्वात्काव्यबन्धो धर्मादिप्राप्त्युपायतां प्रतिपद्यते। शास्त्रेषु पुनः कठोरक्रमाभिहितत्वाद् धर्माद्युपदेशो दुरवगाहः। तथाविधे विषये विद्यमानोऽप्यकिञ्चित्कर एव।

राजपुत्राः खलु समासादितविभवाः समस्तजगतीव्यवस्थाकारितां प्रतिपद्यमानाः श्लाघ्योपायोपदेशशून्यतया स्वतन्त्राः सन्तः समुचितसकलव्यवहारोच्छेदं प्रवर्तयितुं प्रभवन्तीत्येतदर्थमेतद्व्युत्पत्तये व्यतीतसच्चरितराजचरितं तन्निदर्शनाय निबध्नन्ति कवयः। तदेवं शास्त्रातिरिक्तं प्रगुणमस्त्येव प्रयोजनं काव्यबन्धस्य॥३॥

मुढ्यं पुरुषार्थसिद्धिलक्षणं प्रयोजनमास्तां तावत्. अन्यदपि लोकयात्राप्रवर्तननिमित्तं भृत्यसुहृत्स्वाम्यादिसमावर्जनमनेन विना सम्यङ् न सम्भवतीत्याह-

व्यवहारपरिस्पन्दसौन्दर्यं व्यवहारिभिः।

सत्काव्याधिगमादेव नूतनौचित्यमाप्यते॥४॥

व्यवहारो लोकवृत्तं तस्य परिस्पन्दो व्यापारः क्रियाक्रमलक्षणस्तस्य सौन्दर्यं रामणीयकं तद्व्यवहारिभिर्व्यवहर्तृभिः सत्काव्याधिगमादेव कमनीयकाव्यपरिज्ञानादेव नान्यस्माद् आप्यते लभ्यत इत्यर्थः। कीदृशं तत्सौन्दर्यम्- नूतनौचित्यम् नूतनमभिनवमलौकिकमौचित्यमुचितभावो यस्य। तदिदमुक्तं भवति- महतां हि राजादीनां व्यवहारे वर्ण्यमाने तदङ्गभूताः सर्वे मुख्यामात्यप्रभृतयः। समुचितप्रातिस्विककर्तव्यव्यहारनिपुणतया निबध्यमानाः सकलव्यवहारिवृत्तोपदेशतामापद्यन्ते। ततः सर्वः क्वचित्कमनीयकाव्ये कृतश्रमः समासादितव्यवहारपरिस्पन्दसौन्दर्यातिशयः श्लाघनीयफलभाग् भवतीति।

योऽसौ चतुर्वर्गलक्षणः पुरुषार्थस्तदुपार्जनविषयव्युत्पत्तिकारणतया काव्यस्य पारम्पर्येण प्रयोजनमित्याम्नातः, सोऽपि समयान्तरभावितया तदुपभोगस्य तत्फलभूताह्लादकारित्वेन तत्कालमेव पर्यवस्यति। अतस्तदतिरिक्तं किमपि सहृदयहृदयसंवादसुभगं तदात्वरमणीयं प्रयोजनान्तरमभिधातुमाह-

चतुर्वर्गफलास्वादमप्यतिक्रम्य तद्विदाम्।

काव्यामृतरसेनान्तश्चमत्कारो वितन्यते॥५॥

चमत्कारो वितन्यते चमत्कृतिर्विस्तार्यते, ह्लादः पुनः पुनः क्रियत इत्यर्थः। केन- काव्यामृतरसेन। काव्यमेवामृतं तस्य रसस्तदास्वादस्तदनुभवस्तेन। क्वेत्यभिदधाति- अन्तश्चेतसि। कस्य तद्विदाम्। तं विदन्ति जानन्तीति तद्विदस्तज्ज्ञास्तेषाम्। कथम्— चतुर्वर्गफलास्वादमप्यतिक्रम्य। चतुर्वर्गस्य धर्मादेः फलं तदुपभोगस्तस्यास्वादस्तदनुभवस्तमपि प्रसिद्धातिशयमतिक्रम्य विजित्य पस्पशप्रायं साम्पाद्य।

तदयमभिप्रायः - योऽसौ चतुर्वर्गफलास्वादः प्रकृष्टपुरुषार्थतया सर्वशास्त्रप्रयोजनत्वेन प्रसिद्धः सोऽप्यस्य काव्यामृतचर्वणचमत्कारकलामात्रस्य न किमपि साम्यकलनां कर्तुमर्हतीति। दुःश्रवदुर्भणदुरधिगमत्वादिदोषदुष्टोऽध्ययनावसर एव दुःसहदुःखदायी शास्त्रसन्दर्भस्तत्कालकल्पितकमनीयचमत्कृतेः काव्यस्य न कथञ्चिदपि स्पर्धामधिरोहतीत्येतदप्यर्थतोऽभिहितं भवति।

कटुकौषधवच्छास्त्रमविद्याव्याधिनाशनम्।
आह्लाद्यमृतवत्काव्यमविवेकगदापहम्॥७॥
आयात्यां च तदात्वे च रसनिस्यन्दसुन्दरम्।
येन सम्पद्यते काव्यं तदिदानीं विचार्यते॥८॥

इत्यन्तरश्लोकौ॥५॥

अलङ्कृतिरलङ्कार्यमपोद्धृत्य विवेच्यते।
तदुपायतया तत्त्वं सालङ्कारस्य काव्यता॥६॥

अलङ्कृतिरलङ्करणम् अलंक्रियते ययेति विगृह्य। सा विवेच्यते विचार्यते। यच्चालङ्कार्यमकलङ्करणीयं वाचकरूपं वाच्यरूपं च तदपि विवेच्यते। तयोः सामान्यविशेषलक्षणद्वारेण स्वरूपनिरूपणं क्रियते। कथम्- अपोद्धृत्य। निष्कृष्य पृथक् पृथगवस्थाप्य. यत्र समुदायरूपे तयोरन्तभविस्तस्माद्विभज्य केन हेतुना-तदुपायतया। तदिति काव्यं परामृश्यते। तस्योपायस्तदुपास्तस्य भावस्तदुपायता तया हेतुभूतया। तस्मादेवंविधो विवेकः काव्यव्युत्पत्त्युपायतां प्रतिपद्यते। दृश्यते च समुदायान्तःपातिनामसत्यभूतानामपि व्युत्पत्तिनिमित्तमपोद्धृत्य विवेचनम्। यथापदान्तर्भूतयोः प्रकृतिप्रत्यययोर्वाक्यान्तर्भूतानां पदानां चेति। यद्येवमसत्यभूतोऽप्यपोद्धारस्तदुपायतया क्रियते तत् किं पुनः सत्यमित्याह - तत्त्वं सालङ्कारस्य काव्यता।

अयमत्र परमार्थः - सालङ्कारस्यालङ्करणसहितस्य सकलस्य निरस्तावयवस्य सतः समुदायस्य काव्यता कविकर्मत्वम्। तेनालङ्कृतस्य काव्यत्वमिति स्थितिः, न पुनः काव्यस्यालङ्कारयोग इति॥६॥

सालङ्कारस्य काव्यतेति संमुग्धतया किञ्चित् काव्यस्वरूपमासूत्रितम्, निपुणं पुनर्न निश्चितम्। किंलक्षणम् वस्तु काव्यपदेशभाग् भवतीत्याह-

शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।

बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि॥७॥

शब्दार्थो काव्यं वाचको वाच्यश्चेति द्वौ सम्मिलितौ काव्यम्। द्वावेकमिति विचित्रैवोक्तिः। तेन यत्केषांचिन्मतं कविकौशलकल्पितकमनीयतातिशयः शब्द एव केवलं काव्यमिति केषाञ्चिद् वाच्यमेव रचनावैचित्र्यचमत्कारकारिकाव्यमिति, पक्षद्वयमपि निरस्तं भवति। तस्माद् द्वयोरपि प्रतितिलमिव तैलं तद्विदाह्लादकारित्वं वर्तते, न पुनरेकस्मिन्। यथा—

भण तरुणि रमणमन्दिरमानन्दस्यन्दिसुन्दरेन्दुमुखि।

यदि सल्लीलोल्लापिनि गच्छसि तत् किं त्वदीयं मे॥९॥

अनणुरणन्मणिमेखलमवितरशिञ्जानमञ्जुमञ्जीरम्।

परिसरणमरुणचरणे रणरणकमकारणं कुरुते॥१०॥

प्रतिभादारिद्र्यदैन्यादतिस्वल्पसुभाषितेन कविना वर्णसावर्ण्यरम्यतामात्रमत्रोदितम्, न पुनर्वाच्यवैचित्र्यकणिका काचिदस्तीति।

यत्किल नूतनतारुण्यरङ्गितलावण्यपटहकान्तेः कान्तायाः कामयमानेन केनचिदेतदुच्यते- यदि त्वं तरुणि रमणमन्दिरं व्रजसि तत्किं त्वदीयं परिसरणं रणरणकमकारणं मम करोतीत्यतिग्राम्येयमुक्तिः। किञ्च न अकारणम्, यतस्तस्यादनादरेण

गमनेन तदनुरक्तान्तःकरणस्य विरहविधुरताशङ्काकातरता कारणं रणरणकस्य। यदि वा परिसरणस्य मया किमपराद्धमित्यकारणतासमर्पकम्, एतदप्यति-ग्राम्यतरम्। सम्बोधनानि च बहूनि मुनिप्रणीतस्तोत्रामन्त्रणकल्पानि न काञ्चिदपि तद्विदामाह्लादकारितां पुष्णन्तीति यत्किंचिदेतत्।

वस्तुमात्रं च शोभातिशयशून्यं न काव्यव्यपदेशमर्हति। यथा-

प्रकाशस्वाभाव्यं विदधति न भावास्तमसि यत्
तथा नैते ते स्युर्यदि किल तथा तत्र न कथम्।
गुणाभ्यासाभ्यासव्यसनदृढदीक्षागुरुगुणो
रविव्यापारोऽयं किमथ सदृशं तस्य महसः॥११॥

अत्र हि शुष्कतर्कवाक्यवासनाधिवासितचेतसा प्रतिभाप्रतिभातमात्रमेव वस्तु व्यसनितया कविना केवलमुपनिबद्धम्। न पुनर्वाचकवक्रताविच्छित्तिलवोऽपि लक्ष्यते। यस्मात्तर्कवाक्यशय्यैव शरीरमस्य श्लोकस्य। तथा च - तमोव्यतिरिक्ताः पदार्था धर्मिणः, प्रकाशस्वभावा न भवन्तीति साध्यम् तमस्यतथाभूतत्वादिति हेतुः। दृष्टान्तस्तर्हि कथं न दर्शितः, तर्कन्यायस्यैव चेतसि प्रतिभासमानत्वात्। तथोच्यते—

तद्भावहेतुभावौ हि दृष्टान्ते तदवेदिनः।
स्थाप्येते विदुषां वाच्यो हेतुरेव हि केवलः॥१२॥

विदधतीति विपूर्वो दधातिः करोत्यर्थे वर्तते। स च करोत्यर्थोऽत्र न सुस्पष्टसमन्वयः, प्रकाशस्वाभाव्यं न कुर्वन्तीति। प्रकाशस्वाभाव्यशब्दोऽपि चिन्त्य एव। प्रकाशः स्वभावो यस्यासौ प्रकाशस्वभावः, तस्य भाव इति भावप्रत्यये विहिते पूर्वपदस्य वृद्धिः प्राप्नोति। अथ स्वभावस्य भावः स्वाभाव्यमित्यत्रापि भावप्रत्ययान्ताद्भावप्रत्ययो न प्रचुरप्रयोगार्हः। तथा च प्रकाशश्चासौ स्वाभाव्यं चेति विशेषणसमासोऽपि न समीचीनः।

तृतीये, च पादेऽन्त्यन्तासमर्पकसमासभूयस्त्ववैशसं न तद्विदाह्लादकारितामावहति। रविव्यापार इति रविशब्दस्य प्राधान्येनाभिमतस्य समासे गुणीभावो न विकल्पितः, पाठान्तरस्य 'रवेः' इति सम्भवात्।

ननु वस्तुमात्रस्याप्यलङ्कारशून्यतया कथं तद्विदाह्लादकारित्वमिति चेत्तन्न; यस्मादलङ्कारेणाप्रस्तुतप्रशंसालक्षणेनान्यापदेशतया स्फुरितमेव कविचेतसि। प्रथमं च प्रतिभाप्रतिभासमानमघटितपाषाणशकलकल्पमणिप्रख्यमेव वस्तु विदग्धकवि विरचितवक्रवाक्योपारूढं शाणोल्लीढमणिमनोहरतया तद्विदाह्लादकारिकाव्यत्वमधिरोहति। तथा चैकस्मिन्नेव वस्तुन्यवहितानवहितकत्रिद्वितयविरचितं वाक्यद्वयमिदं महदन्तरमावेदयति-

मानिनीजनविलोचनपातानुष्णबाष्पकलुषानभिगृह्णन्।
मन्दमन्दमुदितः प्रययौ खं भीतभीत इव शीतमयूखः॥१३॥

क्रमादेकद्वित्रि-प्रगतिपरिपाटीः प्रकटयन्
कलाः स्वैरं स्वैरं नवकमलकन्दाङ्कुररुचः।
पुरन्ध्रीणां प्रेयोविरहदहनोद्दीपितदृशां
कटाक्षेभ्यो बिभ्यन्निभृत इव चन्द्रोऽभ्युदयते॥१४॥

एतरयोरन्तरं सहृदयसंवेद्यमिति तैरेव विचारणीयम्। तस्मात् स्थितमेतत् – न शब्दस्यैव रमणीयताविशिष्टस्य केवलस्य काव्यत्वम्, नाप्यर्थस्येति। तदिमुक्तम्-

रूपकादिरलङ्कारस्तथान्यैर्बहुधोदितः।
न कान्तमपि निर्भूषं विभाति वनितानननम्॥१५॥

रूपकादिमलङ्कारं बाह्यमाचक्षते परे।
सुपां तिङां च व्युत्पत्तिं वाचां वाञ्छन्त्यलङ्कृतिम्॥१६॥

तदेतदाहु सौशब्द्यं नार्थव्युत्पत्तिरीदृशी।

शब्दाभिधेयालङ्कारभेदादिष्टं द्वयं तु नः॥१७॥

तेन शब्दार्थौ द्वौ सम्मिलितौ काव्यमिति स्थितम् एवमवस्थापिते द्वयोः काव्यत्वे कदाचिदेकस्य मनाङ्मात्रन्यूनतायां सत्यां काव्यव्यवहारः प्रवर्तेत्याह- सहिताविति। सहितौ सहितभावेन साहित्येनावस्थितौ।

ननु च वाच्यवाचकसम्बन्धस्य विद्यमानत्वादेतयोर्न कथञ्चिदपि साहित्यविरहः, सत्यमेतत्। किन्तु विशिष्टमेवेह साहित्यमभिप्रेतम्। कीदृशम्? वक्रताविचित्रगुणालङ्कारसम्पदां परस्परस्पर्धाधिरोहः। तेन-

समसर्वगुणौ सन्तौ सुहृदाविव सङ्गतौ।

परस्परस्य शोभायै शब्दार्थौ भवतो यथा॥१८॥

ततोऽरुणपरिस्पन्दमन्दीकृतवपुः शशी।

दध्रे कामपरिक्षामकामिनीगण्डपाण्डुताम्॥१९॥

अत्रारुणपरिस्पन्दनमन्दीकृतवपुषः शशिनः कामपरिक्षामवृत्तेः कामिनीकपोलफलकस्य च पाण्डुत्वसाम्यसमर्थनादर्थालङ्कारपरिपोषः शोभातिशयमावहति। वक्ष्यमाणवर्णविन्यासवक्रतालक्षणः शब्दालङ्कारोऽप्यतितरां रमणीयः। वर्णविन्यासविच्छित्तिविहिता लावण्यगुणसम्पदस्त्येव।

यथा च -

लीलाइ कुवलअं कुवलअं व सीसे समुव्वहंतेण।

सेसेण सेसपुरिसाणं पुरिसआरो समुप्पसिऔ॥२०॥

लीलया कुवलयं कुवलयमिव शीर्षे समुद्वहता।

शेषेण शेषपुरुषाणां पुरुषकरं समुपहसितः॥

अत्राप्रस्तुतप्रशंसोपमालक्षणवाच्यालङ्कारवैचित्र्यविहिता हेलामात्रविरचितयमकानुप्रासहारिणी समर्पकत्वसुभगा कापि काव्यच्छाया सहृदयहृदयमाह्लादयति।

द्विवचनेनात्र वाच्यवाचकजातिद्वित्वमभिधीयते। व्यक्तिद्वित्वाभिधाने पुनरेकपदव्यवस्थितयोरपि काव्यत्वं स्यादित्याह- बन्धे व्यवस्थितौ। बन्धो वाक्यविन्यासः तत्र व्यवस्थितो विशेषेण लावण्यादिगुणालङ्कारशोभिना सन्निवेशेनः कृतावस्थानौ। सहिताविव्यत्रापि यथायुक्ति स्वजातीयापेक्षया शब्दस्य शब्दान्तरेण वाच्यस्य वाच्यान्तरेण च साहित्यं परस्परस्पर्धित्वलक्षणमेव विवक्षितम्। अन्यथा तद्विदाह्लादकारित्वहानिः प्रसज्यते।

यथा - असारं संसारं परिमुषितरत्नं त्रिभुवनं

निरालोकं लोकं मरणशरणं बान्धवजनम्।

अदर्पं कन्दर्पं जननयननिर्माणमफलं

जगज्जीर्णाज्ण्यं कथमसि विधातुं व्यवसितः॥२१॥

अत्र किल कुत्रचित्प्रबन्धे कश्चित्कापालिकः कामपि कान्तां व्यापादयितुमध्यवसितो भवन्नेवमभिधीयते- यदपगतसारः संसारः, हृतरत्नसर्वस्वं त्रैलोक्यम्, आलोककमनीयवस्तुवर्जितो जीवलोकः, सकललोकलोचननिर्माणं निष्फलप्रायम्, त्रिभुवनविजयित्वदर्पहीनः कन्दर्पः, जगज्जीर्णारण्यकल्पमनया विना भवतीति किं त्वमेवंविधमकरणीयं कर्तुं व्यवसित इति।

एतस्मिन् श्लोके महावाक्यकल्पे वाक्यान्तराण्यवान्तरवाक्यसदृशानि तस्याः सकललोकलोभनीयलावण्यसम्पत्प्रतिपादनपराणि परस्परस्पर्धीन्यतिरमणीयान्युपनिबद्धानि कमपि काव्यच्छायातिशयं पुष्णन्ति। मरणशरणं बान्धवजनमिति पुनरेतेषां न कलामात्रमपि स्पर्धितुमर्हतीति न तद्विदाह्लादकारि। बहुषु च रमणीयेष्वेकवाक्योपयोगिषु युगपत्

प्रतिभासपदवीमवतरत्सु वाक्यार्थपरिपूरणार्थं तत्प्रतिमं प्राप्तुमपरं प्रयत्नेन प्रतिभा प्रसाद्यते। तथा चास्मिन्नेव प्रस्तुतवस्तुसब्रह्मचारिवस्त्वन्तरमपि सुप्रापमेव-

''विधिमपि विपन्नाद्भुतविधिम्'' इति।

प्रथमप्रतिभातपदार्थप्रतिनिधिपदार्थान्तरासम्भवे सुकुमारतरापूर्वसमर्पणेन कामपि काव्यच्छायामुन्मीलयन्ति कवयः। यथा—

रुद्राद्रेस्तुलनं स्वकण्ठविपिनोच्छेदो हरेर्वासनं

कारावेश्मनि पुष्पकापहरणम्॥२२॥

इत्युपनिबद्ध्य पूर्वोपनिबद्ध्यपदार्थानुरूपवस्त्वन्तरासम्भवादपूर्वमेव ''यस्येदृशाः केलयः'' इति न्यस्तम्, येनान्येऽपि कामपि कमनीयतामनीयन्त। यथा च—

तद्वक्त्रेन्दुविलोकनेन दिवसो नीतः प्रदोषस्तथा

तद्गोष्ठ्यैव निशापि मन्मन्थकृतोत्साहैस्तदङ्गार्पणैः।

तां सम्प्रत्यपि मार्गदत्तनयनां द्रष्टुं प्रवृत्तस्य मे

बद्धोत्कण्ठमिदं मनः किम्॥२३॥

इति सम्प्रत्यपि तामेवंविधां वीक्षितुं प्रवृत्तस्य मम मनः किमिति बद्धोत्कण्ठमिति परिसमाप्तेऽपि तथाविधवस्तुविन्यासो विहितः - ''अथवा प्रेमासमाप्तोत्सवम्'' इति, येन पूर्वेषां जीवितमिवार्पितम्।

यद्यपि द्वयोरप्येतयोस्तत्प्राधान्येनैव वाक्योपनिबन्धः, तथापि कविप्रतिभाप्रौढिरेव प्राधान्येनावतिष्ठते। शब्दस्यापि शब्दान्तरेण साहित्यविरहोदाहरणं यथा-

चारुता वपुरभूषयदासां तामनूननवयौवनयोगः।

तं पुनर्मकरकेतनलक्ष्मीस्तां मदो दयितसङ्गमभूषः॥२४॥

दयितसङ्गमस्तामभूषयदिति वक्तव्ये कीदृशो मदः, दयितसङ्गमो भूषा यस्येति। दयितसङ्गमशब्दस्य प्राधान्येनाभिमतस्य समासवृत्तावन्तर्भूतत्वाद् गुणीभावो न तद्विदाह्लादकारी। दीपकालङ्कारस्य च काव्यशोभाकारित्वेनोपनिबद्धस्य निर्वहणावसरे त्रुटितप्रायत्वात् प्रक्रमभङ्गविहितं सरसहृदयवैरस्यमनिवार्यम्। 'दयितसङ्गतिरेनम्' इति पाठान्तरं सुलभमेव।

द्वयोरप्येतयोरुदाहरणयोः प्राधान्येन प्रत्येकमेकतरस्य साहित्यविरहो व्याख्यातः। परमार्थतः पुनरुभयोरप्येकतरस्य साहित्यविरहोऽन्यतरस्यापि पर्यवस्यति। तथा चार्थः समर्थवाचकासद्भावे स्वात्मना स्फुरन्नपि मृतकल्प एवावतिष्ठते। शब्दोऽपि वाक्योपयोगिवाच्यासम्भवे वाच्यान्तरवाचकः सन् वाक्यस्य व्याधिभूतः प्रतिभातीत्यलमतिप्रसङ्गेन।

प्रकृतं तु। कीदृशे बन्धे- वक्रकविव्यापारशालिनि। वक्रो योऽसौ शास्त्रादिप्रसिद्धशब्दार्थोपनिबन्धव्यतिरेकी षट्प्रकारवक्रताविशिष्टः कविव्यापारस्तत्क्रिया-क्रमस्तेन शालते श्लाघते यस्तस्मिन्। एवमपि कष्टकल्पनोपहतेऽपि प्रसिद्धव्यतिरेकित्वमस्तीत्याह- तद्विदाह्लादकारिणि। तदिति काव्यपरामर्शः तद्विदन्तीति तद्विदस्तज्ज्ञास्तेषामाह्लादमानन्दं करोति यस्तस्मिन् तद्विदाह्लादकारिणि बन्धे व्यवस्थितौ। वक्रतां वक्रताप्रकारां स्तद्विदाह्लादकारित्वं च प्रत्येकं यथावसरमेवोदाहरिष्यन्ते।

एवं काव्यस्य सामान्यलक्षणे विहिते विशेषलक्षणमुपक्रमते। तत्र शब्दार्थयोस्तावत्स्वरूपं निरूपयति—

वाच्योऽर्थो वाचकः शब्दः प्रसिद्धमिति यद्यपि।

तथापि काव्यमार्गेऽस्मिन् परमार्थोऽयमेतयोः॥८॥

इति एवंविधं वस्तु प्रसिद्धं प्रतीतम्- यो वाचकः स शब्दः, यो वाच्यश्चाभिधेयः सोऽर्थ इति। ननु च द्योतकव्यञ्जकावपि शब्दौ सम्भवतः, तदसंग्रहान्नाव्याप्तिः, यस्मादर्थप्रतीतिकारित्वसामान्यादुपचारात्तावपि वाचकावेव। एवं द्योत्यव्यङ्ग्ययोरर्थयोः प्रत्येयत्वसामान्यादुपचाराद्वाच्यत्वमेव। तस्माद् वाचकत्वं वाच्यत्वं च शब्दार्थयोर्लोके सुप्रसिद्धं यद्यपि लक्षणम्, तथाप्यस्मिन् अलौकिके काव्यमार्गे कविकर्मवर्त्मनि अयमेतयोर्वक्ष्यमाणलक्षणः परमार्थः किमप्यपूर्वं तत्त्वमित्यर्थः। कीदृशमित्याह-

शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि।

अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः॥९॥

स शब्दः काव्ये यस्तत्समुचितसमस्तसामग्रीकः। कीदृक्- विवक्षितार्थैकवाचकः। विवक्षितो योऽसौ वक्तुमिष्टोऽर्थस्तदेकवाचकस्तस्यैकः केवल एव वाचकः। कथम् - अन्येषु सत्स्वपि। अपरेषु तद्वाचकेषु बहुष्वपि विद्यमानेषु। यथा च—

सामान्यात्मना वक्तुमभिप्रेतो योऽर्थस्तस्य विरोधाभिधायी शब्दः सम्यग् वाचकतां न प्रतिपद्यते। यथा —

कल्लोलवेल्लितदृषत्पुरुषप्रहारै-

रत्नान्यमूनि मकराकर माऽवसंस्थाः।

किं कौस्तुभेन भवतो विहितो न नाम

याच्ञाप्रसारितकरः पुरुषोत्तमोऽपि॥२५॥

अत्र रत्नसामान्योत्कर्षाभिधानमुपक्रान्तम्। कौस्तुभेनेति रत्नविशेषाभिधायी शब्दस्तद्विशेषोत्कर्षाभिधानमुपसंहरतीति प्रक्रमोपसंहारवैषम्यं न शोभातिशयमावहति। न चैतद्वक्तुं शक्यते- यः कश्चिद्विशेषे गुणग्रामगरिमा विद्यते स सर्वसामान्येऽपि सम्भवत्येवेति। यस्मात्-

वाजिवारणलोहानां काष्ठपाषाणवाससाम्।

नारीपुरुषतोयानामन्तरं महदन्तरम्॥२६॥

तस्मादेवंविधे विषये सामान्याभिधाय्येव शब्दः सहृदयहृदयहारितां प्रतिपद्यते। तथा चास्मिन् प्रकृते पाठान्तरं सुलभमेव - ''एकेन किं न विहितं भवतः स नाम'' इति।

यत्र विशेषात्मना वस्तु प्रतिपादयितुमभिमतं तत्र विशेषाभिधायकमेवाभिधानं निबध्नन्ति कवयः। यथा—

द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः।

कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी॥२७॥

अत्र परमेश्वरवाचकशब्दसहस्रसम्भवेऽपि कपालिन इति बीभत्सरसालम्बनविभाववाचकः शब्दो जुगुप्सास्पदत्वेन प्रयुज्यमानः कामपि वाचकवक्रतां विदधाति। 'सम्प्रति' 'द्वयं' चेत्यतीव रमणीयम्- यत् किल पूर्वमेका सैव दुर्व्यसनदूषितत्वेन शोचनीया सञ्जाता, सम्प्रति पुनस्त्वया तस्यास्तथाविधदुरध्यवसायसाहायकमिवारब्धमित्युपहस्यते। 'प्रार्थना' शब्दोऽप्यतितरां रमणीयः, यस्मात् काकतालीययोगेन तत्समागमः कदाचिन्न वाच्यतावहः। प्रार्थना पुनरत्रात्यन्तं कौलीनकलङ्ककारिणी।

'सा च' 'त्वं च' इति द्वयोरप्यनुभूयमानपरस्परस्पर्धिलावण्यातिशयप्रतिपादनपरत्वेनोपात्तम्। 'कलावतः' 'कान्तिमती' इति च मत्वर्थीयप्रत्ययेन द्वयोरपि प्रशंसा प्रतीयत इत्येतेषां प्रत्येकं कश्चिदप्यर्थः शब्दान्तराभिधेयतां नोत्सहते। कविविवक्षितविशेषाभिधानक्षमत्वमेव वाचकत्वलक्षणम्। यस्मात्प्रतिभायां तत्कालोल्लिखितेन केनचित्परिस्पन्देन परिस्फुरन्तः पदार्थाः प्रकृतप्रस्तावसमुचितेन केनचिदुत्कर्षेण वा समाच्छादितस्वभावाः सन्तो विवक्षाविधेयत्वेनाभिधेयता-

पदवीमवतरन्तस्तथाविधविशेषप्रतिपादनसमर्थेनाभिधानेनाभिधीयमानाश्चेतनचमत्कारिता-मापद्यन्ते। यथा—

संरम्भः करिकीटमेघशकलोद्देशेन सिंहस्य यः

सर्वस्यैव स जातिमात्रविहितो हेवाकलेशः किल।

इत्याशाद्विरदक्षयाम्बुदघटाबन्धेऽप्यसंरब्धवान्

योऽसौ कुत्र चमत्कृतेरतिशयं यात्वम्बिकाकेसरी॥२८॥

अत्र करिणां 'कीट'-व्यपदेशेन तिरस्कारः, तोयदानां च 'शकल'-शब्दाभिधानेनानादरः, 'सर्वस्य' इति यस्य कस्यचित्तुच्छतरप्रायस्येत्यवहेला, जातेश्च 'मात्र'-शब्दविशिष्टत्वेनावलेपः, हेवाकस्य 'लेश'-शब्दाभिधानेनाल्पताप्रतिपत्तिरित्येते विवक्षितार्थैकवाचकत्वं द्योतयन्ति। 'घटाबन्ध' शब्दस्य प्रस्तुतमहत्त्वप्रतिपादन-परत्वेनोपात्तस्तन्निबन्धनतां प्रतिपद्यते। विशेषाभिधानाकाङ्क्षिणः पुनः पदार्थस्वरूपस्य तत्प्रतिपादनपरविशेषणशून्यतया शोभाहानिरूत्पद्यते। यथा—

तत्रानुल्लिखिताख्यमेव निखिलं निर्माणमेतद्विधे-

रुत्कर्षप्रतियोगिकल्पनमपि न्यक्कारकोटिः परा।

याताः प्राणभृतां मनोरथगतीरुल्लङ्घ्य यत्सम्पद-

स्तस्याभासमणीकृताश्मसु मणेरश्मत्वमेवोचितम्॥२९॥

अत्र 'आभास' शब्दः स्वयमेव मात्रादिविशिष्टत्वमभिलषँल्लक्ष्यते। पाठान्तरम्-'छायामात्रमणीकृताश्मसु मणेस्तस्याश्मतैवोचिता' इति। एतच्च वाचकवक्रताप्रकारस्वरूपनिरूपणावसरे प्रतिपदं प्रकटीभविष्यतीत्यलमतिप्रसङ्गेन।

अर्थश्च वाच्यलक्षणः कीदृशः काव्ये यः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः। सहृदयाः काव्यार्थविदस्तेषामाह्लादमानन्दं करोति यस्तेन स्वस्पन्देनात्मीयेन स्वभावेन सुन्दरः

सुकुमारः। तदेतदुक्तं भवति- यद्यपि पदार्थस्य नानाविधधर्मखचितत्वं सम्भवति तथापि तथाविधेन धर्मेण सम्बन्धः समाख्यायते यः सहृदयहृदयाह्लादमाधातुं क्षमते। तस्य च तदाह्लादसामर्थ्यं सम्भाव्यते येन काचिदेव स्वभावमहत्ता रसपरिपोषाङ्गत्वं वा व्यक्तिमासादयति। यथा—

दंष्ट्रापिष्टेषु सद्यः शिखरिषु न कृतः स्कन्धकण्डूविनोदः
सिन्धुष्वङ्गावगाहः खुरकुहरगलत्तुच्छतोयेषु नाप्तः।
लब्धाः पातालपङ्के न लुठनरतयः पोत्रमात्रोपयुक्ते
येनोद्धारे धरित्र्याः स जयति विभुताविघ्नितेच्छो वराहः॥३०॥

अत्र च तथाविधः पदार्थपरिस्पन्दमहिमा निबद्धोदयः स्वभाव-सम्भविनस्तत्परिस्पन्दान्तरस्य संरोधसम्पादनेन स्वभावमहत्तां समुल्लासयन् सहृदयाह्लादकारितां प्रपन्नः। यथा च-

तामभ्यागच्छद्रुदितानुसारी मुनिः कुशेध्माहरणाय यातः।
निषादविद्धाण्डजदर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः ॥३१॥

अत्र कोऽसौ मुनिर्वाल्मीकिरिति पर्यायपदमात्रे वक्तव्ये परमकारुणिकस्य निषादनिर्भिन्नशकुनिसन्दर्शनमात्रसमुत्थितः शोकः श्लोकत्वमभजत यस्येति तस्य तदवस्थजनकराजपुत्रीदर्शनविवशवृत्तेरन्तःकरणपरिस्पन्दः करुणरसपरिपोषाङ्गतया सहृदयहृदयाह्लादकारी कवेरभिप्रेतः। यथा च

भर्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहं
तत्सन्देशाद्धृदयनिहितादागतं त्वत्समीपम्।
यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां
मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि॥३२॥

अत्र प्रथममामन्त्रणपदार्थस्तदाश्वासकारिपरिस्पन्दनिबन्धनः भर्तुमित्रं मां विद्धीत्युपादेयत्वमात्मनः प्रथयति। तच्च न सामान्यम्, प्रियमिति विश्रम्भकथापात्रताम्। इति तामाश्वास्योन्मुखीकृत्य च तत्सन्देशात्त्वत्समीपमागमनमिति प्रकृतं प्रस्तौति। हृदयनिहितादिति स्वहृदयानिहितं सावधानत्वं द्योत्यते। ननु चान्यः कश्चिदेवंविध-व्यवहारविदग्धबुद्धिः कथं न नियुक्त इत्याह— ममैवात्र किमषि कौशलं विजृम्भते। अम्बुवाहमित्या मनस्तत्कारिताभिधानं द्योतयति। यः प्रोषितानां वृन्दानि त्वरयति, सञ्जातत्वराणि करोति। कीदृशानाम्— श्राम्यतां त्वरायामसमर्थानामपि। वृन्दानीति— बाहुल्यात्तत्कारिताभ्यासं कथयति। केन— मन्द्रस्निग्धैर्ध्वनिभिः, माधुर्यरमणीयैः शब्दैर्विदग्धदूतप्रोचनावचनप्रायैरित्यर्थः। क्व—पथि मार्गे। यदृच्छया यथाकथञ्चिदहमेतदाचरामीति किं पुनः प्रयत्नेन सुहृत्प्रेमनिमित्तं संरब्धबुद्धिं न करोमीति।

कीदृशानि वृन्दानि— अबलावेणिमोक्षोत्सुकानि। अबला-शब्देनात्र तत्प्रेयसीविरहवैधुर्यासहत्वं भण्यते, तद्वेणिमोक्षोत्सुकानीति तेषां तदनुरक्तचित्तवृत्तित्वम्। तदयमत्र वाक्यार्थः — विधिविहितविरहवैधुर्यस्य परस्परानुरक्त चित्तवृत्तेर्यस्य कस्यचित्कामिजनस्य समागमसौख्यसम्पादनसौहार्दे सदैव गृहीतव्रतोऽस्मीति। अत्र यः पदार्थपरिस्पन्दः कविनोपनिबद्धः प्रबन्धस्य मेघदूतत्वे परमार्थतः स एव जीवितमिति सुतरां सहृदयहृदयाह्लादकारी। न पुनरेवंविधो यथा—

सद्यः पुरीपरिसरेऽपि शिरीषमृद्वी
सीता जवात् त्रिचतुराणि पदानि गत्वा।
गन्तव्यमद्य कियदित्यसकृद् ब्रुवाणा
रामाश्रुणः कृतवती प्रथमावतारम्॥६३॥

अत्रासत्प्रतिक्षणं कियदद्य गन्तव्यमित्यभिधानलक्षणः परिस्पन्दो न स्वभावमहत्तामुन्मीलयति, न च रसपरिपोषाङ्गतां प्रतिपद्यते। यस्मात्सीतायाः सहजेन केनाप्यौचित्येन गन्तुमध्यवसितायाः सौकुमार्यादेवंविधं वस्तु हृदये परिस्फुरदपि वचनमारोहतीति सहृदयैः सम्भावयितुं न पार्यते। न च प्रतिक्षणमभिधीयमानमपि राधवाश्रुप्रथमावतारस्य सम्यक् सङ्गतिं भजते, सकृदाकर्णनादेव तस्योपपत्तेः। एतच्चात्यन्तरमणीयमपि मनाङ्गमात्रचलितावधानत्वेन कवेः कदर्थितम्। तस्माद् 'अवशम्' इत्यत्र पाठः कर्तव्यः। तदेवंविधं विशिष्टमेव शब्दार्थयोर्लक्षणमुपादेयम्। तेन नेयार्थापार्थादयो दूरोत्सारितत्वात्पृथङ् न वक्तव्याः।

एवं शब्दार्थयोः प्रसिद्धस्वरूपातिरिक्तमन्यदेव रूपान्तरमभिधाय न तावन्मात्रमेव काव्योपयोगि, किन्तु वैचित्र्यान्तरविशिष्टमित्याह-

उभावेतावलङ्कार्यौ तयोः पुनरलङ्कृतिः।

वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते॥१०॥

उभौ द्वावप्येतौ शब्दार्थावलङ्कार्यावलङ्करणीयौ केनापि शोभातिशयकारिणालङ्करणेन योजनीयौ। किं तत्तयोरलङ्करणमित्यभिधीयते— तयोः पुनरलङ्कृतिः। तयोर्द्वित्वसंख्याविशिष्टयोरप्यलङ्कृतिः पुनरेकैव, यथा द्वावप्यलंक्रियेते। कासौ- वक्रोक्तिरेव। वक्रोक्तिः प्रासिद्धाभिधानव्यतिरेकिणी विचित्रैवाभिधा। कीदृशी-वैदग्ध्यभङ्गीभणितिः। वैदग्ध्यं विदग्धभावः कविकर्मकौशलं तस्य भङ्गी विच्छित्तिः, तया भणितिः विचित्रैवाभिधा वक्रोक्तिरित्युच्यते। तदिदमत्र तात्पर्यम्— यत् शब्दार्थौ पृथगवस्थितौ केनापि व्यतिरिक्तेनालङ्करणेन योज्येते, किन्तु वक्रतावैचित्र्ययोगितयाभिधानमेवानयोरलङ्कारः, तस्यैव शोभातिशयकारित्वात्। एतच्च वक्रताव्याख्यानावसर एवोदाहरिष्यते।

ननु च किमिदं प्रसिद्धार्थविरुद्धं प्रतिज्ञायते यद्वक्रोक्तिरेवालङ्कारो नान्यः कश्चिदिति, यतश्चिरन्तनैरपरं स्वभावोक्तिलक्षणमलङ्करणमाम्नातं तच्चातीव रमणीयमित्यसहमानस्तदेव निराकर्तुमाह—

अलङ्कारकृतां येषां स्वभावोक्तिरलङ्कृतिः।

अलङ्कार्यतया तेषां किमन्यदवतिष्ठते॥११॥

येषामलङ्कारकृतामलङ्कारकाराणां स्वभावोक्तिरलङ्कृतिः, या स्वभावस्य पदार्थधर्मलक्षणस्य परिस्पन्दस्य उक्तिरभिधा सैवालङ्कृतिरलङ्करणमिति प्रतिभाति, ते सुकुमारमानसत्वाद् विवेकक्लेशद्वेषिणः। यस्मात् स्वभावोक्तिरिति कोऽर्थः? स्वभाव एवोच्यमानः स इव यद्यलङ्कारस्तत्किमन्यत्तद्- व्यतिरिक्तं काव्यशरीरकल्पं वस्तु विद्यते यत्तेषामलङ्कार्यतया विभूष्यत्वेनावतिष्ठते पृथगवस्थितिमासादयति, न किञ्चिदित्यर्थः।

ननु च पूर्वमवस्थापितम्-यद्वाक्यस्यैवाविभागस्य सालङ्कारस्य काव्यत्वमिति (१/६) तत्किमर्थमेतदभिधीयते? सत्यम्, किन्तु तत्रासत्यभूतोऽप्यपोद्धारबुद्धिविहितो विभागः कर्तुं शक्यते वर्णपदन्यायेन वाक्पदन्यायेन चेत्युक्तमेव। एतदेव प्रकारान्तरेण विकल्पयितुमाह—

स्वभावव्यतिरेकेण वक्तुमेव न युज्यते।

वस्तु तद्रहितं यस्मान्निरुपाख्यं प्रसज्यते॥१२॥

स्वभावव्यतिरेकेण स्वपरिस्पन्दं विना निःस्वभावं वक्तुमभिधातुमेव न युज्यते न शक्यते। वस्तु वाच्यलक्षणम्। कुतः– तद्रहितं तेन स्वभावेन रहितं वर्जितं यस्मान्निरुपाख्यं प्रसज्यते। उपाख्याया निष्क्रान्तं निरुपाख्यम्। उपाख्या शब्दः, तस्यागोचरभूतमभिधानायोग्यमेव सम्पद्यते। यस्मात् स्वभावशब्दस्येदृशी व्युत्पत्तिः— भवतोऽस्मादभिधानप्रत्ययाविति भावः, स्वस्यात्मनो भावः स्वभावः। तेन वर्जितमसत्कल्पं वस्तु शशविषाणप्रायं शब्दज्ञानागोचरतां प्रतिपद्यते। स्वभावयुक्तमेव

सर्वथाभिधेयपदवीमवतरतीति शाकटिवाक्यानामपि सालङ्कारता प्राप्नोति, स्वभावोक्तियुक्तत्वेन। एतदेव युक्त्यन्तरेण विकल्पयति —

शरीरं चेदलङ्कारः किमलङ्कुरुतेऽपरम्।

आत्मैव नात्मनः स्कन्धं क्वचिदप्यधिरोहति॥१३॥

यस्य कस्यचिद्वर्ण्यमानस्य वस्तुनो वर्णनीयत्वेन स्वभाव एव वर्ण्यशरीरम्। स एव चेदलङ्कारो यदि विभूषणं तत्किमपरं तद्व्यतिरिक्तं विद्यते यदलङ्कुरुते विभूषयति। नात्मनः स्कन्धं क्वचिदप्यधिरोहति, शरीरमेव शरीरस्य न कुत्रचिदप्यंसमधिरोहतीत्यर्थः, स्वात्मनि क्रियाविरोधात्। अन्यच्चाभ्युपगम्यापि ब्रूमः—

भूषणत्वे स्वभावस्य विहिते भूषणान्तरे।

भेदावबोधः प्रकटस्तयोरप्रकटोऽथवा॥१४॥

स्पष्टे सर्वत्र संसृष्टिरस्पष्टे सङ्करस्ततः।

अलङ्कारान्तराणां च विषयो नावशिष्यते॥१५॥

भूषणत्वे स्वभावस्यालङ्कारत्वे स्वपरिस्पन्दस्य यदा भूषणान्तरमलङ्कारान्तरं विधीयते तदा विहिते कृते, तस्मिन् सति, द्वयी गतिः सम्भवति। कासौ—तयोः स्वभावोक्त्यलङ्कारान्तरयोः भेदावबोधो भिन्नत्वप्रतिभासः प्रकटः सुस्पष्टः कदाचिदप्रकटश्चापरिस्फुटो वेति। तदा स्पष्टे प्रकटे तस्मिन् सर्वत्र सर्वस्मिन् कविवाक्ये संसृष्टिरेवैकालङ्कृतिः प्राप्नोति। अस्पष्टे तस्मिन्नप्रकटे सर्वत्रैवैकः सङ्करोऽलङ्कारः प्राप्नोति। ततः को दोषः स्यादित्याह—अलङ्कारान्तराणां च विषयो नावशिष्यते। अन्येषामलङ्काराणामुपमादीनां विषयो गोचरो न कश्चिदप्यवशिष्यते, निर्विषयत्वमेवायातीत्यर्थः। ततस्तेषां लक्षणकरणवैयर्थ्यप्रसङ्गः। यदि वा तावेव संसृष्टिसङ्करौ तेषां विषयत्वेन कल्प्येते तदपि न किञ्चित्,

तैरेवालङ्कारकारैस्तस्यार्थस्यानङ्गीकृतत्वात्। इत्यनेनाकाशचर्वणप्रतिमेनालमलीक-निबन्धनेन। प्रकृतमनुसरामः। सर्वथा यस्य कस्यचित् पदार्थजातस्य कविव्यापारविषयत्वेन वर्णनापदवीमवतरतः स्वभाव एव सहृदयाह्लादकारी काव्यशरीरत्वेन वर्णनीयतां प्रतिपद्यते। स एव च यथायोगं शोभातिशयकारिणा येन केनचिदलङ्कारेण योजयितव्यः। तदिदमुक्तम्— 'अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः' (१/९) इति। 'उभावेतालङ्कार्यौ' (१/१०) इति च।

एवं शब्दार्थयोः परमार्थमभिधाय 'शब्दार्थौ' इति (१/७) काव्यलक्षणवाक्ये पदमेकं व्याख्यातम्। इदानीं 'सहितौ' इति (१/७) व्याख्यातुं साहित्यमेतयोः पर्यालोच्यते—

शब्दार्थौ सहितावेव प्रतीतौ स्फुरतः सदा।

सहिताविति तावेव किमपूर्वं विधीयते॥१६॥

शब्दार्थावभिधानाभिधेयौ सहिताववियुक्तावेव सदा सर्वकालं प्रतीतौ स्फुरतः ज्ञाने प्रतिभासेते। ततस्तावेव सहिताववियुक्ताविति किमपूर्वं विधीयते न किञ्चिदपूर्वं निष्पाद्यते, सिद्धं साध्यत इत्यर्थः। तदेवं शब्दार्थयोर्निसर्गसिद्धं साहित्यम्। कः सचेताः पुनस्तदभिधानेन निष्प्रयोजनमात्मानमायासयति? सत्यमेतत्, किन्तु न वाच्यवाचक-लक्षणशाश्वतसम्बन्धनिबन्धनं वस्तुतः साहित्यमित्युच्यते। यस्मादेतस्मिन् साहित्यशब्देनाभिधीयमाने कष्टकल्पनोपरचितानि गाङ्कुटादिवाक्यान्यसम्बद्धानि शाकटिकादिवाक्यानि च सर्वाणि साहित्यशब्देनाभिधीयेरन्। तेन पदवाक्यप्रमाणव्यतिरिक्तं किमपि तत्त्वान्तरं साहित्यमिति विभागोऽपि न स्यात्।

ननु च पदादिव्यतिरिक्तं यत्किमपि साहित्यं नाम तदपि सुप्रसिद्धमेव, पुनस्तदभिधानेऽपि कथं पौनरुक्त्यप्रसङ्गः? अतएव तदुच्यते— यदिदं साहित्यं नाम तदेतावति निःसीमनि समयाध्वनि साहित्यशब्दमात्रेणैव प्रसिद्धम्। न पुनरेतस्य कविकर्मकौशलकाष्ठाधिरूढिरमणीयस्याद्यापि कश्चिदपि विपश्चिदयमस्य परमार्थ इति

मनाङ्मात्रमपि विचारपदवीमवतीर्णः। तदद्य सरस्वतीहृदयारविन्दमकरन्दबिन्दुसन्दोहसुन्दराणां सत्कविवचसामन्तरामोदमनोहरत्वेन परिस्फुरदेतत् सहृदयषट्चरणगोचरतां नीयते।

साहित्यमनयोः शोभाशालितां प्रति काप्यसौ।

अन्यूनानतिरिक्तत्वमनोहारिण्यवस्थितिः॥१७॥

सहितयोर्भावः साहित्यम्। अनयोः शब्दार्थयोर्या काप्यलौकिकी चेतनचमत्कारकारितायाः कारणम् अवस्थितिर्विचित्रैव विन्यासभङ्गी। कीदृशी— अन्यूनानतिरिक्तत्वमनोहारिणी, परस्परस्पर्धित्वरमणीया। यस्यां द्वयोरेकतरस्यापि न्यूनत्वं निकर्षो न विद्यते नाप्यतिरिक्तत्वमुत्कर्षो वास्तीत्यर्थः।

ननु च तथाविधं साम्यं द्वयोरुपहतयोरपि सम्भवतीत्याह— शोभाशालितां प्रति। शोभा सौन्दर्यमुच्यते। तया शालते श्लाघते यः स शोभाशाली, तस्य भावः शोभाशालिता, तां प्रति सौन्दर्यश्लाघितां प्रतीत्यर्थः। सैव च सहृदयाह्लादकारिता। तस्यां स्पर्धित्वेन यासाववस्थितिः परस्परसाम्यसुभगमवस्थानं सा साहित्यमुच्यते। तत्र वाचकस्य वाचकान्तरेण वाच्यस्य वाच्यान्तरेण साहित्यमभिप्रेतम्, वाक्ये काव्यलक्षणस्य परिसमाप्तत्वादिति प्रतिपादितमेव(१/७)।

ननु च वाचकस्य वाच्यान्तरेण वाच्यस्य वाचकान्तरेण कथं न साहित्यमिति चेत्तन्न, क्रमव्युत्क्रमे प्रयोजनाभावादसमन्वयाच्च। तस्मादेतयोः शब्दार्थयोर्यथास्वं यस्यां स्वसम्पत्सामग्रीसमुदायः सहृदयाह्लादकारी परस्परस्पर्धया परिस्फुरति, सा काचिदेव विन्याससम्पत् साहित्यव्यपदेशभाग् भवति।

मार्गानुगुण्यसुभगो माधुर्यादिगुणोदयः।

अलङ्करणविन्यासो वक्रतातिशयान्वितः॥34॥

वृत्त्यौचित्यमनोहारि रसानां परिपोषणम्।

स्पर्धया विद्यते यत्र यथास्वमुभयोरपि॥35॥

सा काप्यवस्थितिस्तद्विदानन्दस्पन्दसुन्दरा।

पदादिवाक्परिस्पन्दसारः साहित्यमुच्यते॥36॥

एतेषां च पदवाक्यप्रमाणसाहित्यानां चतुर्णामपि प्रतिवाक्यमुपयोगः। तथा चैतत्पदमेवंस्वरूपं गकारौकारविसर्जनीयात्मकमेतस्य चार्थस्य प्रातिपदिकार्थपञ्चकलक्षणस्याख्यातपदार्थषट्कलक्षणस्य वाचकमिति पदसंस्कारलक्षणस्य व्यापारः। पदानां च परस्परान्वयलक्षणसम्बन्धनिबन्धनमेतद्वाक्यार्थतात्पर्यमिति वाक्यविचारलक्षणस्योपयोगः। प्रमाणेन प्रत्यक्षादिनैतदुपपन्नमिति युक्तियुक्तत्वं नाम प्रमाणलक्षणस्य प्रयोजनम्। इदमेव परिस्पन्दमाहात्म्यात्सहृदयहृदयहारितां प्रतिपन्नमिति साहित्यस्योपयुज्यमानता। एतेषां यद्यपि प्रत्येकं स्वविषये प्राधान्यमन्येषां गुणीभावस्तथापि सकलवाक्परिस्पन्दजीवितायमानस्यास्य साहित्यलक्षणस्यैव कविव्यापारस्य वस्तुतः सर्वत्रातिशयित्वम्। यस्मादेतदमुख्यतयापि यत्र वाक्यसन्दर्भान्तरे स्वपरिमलमात्रेणैव संस्कारमारभते तस्यैतदधिवासशून्यतामात्रेणैव रामणीयकविरहः पर्यवस्यति। तस्मादुपादेयतायाः परिहाणिरुत्पद्यते। तथा च स्वप्रवृत्तिवैयर्थ्यप्रसङ्गः। शास्त्रातिरिक्तप्रयोजनत्वं शास्त्राभिधेयचतुर्वर्गाधिकफलत्वं चास्य पूर्वमेव प्रतिपादितम्(१/३/५)

अपर्यालोचितेऽप्यर्थे बन्धसौन्दर्यसम्पदा।

गीतवद्धृदयाह्लादं तद्विदां विदधाति यत्॥37॥

वाच्यावबोधनिष्पत्तौ पदवाक्यार्थवर्जितम्।

यत्किमप्यर्पयत्यन्तः पानकास्वादवत्सताम्॥38॥

शरीरं जीवितेनेव स्फुरितेनेव जीवितम्।

विना निर्जीवतां येन वाक्यं याति विपश्चिताम्॥39॥

यस्मात्किमपि सौभाग्यं तद्विदामेव गोचरम्।

सरस्वती समभ्येति तदिदानीं विचार्यते॥40॥

इत्यन्तरश्लोकाः।

एवं सहिताविति व्याख्याय कविव्यापारवक्रत्वं व्याचष्टे —

कविव्यापारवक्रत्वप्रकाराः सम्भवन्ति षट्।

प्रत्येकं बहवो भेदास्तेषां विच्छित्तिशोभिनः॥१८॥

कवीनां व्यापारः कविव्यापारः काव्यक्रियालक्षणस्तस्य वक्रत्वं वक्रभावः प्रसिद्धप्रस्थानव्यतिरेकि वैचित्र्यं तस्य प्रकाराः प्रभेदाः षट् सम्भवन्ति। मुख्यतया तावन्त एव सम्भवन्तीत्यर्थः। तेषां प्रत्येकं प्रकाराः बहवो भेदविशेषाः। कीदृशाः— विच्छित्तिशोभिनः वैचित्र्यभङ्गीभ्राजिष्णवः। सम्भवन्तीति सम्बन्धः। तदेव दर्शयति—

वर्णविन्यासवक्रत्वं पदपूर्वार्धवक्रता।

वक्रतायाः परोऽप्यस्ति प्रकारः प्रत्ययाश्रयः॥१९॥

वर्णानां विन्यासो वर्णविन्यासः अक्षराणां विशिष्टन्यसनं तस्य वक्रत्वं वक्रभावः प्रसिद्धप्रस्थानव्यतिरेकिणा वैचित्र्येणोपनिबद्धः सन्निवेशविशेषविहितस्तद्विदाह्लादकारी शब्दशोभातिशयः। यथा —

प्रथममरुणच्छायस्तावत्ततः कनकप्रभ-

स्तदनु विरहोत्ताम्यत्तन्वीकपोलतलद्युतिः।

प्रसरति ततो ध्वान्तक्षोदक्षमः क्षणदामुखे

सरसबिसिनीकन्दच्छेदच्छविर्मृगलाञ्छनः॥४१॥

अत्र वर्णविन्यासवक्रतामात्रविहितः शब्दशोभातिशयः सुतरां समुन्मीलितः। एतदेव वर्णविन्यासवक्रत्वं चिरन्तनेष्वनुप्रास इति प्रसिद्धम्। अत्र च प्रभेदस्वरूपनिरूपणं लक्षणावसरे करिष्यते(२/१)।

पदपूर्वार्धवक्रता—पदस्य सुबन्तस्य तिङन्तस्य वा यत्पूर्वार्धं प्रातिपदिकलक्षणं धातुलक्षणं वा तस्य वक्रता वक्रभावो विन्यासवैचित्र्यम्। तत्र च बहवः प्रकाराः सम्भवन्ति।

यत्र रूढिशब्दस्यैव प्रस्तावसमुचितत्वेन वाच्यप्रसिद्धधर्मान्तराध्यारोपगर्भत्वेन निबन्धः स पदपूर्वार्धवक्रतायाः प्रथमः प्रकारः। यथा —

रामोऽस्मि सर्वं सहे॥४२॥

द्वितीयः—यत्र संज्ञाशब्दस्य वाच्यप्रसिद्धधर्मस्य लोकोत्तरातिशयाध्यारोपं गर्भीकृत्योपनिबन्धः। यथा—

रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं परा-

मस्मद्भाग्यविपर्ययाद्यदि परं देवो न जानाति तम्।

वन्दीवैष यशांसि गायति मरुद्यस्यैकबाणाहति-

श्रेणीभूतविशालतालविवरोद्गीर्णैः स्वरैः सप्तभिः॥४३॥

अत्र रामशब्दो लोकोत्तरशौर्यादिधर्मातिशयाध्यारोपपरत्वेनोपात्तो वक्रतां प्रथयति।

पर्यायवक्रत्वं प्रकारान्तरं पदपूर्वार्धवक्रतायाः— यत्रानेकशब्दाभिधेयत्वे वस्तुनः किमपि पर्यायपदं प्रस्तुतानुगुणत्वेन प्रयुज्यते। यथा—

वामं कज्जलवद्विलोचनमुरो रोहद्विसारिस्तनं

मध्यं क्षाममकाण्ड एव विपुलाभोगा नितम्बस्थली।

सद्यः प्रोद्गतविस्मयैरिति गणैरालोक्यमानं मुहुः

पायाद्वः प्रथमं वपुः स्मररिपोर्मिश्रीभवत्कान्तया॥४४॥

अत्र 'स्मररिपोः' इति पर्यायः कामपि वक्रतामुन्मीलयति। यस्मात्कामशत्रोः कान्तया मिश्रीभावः शरीरस्य न कथञ्चिदपि सम्भाव्यत इति गणानां सद्यःप्रोद्गतविस्मयत्वमुपपन्नम्। सोऽपि पुनः पुनः परिशीलनेनाश्चर्यकारीति 'प्रथम'—पदस्य जीवितम्।

एतच्च पर्यायवक्रत्वं वाच्यासम्भविधर्मान्तरगर्भीकारेणापि दृश्यते। यथा—

अङ्गराज सेनापते राजवल्लभ रक्षैनं भीमाद् दुःशासनम् इति॥45॥

अत्र त्रयाणामपि पर्यायाणामसम्भाव्यमानतत्परित्राणपात्रत्वलक्षणमकिञ्चित्करत्वं गर्भीकृत्योपहस्यते—रक्षैनमिति।

पदपूर्वार्धवक्रताया उपचारवक्रत्वं नाम प्रकारान्तरं विद्यते—यत्रामूर्तस्य वस्तुनो मूर्तद्रव्याभिधायिना शब्देनाभिधानमुपचारात्। यथा—

निष्कारणं निकारकणिकापि मनस्विनां मानसमायासयति। यथा—

हस्तापचेयं यशः।

'कणिका'-शब्दो मूर्तवस्तुस्तोकार्थाभिधायी स्तोकत्वसामान्योपचारादमूर्तस्यापि निकारस्य स्तोकाभिधानपरत्वेन प्रयुक्तस्तद्विदाह्लादकारित्वाद्वक्रतां पुष्णाति। 'हस्तापचेयम्' इति मूर्तपुष्पादिवस्तुसम्भविसंहतत्वसामान्योपचारादमूर्तस्यापि यशसो हस्तापचेयमित्यभिधानं वक्रत्वमावहति।

द्रवरूपस्य वस्तुनो वाचकशब्दस्तरङ्गितत्वादिधर्मनिबन्धनः किमपि सादृश्यमात्रमवलम्ब्य संहतस्यापि वाचकत्वेन प्रयुज्यमानः कविप्रवाहे प्रसिद्धः। यथा—

श्वासोत्कम्पतरङ्गिणि स्तनतटे इति॥४६॥

क्वचिदमूर्तस्यापि द्रवरूपार्थाभिधायी वाचकत्वेन प्रयुज्यते। यथा—

एकां कामपि कालविप्रषममी शोर्योष्मकण्डूव्यय-

व्यग्राः स्युश्चिरविस्मृतामरचमूडिम्बाहवा बाहवः॥४७॥

एतयोस्तरङ्गिणीति विप्रुषमिति च वक्रतामावहतः।

विशेषणवक्रत्वं नाम पदपूर्वार्धवक्रतायाः प्रकारो विद्यते—यत्र विशेषणमाहात्म्यादेव तद्विदाह्लादकारित्वलक्षणं वक्रत्वमभिव्यज्यते। यथा—

दाहोऽम्भः प्रसृतिम्पचः प्रचयवान् वाष्पः प्रणालोचितः

श्वासाः प्रेङ्खितदीप्रदीपलतिकाः पाण्डिम्नि मग्नं वपुः।

किञ्चान्यत्कथयामि रात्रिमखिलां त्वन्मार्गवातायने

हस्तच्छत्रनिरुद्धचन्द्रमहसस्तस्याः स्थितिर्वर्तते॥४८॥

अत्र दाहो वाष्पः श्वासा वपुरिति न किञ्चिद्वैचित्र्यमुन्मीलितम्। प्रत्येकं विशेषणमाहात्म्यात्पुनः काचिदेव वक्रताप्रतीतिः। यथा च—

व्रीडायोगान्नतवदनया सन्निधाने गुरूणां

बद्धोत्कम्पस्तनकलशया मन्युमन्तर्नियम्य

तिष्ठेत्युक्तं किमिव न तया यत्समुत्सृज्य बाष्पं

मय्यासक्तश्चकितहरिणीहारिनेत्रत्रिभागः॥४९॥

अत्र चकितहरिणीहारीति क्रियाविशेषणं नेत्रत्रिभागासङ्गस्य गुरुसन्निधानविहिताप्रगल्भत्वरमणीयस्य कामपि कमनीयतामावहति चकितहरिणीहारिविलोचनसाम्येन।

अयमपरः पदपूर्वार्धवक्रतायाः प्रकारो यदिदं संवृतिवक्रत्वं नाम— यत्र पदार्थस्वरूपं प्रस्तावानुगुण्येन केनापि निकर्षेणोत्कर्षेण वा युक्तं व्यक्ततया साक्षादभिधातुमशक्यं संवृतिसामर्थ्योपयोगिना शब्देनाभिधीयते। यथा—

सोऽयं दम्भधृतव्रतः प्रियतमे कर्तुं किमप्युद्यतः॥५०॥

अत्र वत्सराजो वासवदत्ताविपत्तिविधुरहृदयस्तत्प्राप्तिप्रलोभनवशेन पद्मावतीं परिणेतुमीहमानस्तदेवाकरणीयमित्यवगच्छन् तस्य वस्तुनो महापातकस्येवाकीर्तनीयतां ख्यापयति किमपीत्यनेन संवरणसमर्थेन सर्वनामपदेन। यथा च—

निद्रानिमीलितदृशो मदमन्थराया

नाप्यर्थवन्ति न च यानि निरर्थकानि।

अद्यापि मे वरतनोर्मधुराणि तस्या-

स्तान्यक्षराणि हृदये किमपि ध्वनन्ति॥५१॥

अत्र किमपीति तदाकर्णनविहितायाश्चित्तचमत्कृतेरनुभवैकगोचर-त्वलक्षणमव्यपदेश्यत्वं प्रतिपाद्यते। तानीति तथाविधानुभव-विशिष्टतया स्मर्यमाणानि। नाप्यर्थवन्तीति स्वसंवेद्यत्वेन व्यपदेशाविषयत्वं प्रकाश्यते। तेषां च न च यानि निरर्थकानीत्यलौकिकचमत्कारकारित्वादपार्थकत्वं निवार्यते। त्रिष्वप्येतेषु विशेषणवक्रत्वं प्रतीयते।

इदमपरं पदपूर्वार्धवक्रतायाः प्रकारान्तरं सम्भवति वृत्तिवैचित्र्यवक्रत्वं नाम— यत्र समासादिवृत्तीनां कासाञ्चिद् विचित्राणामेव कविभिः परिग्रहः क्रियते। यथा—

मध्येऽङ्कुरं पल्लवाः॥५२॥

यथा च—

पाण्डिम्नि मग्नं वपुः॥५३॥

यथा वा—

सुधाविसरनिष्यन्दसमुल्लासविधायिनि।

हिमधामनि खण्डेऽपि न जनो नोन्मनायते॥५४॥

अपरं लिङ्गवैचित्र्यं नाम पदपूर्वार्धवक्रतायाः प्रकारान्तरं दृश्यते— यत्र भिन्नलिङ्गानामपि शब्दानां वैचित्र्याय सामानाधिकरण्योपनिबन्धः। यथा—

इत्थं जडे जगति को नु बृहत्प्रमाण-

कर्णः करी ननु भवेद् ध्वनितस्य पात्रम्॥५५॥

मैथिली तस्य दाराः॥इति॥५६॥

अन्यदपि लिङ्गवैचित्र्यवक्रत्वम्—यत्रानेकलिङ्गसम्भवेऽपि सौकुमार्यात् कविभिः स्त्रीलिङ्गमेव प्रयुज्यते, 'नामैव स्त्रीति पेशलम्'(२/२२) इति कृत्वा। यथा—

एतां पश्य पुरस्तटीम् इति॥५७॥

पदपूर्वार्धस्य धातोः क्रियार्थवैचित्र्यवक्रत्वं नाम वक्रत्वप्रकारान्तरं विद्यते— यत्र क्रियावैचित्र्यप्रतिपादनपरत्वेन वैदग्ध्यभङ्गीभणितिरमणीयान् प्रयोगान् निबध्नन्ति कवयः। तत्र क्रियावैचित्र्यं बहुविधं विच्छित्तिविततव्यवहारं दृश्यते। यथा—

रइकेलिहिअणिअंसणकरकिसल अरुद्धणअणजुअलस्स।

रूद्दस्स तइअणअणं पव्वइपरिचम्बिअं जअइ॥५८

अत्र समानेऽपि हि स्थगनप्रयोजने साध्ये तुल्ये च लोचनत्वे, देव्याः परिचुम्बनेन यस्य निरोधः सम्पाद्यते तद्भगवतस्तृतीयं नयनं जयति सर्वोत्कर्षेण वर्तते इति वाक्यार्थः। अत्र जयतीति क्रियापदस्य किमपि सहृदयहृदयसंवेद्यं वैचित्र्यं परिस्फुरदेव लक्ष्यते। यथा—

स्वेच्छाकेसरिणः स्वच्छस्वच्छायायासितेन्दवः।

त्रायन्तां वो मधुरिपोः प्रपन्नार्तिच्छिदो नखाः॥५९॥

अत्र नखानां सकललोकप्रसिद्धच्छेदनव्यापारव्यतिरेकि किमप्यपूर्वमेव प्रपन्नार्तिच्छेदनलक्षणं क्रियावैचित्र्यमुपनिबद्धम्। यथा च—

स दहतु दुरितं शाम्भवो वः शराग्निः॥६०॥

अत्र च पूर्ववदेव क्रियावैचित्र्यप्रतीतिः। यथा च—

कण्णुप्पलदलमिलिअलोअणेहिं हेलालोलणमाणिअणअणेहिं।

लीलइ लीलावईहि णिरुद्धओ सिढिलिअचाओ जअइ मअरद्धओ॥६१॥

अत्र लोचनैर्लीलया लीलावतीभिर्निरुद्धः स्वव्यापारपराङ्मुखीकृतः सन् शिथिलीकृतचापः कन्दर्पो जयति सर्वोत्कर्षेण वर्तत इति किमुच्यते, यतस्तास्तथाविधविजयावाप्तौ सत्यां जयन्तीति वक्तव्यम्।

तदयमत्राभिप्रायः— यत्तल्लोचनविलासानामेवंविधं जैत्रताप्रौढभावं पर्यालोच्य चेतनत्वेन स स्वचापारोपणायासमुपसंहृतवान्। यतस्तेनैव त्रिभुवनविजयावाप्तिः परिसमाप्यते। ममेति मन्यमानस्य तस्य सहायत्वोत्कर्षातिशयो जयतीति क्रियापदेन कर्तृतायाः कारणत्वेन कवेश्चेतसि परिस्फुरितः। तेन किमपि क्रियावैचित्र्यमत्र तद्विदाह्लाद-कारि प्रतीयते। यथा च—

तान्यक्षराणि हृदये किमपि ध्वनन्ति॥६२॥

अत्र जल्पन्ति वदन्तीत्यादि न प्रयुक्तम्, यस्मात्तानि कयापि विच्छित्त्या किमप्यनाख्येयं समर्पयन्तीति कवेरभिप्रेतम्।

वक्रतायाः परोऽप्यस्ति प्रकारः प्रत्याश्रय इति। वक्रभावस्यान्योऽपि प्रभेदो विद्यते। कीदृशः— प्रत्ययाश्रयः। प्रत्ययः सुप्तिङ् च यस्याश्रयः स्थानं स तथोक्तः। तस्यापि बहवः प्रकाराः सम्भवन्ति—संख्यावैचित्र्यविहितः कारकवैचित्र्यविहितः, पुरुषवैचित्र्यविहितश्च। तत्र. संख्यावैचित्र्यविहितः— यस्मिन् वचनवैचित्र्यं काव्यबन्धशोभायै निबध्यते। यथा—

मैथिली तस्य दाराः॥इति॥६३॥

फुल्लेन्दीवरकाननानि नयने पाणी सरोजाकराः॥६४॥

अत्र द्विवचनबहुवचनयोः समानाधिकरण्यमतीव चमत्कारि।

कारकवैचित्र्यविहितः- यत्राचेतनस्यापि पदार्थस्य चेतनत्वाध्यारोपेण चेतनस्यैव क्रियासमावेशलक्षणं रसादिपरिपोषणार्थं कर्तृत्वादिकारकं निबध्यते। यथा—

स्तनद्वन्द्वं मन्दं स्नपयति बलाद्वाष्पनिवहो

हठादन्तःकण्ठं लुठति सरसः पञ्चमरवः।

शरज्ज्योत्स्नापाण्डुः पतति च कपोलः करतले

न जानीमस्तस्याः क इव हि विकारव्यतिकरः॥६५॥

अत्र वाष्पनिवहादीनामचेतनानामपि चेतनत्वाध्यारोपेण कविना कर्तृत्वमुपनिबद्धम्— यत्तस्या विवशायाः सत्यास्तेषामेवंविधो व्यवहारः, सा पुनः स्वयं न किञ्चिदप्याचरितुं समर्थेत्यभिप्रायः। अन्यच्च कपोलादीनां तदवयवानामेतदवस्थत्वं प्रत्यक्षतयास्मदादिगोचरतामापद्यते, तस्याः पुनर्योऽसावन्तर्विकारव्यतिकरस्तं तदनुभवैक-विषयत्वाद्वयं न जानीमः। यथा च—

चापाचार्यस्त्रिपुरविजयी कार्तिकेयो विजेयः

शस्त्रव्यस्तः सदनमुदधिर्भूरियं हन्तकारः।

अस्त्येवैतत् किमु कृतवता रेणुकाकण्ठबाधां

बद्धस्पर्शस्तव परशुना लज्जते चन्द्रहासः॥६६॥

अत्र चन्द्रहासो लज्जत इति पूर्ववत् कारकवैचित्र्यप्रतीतिः। पुरुषवैचित्र्यविहितं वक्रत्वं विद्यते— यत्र प्रत्यक्तापरभावविपर्यासं प्रयुञ्जते कवयः काव्यवैचित्र्यार्थं युष्मद्यस्मदि वा प्रयोक्तव्ये प्रातिपदिकमात्रं निबध्नन्ति। यथा—

अस्मद्भाग्यविपर्ययाद्यदि परं देवो न जानाति तम्॥६७॥

अत्र त्वं न जानासीति वक्तव्ये वैचित्र्याय देवो न जानातीत्युक्तम्।

एवं युष्मदादिविपर्यासः क्रियापदं विना प्रातिपदिकमात्रेऽपि दृश्यते। यथा—

अयं जनः प्रष्टुमनास्तपोधने

न चेद्रहस्यं प्रतिवक्तुमर्हसि॥६८॥

अत्राहं प्रष्टुकाम इति वक्तव्ये ताटस्थ्यप्रतीत्यर्थमयं जन इत्युक्तम्। यथा वा—

सोऽयं दम्भधृतव्रतः इति॥६९॥

अत्र सोऽहमिति वक्तव्ये पूर्ववद् 'अयम्' इति वैचित्र्यप्रतीतिः।

एते च मुख्यतया वक्रताप्रकाराः कतिचिन्निदर्शनार्थं प्रदर्शिताः। शिष्टाश्च सहस्रशः सम्भवन्तीति महाकविप्रवाहे सहृदयैः स्वयमेवोत्प्रेक्षणीयाः।

एयं वाक्यावयवानां पदानां प्रत्येकं वर्णाद्यवयवद्वारेण यथा-सम्भवं वक्रभावं व्याख्यायेदानीं पदसमुदायभूतस्य वाक्यस्य वक्रता व्याख्यायते-

वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा।

यत्रालङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति॥२०॥

वाक्यस्य वक्रभावोऽन्यः। वाक्यस्य पदसमुदायभूतस्य। आख्यातं साव्ययकारकविशेषणं वाक्यमिति यस्य प्रतीतिस्तस्य श्लोकादेर्वक्रमभावो भङ्गीभणितिवैचित्र्यम् अन्यः पूर्वोक्तवक्रताव्यतिरेकी समुदायवैचित्र्यनिबन्धनः कोऽपि सम्भवति। यथा—

उपस्थितां पूर्वमपास्य लक्ष्मी वनं मया सार्धमसि प्रपन्नः।

त्वामाश्रयं प्राप्य तया नु कोपात्सोषास्मि न त्वद्भवने वसन्ती॥६०॥

एतत्सीतया तथाविधकरुणाक्रान्तान्तःकरणया वल्लभं प्रति सन्दिश्यते— यदुपस्थितां सेवासमापन्नां लक्ष्मीमपास्य श्रियं परित्यज्य पूर्वं यस्त्वं मया सार्धं वनं प्रपन्नो विपिनं प्रयातस्तस्य तव स्वप्नेऽप्येतन्न सम्भाव्यते। तया पुनस्तस्मादेव कोपात् स्त्रीस्वभावसमुचितसपत्नीविद्वेषात्वद्गृहे वसन्ती न सोढास्मि। तदिदमुक्तं भवति—यत्तस्मिन्

विधुरदशाविसंष्ठुलेऽपि समये तथाविधप्रसादास्पदतामध्यारोप्य यदिदानीं साम्राज्ये निष्कारणपरित्यागतिरस्कारपात्रतां नीतास्मीत्येतदुचितमनुचितं वा विदितव्यवहारपरम्परेण भवता स्वयमेव विचार्यतामिति।

स च वक्रभावस्तथाविधो यः सहस्रधा भिद्यते बहुप्रकारं भेदमासादयति। सहस्र-शब्दोऽत्र संख्याभूयस्त्वमात्रवाची, न नियतार्थवृत्तिः, यथा— सहस्रदलमिति। यस्मात् कविप्रतिभानामानन्त्यान्नियतत्वं न सम्भवति। योऽसौ वाक्यस्य वक्रभावो बहुप्रकारः, न जानीमस्तं कीदृशमित्याह— यत्रालङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति। यत्र यस्मिन्नसावलङ्कारवर्गः कविप्रवाहप्रसिद्धप्रतीतिरूपमादिरलङ्करणकलापः सर्वः सकलोऽप्यन्तर्भविष्यति अन्तर्भावं व्रजिष्यति, पृथक्त्वेन नावस्थाप्यते। तत्प्रकारभेदत्वेनैव व्यपदेशमासादयिष्यतीत्यर्थः। स चालङ्कारवर्गः स्वलक्षणावसरे प्रतिपदमुदाहरिष्यते।

एवं वाक्यवक्रतां व्याख्याय वाक्यसमूहरूपस्य प्रकरणस्य तत्समुदायात्मकस्य च प्रबन्धस्य वक्रता व्याख्यायते—

वक्रभावः प्रकरणे प्रबन्धे वास्ति यादृशः।

उच्यते सहजाहार्यसौकुमार्यमनोहरः॥२१॥

वक्रभावो विन्यासवैचित्र्यं प्रबन्धैकदेशभूते प्रकरणं यादृशोऽस्ति यादृग् विद्यते प्रबन्धे वा नाटकादौ सोऽत्युच्यते कथ्यते। कीदृशः— सहजाहार्यसौकुमार्यमनोहरः सहजं स्वाभाविकमाहार्यं व्युत्पत्त्युपार्जितं यत्सैकुमार्यं रामणीयकं तेन मनोहरो हृदयहारी यः स तथोक्तः।

तत्र प्रकरणे वक्रभावो यथा— रामायणे मारीचमायामयमाणिक्यमृगानुसारिणो रामस्य करुणाक्रन्दकर्णनकातरान्तःकरणया जनकराजपुत्र्या तत्प्राणपरित्राणाय स्वजीवितपरिरक्षानिरपेक्षया लक्ष्मणो निर्भर्त्स्य प्रेषितः।

तदेतदत्यन्तमनौचित्ययुक्तम्। तस्य च सर्वातिशयचरितयुक्तत्वेन वर्ण्यमानस्य तेन कनीयसा प्राणपरित्राणसम्भावनेत्येतदत्यन्तमसमीचीनमिति पर्यालोच्य उदात्तराघवे कविना वैदग्ध्यवशेन मारीचमृगमारणाय प्रयातस्य परित्राणार्थं लक्ष्मणस्य सीतया कातरत्वेन रामः प्रेरितः इत्युपनिबद्धम्। अत्र च तद्विदाह्लादकारित्वमेव वक्रत्वम्। यथा च—

किरातार्जुनीये किरातपुरूषोक्तिषु वाच्यत्वेन स्वमार्गणमार्गणमात्रमेवोपक्रान्तम्। वस्तुतः पुनरर्जुनेन सह तात्पर्यार्थलोचनया विग्रहो वाक्यार्थतामुपनीतः।

तथा च तत्रैवोच्यते —

प्रयुज्य सामाचरितं विलोभनं भयं विभेदाय धियः प्रदर्शितम्।

तथाभियुक्तं च शिलीमुखार्थिना यथेतरन्न्याय्यमिवावभासते॥७१॥

प्रबन्धे वक्रभावा यथा— कुत्रचिन्महाकविविरचिते रामकथोपनिबन्धे नाटकादौ पञ्चविधवक्रतासामग्रीसमुदायसुन्दरं सहृदयहृदयहारि महापुरुषवर्णनमुपक्रमे प्रतिभासते परमार्थतस्तु विधिनिषेधात्मकधर्मोपदेशः पर्यवस्यति, रामवद्वर्तितव्यं न रावणवदिति।

यथा च, तापसवत्सराजे कुसुमसुकुमारचेतसः सरसविनोदैकरसिकस्य नायकस्य चरितवर्णनमुपक्रान्तम्। वस्तुतस्तु व्यसनार्णवे निमज्जन्निजो राजा तथाविधनयव्यवहारनिपुणैरमात्यैस्तैस्तैरुपायैरुत्तारणीय इत्युपदिष्टम्। एतच्च स्वलक्षणव्याख्यानावसरे व्यक्ततामायास्यति।

एवं कविव्यापारवक्रताषट्कमुद्देशमात्रेण व्याख्यातम्। विस्तरेण तु स्वलक्षणावसरे व्याख्यास्यते।

क्रमप्राप्तत्वेन बन्धोऽधुना व्याख्यास्यते—

वाच्यवाचकसौभाग्यलावण्यपरिपोषकः।

व्यापारशाली वाक्यस्य विन्यासो बन्ध उच्यते॥२२॥

विन्यासो विशिष्टं न्यसनं यः सन्निवेशः स एष व्यापारशाली बन्ध उच्यते। व्यापारोऽत्र प्रस्तुतकाव्यक्रियालक्षणः। तेन शालते श्लाघते यः स तथोक्तः। कस्य-वाक्यस्य श्लोकादेः। कीदृशः—वाच्यवाचकसौभाग्यलावण्यपरिपोषकः वाच्यवाचकयोर्द्वयोरपि वाच्यस्याभिधेस्य वाचकस्य च शब्दस्य वक्ष्यमाणं सौभाग्यलावण्यलक्षणं यद् गुणद्वयं तस्य परिपोषकः पुष्टतातिशयकारी सौभाग्यं प्रतिभासंरम्भफलभूतं चेतनचमत्कारित्वलक्षणम्, लावण्यं सन्निवेशसौन्दर्यम्, तयोः परिपोषकः। यथा—

दत्त्वा वामकरं नितम्बफलके लीलावलन्मध्यया
प्रोत्तुङ्गस्तनमंसचुम्बिचिबुकं कृत्वा तया मां प्रति
प्रान्तप्रोतनवेन्द्रनीलमणिमन्मुवलीविभ्रमाः
सासूयं प्रहिताः स्मरज्वरमुचो द्वित्राः कटाक्षच्छटाः॥72॥

अत्र समग्रकविकौशलसम्पाद्यस्य चेतनचमत्कारित्वलक्षणस्य सौभाग्यस्य कियन्मात्रवर्णविन्यासविच्छित्तिविहितस्वपदसन्धानसम्पदुपार्जितस्य च लावण्यस्य परः परिपोषो विद्यते।

एवं च स्वरूपमभिधाय तद्विदाह्लादकारित्वमभिधत्ते—

वाच्यवाचकवक्रोक्तित्रितयातिशयोत्तरम्।
तद्विदाह्लादकारित्वं किमप्यामोदसुन्दरम्॥२३॥

तद्विदाह्लादकारित्वं काव्यविदानन्दविधायित्वम्। कीदृशम्—वाच्यवाचकवक्रोक्तित्रितयातिशयोत्तरम्। वाच्यमभिधेयं वाचकं शब्दो वक्रोक्तिरलङ्करणम्, एतस्य त्रितयस्य योऽतिशयः कोऽप्युत्कर्षस्तस्मादुत्तरमतिरिक्तम्। स्वरूपेणातिशयेन च स्वरूपेणान्यत् किमपि तत्त्वान्तरमेतदतिशयेनैतस्मात्त्रितयादपि लोकोत्तरमित्यर्थः। अन्यच्च

कीदृशम्— किमप्यामोदसुन्दरम्। किमप्यव्यपदेश्यं सहृदयहृदयसन्देशम् आमोदः सुकुमारवस्तुधर्मो रञ्जकत्वं नाम, तेन सुन्दरं रञ्जकत्वरमणीयम्। यथा—

हंसानां निनदेषु यैः कवलितैरासज्यते कूजता-

मन्यः कोऽपि कषायकण्ठलुठनादाघर्घरो विभ्रमः।

ते सम्प्रत्यकठोरवारणवधूदन्ताङ्कुरस्पर्धिनो

निर्याताः कमलाकरेषु विसिनीकन्दाग्रिमग्रन्थयः॥73॥

अत्र त्रितयेऽपि वाच्यवाचकवक्रोक्तिलक्षणे प्राधान्येन न कश्चिदपि कवेः संरम्भो विभाव्यते। किन्तु प्रतिभावैचित्र्यवशेन किमपि तद्विदाह्लादकारित्वमुन्मीलितम्।

यद्यपि सर्वेषामुदाहरणानामविकलकाव्यलक्षणपरिसमाप्तिः सम्भवति तथापि यत्प्राधान्येनाभिधीयते स एवांशः प्रत्येकमुद्रिक्ततया तेषां परिस्फुरतीति सहृदयैः स्वयमेवोत्प्रेक्षणीयम्।

एवं काव्यसामान्यलक्षणमभिधाय तद्विशेषलक्षणविषयप्रदर्शनार्थं मार्गभेदनिबन्धनं त्रैविध्यमभिधत्ते—

सम्प्रति तत्र ये मार्गाः कविप्रस्थानहेतवः।

सुकुमारो विचित्रश्च मध्यमश्चोभयात्मकः॥२४॥

तत्र तस्मिन् काव्ये मार्गाः पन्थानस्त्रयः सम्भवन्ति। न द्वौ न चत्वारः, स्वरादिसंख्यावत्तावतामेव वस्तुतस्तज्ज्ञैरुपलम्भात्। ते च कीदृशाः—कविप्रस्थानहेतवः। कवीनां प्रस्थानं प्रवर्त्तनं तस्य हेतवः, काव्यकरणस्य कारणभूताः। किमभिधानाः— सुकुमारो विचित्रश्च मध्यमश्चेति। कीदृशो मध्यमः—उभयात्मकः। उभयमनन्तरोक्तं मार्गद्वयमात्मा यस्येति विग्रहः। छायाद्वयोपजीवीत्युक्तं भवति। तेषां च स्वलक्षणावसरे स्वरूपमाख्यास्यते।

अत्र च बहुविधा विप्रतिपत्तयः सम्भवन्ति। यस्माच्चिरन्तनैर्विदर्भादिदेश-विशेषसमाश्रयणेन वैदर्भीप्रभृतयो रीतयस्तिस्रः समाम्नाताः। तासां चोत्तमाधममध्यमत्ववैचित्र्येण त्रैविध्यम्। अन्यैश्च वैदर्भगौडीयलक्षणं मार्गद्वितयमाख्यातम्। एतच्चोभयमप्ययुक्तियुक्तम्। यस्माद्देशभेदनिबन्धनत्वेरीतिभेदानां देशानामानन्त्यासद्व्यत्वं प्रसज्यते। न च विशिष्टरीतियुक्तत्वेन काव्यकरणं मातुलेयभगिनीविवाहवद् देशधर्मतया व्यवस्थापयितुं शक्यम्। देशधर्मो हि वृद्धव्यवहारपरम्परामात्रशरणः शक्यानुष्ठानतां नातिवर्तते। तथाविधकाव्यकरणं पुनः शक्त्यादिकारणकलापसाकल्यमपेक्ष्यमाणं न शक्यते तथाकथञ्चिदनुष्ठातुम्। न च दाक्षिणात्यगीतविषयसुस्वरतादिध्वनिरामणीयकवत्तस्य स्वाभाविकत्वं वक्तुं पार्यते। तस्मिन् सति तथाविधकाव्यकरणं सर्वस्य स्यात्। किञ्च शक्तौ विद्यमानायामपि व्युत्पत्त्यादिराहार्यकारणसम्पत्प्रतिनियतदेशविषयतया न व्यवतिष्ठते, नियमनिबन्धनाभावात् तत्रादर्शनाद् अन्यत्र च दर्शनात्।

न च रीतीनामुत्तमाधममध्यमत्वभेदेन त्रैविध्यं व्यवस्थापयितुं न्याय्यम्। यस्मात् सहृदयाह्लादकारिकाव्यलक्षणप्रस्तावे वैदर्भीसदृशसौदर्न्यासम्भवान्मध्यमाधमाधमयोरुपदेश-वैयर्थ्यमायाति। परिहार्यत्वेनाप्युपदेशो न युक्ततामालम्बते, तैरेवानभ्युपगतत्वात् न चागतिकगतिन्यायेन यथाशक्ति दरिद्रदानादिवत् काव्यं करणीयतामर्हति। तदेवं निर्वचनसमाख्यामात्रकरणकारणत्वे देशविशेषाश्रयणस्य वयं न विवदामहे। मार्गद्वितयवादिनामप्येतान्येव दूषणानि। तदलमनेन निःसारवस्तुपरिमलनव्यसनेन।

कविस्वभावभेदनिबन्धनत्वेन काव्यप्रस्थानभेदः समञ्जसतां गाहते। सुकुमारस्वभावस्य कवेस्तथाविधैव सहजा शक्तिः समुद्भवति, शक्तिशक्तिमतोरभेदात्। तया च तथाविधसौकुमार्यरमणीयां व्युत्पत्तिमाबध्नाति। ताभ्यां च सुकुमारवर्त्मनाभ्यासतत्परः क्रियते। तथैव चैतस्माद् विचित्रः स्वभावो यस्य कवेस्तद्विदाह्लादकारिकाव्यलक्षणकरण—

प्रस्तावात् सौकुमार्यव्यतिरेकिणा वैचित्र्येण रमणीय एव, तस्य च काचिद्विचित्रैव तदनुरूपा शक्तिः समुल्लसति। तया च तथाविधवैदग्ध्यबन्धुरां व्युत्पत्तिमाबध्नाति। ताभ्यां च वैचित्र्यवासनाधिवासितमानसो विचित्रवर्त्मनाभ्यासभाग्र भवति। एवमेतदुभयकविनिबन्धनसंवलितस्वभावस्य कवेस्तदुचितैव शबलशोभातिशयशालिनी शक्तिः समुदेति। तया च तदुभयपरिस्पन्दसुन्दरव्युत्पत्त्युपार्जनमाचरति। ततस्तच्छायाद्वितय-परिपोषपेशलाभ्यासपरवशः सम्पद्यते।

तदेवमेते कवयः सकलकाव्यकरणकलापकाष्ठाधिरूढिरमणीयं किमपि काव्यमारभन्ते, सुकुमारं विचित्रमुभयात्मकं च। त एव तत्प्रवर्तननिमित्तभूता मार्गा इत्युच्यन्ते।

यद्यपि कविस्वभावभेदनिबन्धनत्वादनन्तभेदभिन्नत्वमनिवार्यं तथापि परिसंख्यातुमशक्यत्वात् सामान्येन त्रैविध्यमेवोपपद्यते। तथा च रमणीयकाव्यपरिग्रहप्रस्तावे स्वभावसुकुमारस्तावदेको राशिः, तद्व्यतिरिक्तस्यारमणीयस्यानुपादेयत्वात्। तद्वयतिरेकी रामणीयकविशिष्टो विचित्र इत्युच्यते। तदेतयोर्द्वयोरपि रमणीयत्वादेतदीयच्छायाद्वितयोपजीविनोऽस्य रमणीयत्वमेव न्यायोपपन्नं पर्यवस्यति। तस्मादेषां प्रत्येकमस्खलितस्वपरिस्पन्दमहिम्ना तद्विदाह्लादकारित्वपरिसमाप्तेर्न कस्यचिन्न्यूनता।

ननु च शक्त्योरान्तरतम्यात् स्वाभाविकत्वं वक्तुं युज्यते, व्युत्पत्त्यभ्यासयोः पुनराहार्ययोः कथमेतद् घटते? नैव दोषः, यस्मादास्तां तावत् काव्यकरणम्, विषयान्तरेऽपि सर्वस्य कस्यचिदनादिवासनाभ्यासाधिवासितचेतसः स्वभावानुसारिणावेव व्युत्पत्त्याभ्यासौ प्रवर्तेते। तौ च स्वाभावाभिव्यञ्जनेनैव साफल्यं भजतः। स्वभावस्य तयोश्च परस्परमुपकार्योपकारकभावेनावस्थानात् स्वभावस्तावारभते, तौ च तत्परिपोषमातनुतः। तथा

चाचेतनानामपि भावः स्वभावसंवादिभावान्तरसन्निधानमाहात्म्यादभिव्यक्तिमासादयति, यथा चन्द्रकान्तमणयश्चन्द्रमसः करपरामर्शवशेन स्पन्दमानसहजरसप्रसराः सम्पद्यन्ते।

तदेवं मार्गानुद्दिश्य तानेव क्रमेण लक्षयति—

अम्लानप्रतिभोद्भिन्ननवशब्दार्थबन्धुरः।

अयत्नविहितस्वल्पमनोहारिविभूषणः॥२५॥

भावस्वभावप्राधान्यन्यक्कृताहार्यकौशलः।

रसादिपरमार्थज्ञमनःसंवादसुन्दरः॥२६॥

अविभावितसंस्थानरामणीयकरञ्जकः।

विधिवैदग्ध्यनिष्पन्ननिर्माणातिशयोपमः॥२७॥

यत् किञ्चनापि वैचित्र्यं तत्सर्वं प्रतिभोद्भवम्।

सौकुमार्यपरिस्पन्दस्यन्दि यत्र विराजते॥२८॥

सुकुमाराभिधः सोऽयं येन सत्कवयो गताः।

मार्गेणोत्फुल्लकुसुमकाननेनेव षट्पदाः॥२९॥

सुकुमाराभिधः सोऽयम्, सोऽयं पूर्वोक्तलक्षणः सुकुमारशब्दाभिधानः। येन मार्गेण सत्कवयः कालिदासप्रभृतयो गताः प्रयाताः, तदाश्रयेण काव्यानि कृतवन्तः। कथम्— उत्फुल्लकुसुमकाननेनेव षट्पदाः। उत्फुल्लानि विकसितानि कुसुमानि पुष्पाणि यस्मिन् कानने वने तेन षट्पदा इव भ्रमरा यथा। विकसितकुसुमकाननसाम्येन तस्य कुसुमसौकुमार्यसदृशमाभिजात्यं द्योत्यते। तेषां च भ्रमरसादृश्येन कुसुममकरन्द कल्पसारसंग्रहव्यसनिता। स च कीदृशः— यत्र यस्मिन् किञ्चनापि कियम्मात्रमपि वैचित्र्यं विचित्रभावो वक्रोक्तियुक्तत्वम् तत्सर्वमलङ्कारादिप्रतिभोद्भवं कविशक्तिसमुल्लसितमेव, न पुनराहार्यं यथाकथञ्चित्प्रयत्नेन निष्पाद्यम्। कीदृशम्— सौकुमार्यपरिस्पन्दस्यन्दि।

सौकुमार्यमाभिजात्यं तस्य परिस्पन्दस्तद्विदाह्लादकारित्वलक्षणं रामणीयकं तेन स्यन्दते रसमयं सम्पद्यते यत्तथोक्तम्। यत्र विराजते शोभातिशयं पुष्णातीति सम्बन्धः। यथा—

प्रवृत्ततापो दिवसोऽतिमात्रमत्यर्थमेव क्षणदा च तन्वी।

उभौ विरोधक्रियया विभिन्नौ जायापती सानुशयाविवास्ताम्॥७४॥

अत्र श्लेषच्छायाच्छुरितं कविशक्तिमात्रसमुल्लसितमलङ्करणमनाहार्यं कामपि कमनीयतां पुष्णाति। तथा च 'प्रवृत्ततापः' 'तन्वी' इति वाचकौ सुन्दरस्वभावमात्रसमर्पणपरत्वेन वर्तमानावर्थान्तरप्रतीत्यनुरोधपरत्वेन प्रवृत्तिं न समन्येते, कविव्यक्तकौशलसमुल्लसितस्य पुनः प्रकारान्तरस्य प्रतीतावानुगुण्यमात्रेण तद्विदाह्लादकारितां प्रतिपद्येते। किं तत्प्रकारान्तरं नाम? विरोधविभिन्नयोः शब्दार्थान्तरप्रतीतिकारिणोरूपनिबन्धः। तथा चोपमेययोः सहानवस्थानलक्षणो विरोधः, स्वभावभेदलक्षणं च विभिन्नत्वम्। उपमानयोः पुनरीर्ष्याकलहलक्षणो विरोधः, कोपात् पृथगवस्थानलक्षणं विभिन्नत्वम्। 'अतिमात्रम्' 'अत्यर्थं' चेति विशेषणद्वितयं पक्षद्वयेऽपि सातिशयताप्रतीतिकारित्वेनातितरां रमणीयम्। श्लेषच्छायोत्क्लेशसम्पाद्याप्ययत्नघटितत्वेनात्र मनोहरिणी।

यश्च कीदृशः—अम्लानप्रतिभोद्भिन्ननवशब्दार्थबन्धुरः। अम्लाना यासावदोषोपहता प्राक्तनाद्यतनसंस्कारपरिपाकप्रौढा प्रतिभा काचिदेव कविशक्तिः, तत उद्भिन्नो नूतनाङ्कुरन्यायेन स्वयमेव समुल्लसितो, न पुनः कदर्थनाकृष्टौ नवौ प्रत्यग्रौ तद्विदाह्लादकारित्वसामर्थ्ययुक्तौ शब्दार्थावभिधानाभिधेयौ ताभ्यां बन्धुरो हृदयहारी। अन्यच्च कीदृशः— अयत्नविहितस्वल्पमनोहारिविभूषणः। अयत्नेनाक्लेशेन विहितं कृतं यत् स्वल्पं मनाङ्मात्रं मनोहारि हृदयाह्लादकं विभूषणमलङ्करणं यत्र स तथोक्तः। 'स्वल्प'शब्दोऽत्र प्रकरणाद्यपेक्षः, न वाक्यमात्रपरः। उदाहरणं यथा—

बालेन्दुवक्राण्यविकासभावाद् बभुः पलाशान्यतिलोहितानि।

सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम्॥७५॥

अत्र 'बालेन्दुवक्राणि' 'अतिलोहितानि' 'सद्यो वसन्तेन समागतानाम्' इति पदानि सौकुमार्यात् स्वभाववर्णनामात्रपरत्वेनोपात्तान्यपि 'नखक्षतानीव' इत्यलङ्करणस्य मनोहारिणः क्लेशं विना स्वभावोद्भिन्नत्वेन योजनां भजमानानि चमत्कारितामापद्यन्ते।

यश्चान्यच्च कीदृशः—भावस्वभावप्राधान्यन्यक्कृताहार्यकौशलः। भावाः पदार्थस्तेषां स्वभावस्तत्त्वं तस्य प्राधान्यं मुख्यभावस्तेन न्यक्कृतं तिरस्कृतं व्युत्पत्तिविहितं कौशलं नैपुण्यं यत्र स तथोक्तः। तदयमभिप्रायः—पदार्थपरमार्थमहिमैव कविशक्तिसमुन्मीलितः, तथाविधो यत्र विजृम्भते। येन विविधमपि व्युत्पत्तिविलसितं काव्यान्तरगतं तिरस्कारास्पदं सम्पद्यते। अत्रोदाहरणं रघुवंशे मृगयावर्णनपरं प्रकरणम्, यथा—

तस्य स्तनप्रणयिभिर्मुहुरेणशावैर्व्याहन्यमानहरिणीगमनं पुरस्तात्।

आविर्बभूव कुशगर्भमुखं मृगाणां यूथं तदग्रसरगर्वितकृष्णसारम्॥७६॥

यथा च कुमारसम्भवे (३/३५)

द्वन्द्वानि भावं क्रियया विवव्रु॥७७॥

इतः परं प्राणिधर्मवर्णनम्, यथा

शृङ्गेण च स्पर्शनिमीलिताक्षीं

मृगीमकण्डूयत कृष्णसारः॥७८॥

अन्यच्च कीदृशः— रसादिपरमार्थज्ञमनःसंवादसुन्दरः। रसाः शृङ्गारादयः। तदादिग्रहणेन रत्यादयोऽपि गृह्यन्ते। तेषां परमार्थः परमरहस्यं तज्जानन्तीति तज्ज्ञास्तद्विदस्तेषां मनःसंवादो हृदयसंवेदनं स्वानुभवगोचरतया प्रतिभासः, तेन सुन्दरः सुकुमारः सहृदयहृदयाह्लादकारी वाक्यस्योपनिबन्ध इत्यर्थः। अत्रोदाहरणानि रघौ रावणं

निहत्य पुष्पकेणागच्छतो रामस्य सीतायास्तद्विरहविधुरहृदयेन मयास्मिन् समुद्देशे किमप्येवंविधं वैशसमनुभूतमिति वर्णयतः सर्वाण्येव वाक्यानि। यथा—

पूर्वानुभूतं स्मरता च रात्रौ कम्पोत्तरं भीरु तवोपगूढम्।

गुहाविसारीण्यतिवाहितानि मया कथञ्चिद् घनगर्णितानि॥७६॥

अत्र राशिद्वयकरणस्यामभिप्रायो यद् विभावादिरूपेण रसाङ्गभूताः शकुनिरुततरुसलिलकुसुमसमयप्रभृतयः पदार्थाः सातिशयस्वभाववर्णनप्राधान्येनैव रसाङ्गतां प्रतिपद्यन्ते। तद्व्यतिरिक्ताः सुरगन्धर्वप्रभृतयः सोत्कर्षचेतनायोगिनः शृङ्गारादिरसनिर्भरतया वर्ण्यमानाः सरसहृदयाह्लादकारितामायान्तीति कविभिरभ्युपगतम्। तथाविधमेव लक्ष्ये दृश्यते।

अन्यच्च कीदृशः— अविभावितसंस्थानरामणीयकरञ्जकः। अविभावितमनालोचितं संस्थानं संस्थितिर्यत्र तेन रमणीयकेन रमणीयत्वेन रञ्जकः सहृदयाह्लादकः। तेनायमर्थः— यदि तथाविधं कविकौशलमत्र सम्भवति तद् व्यपदेष्टुमियत्तया न कथञ्चिदपि पार्यते, केवलं सर्वातिशायितया चेतसि परिस्फुरति। यश्च कीदृशः— विधिवैदग्ध्यनिष्पन्ननिर्माणातिशयोपमः। विधिर्विधाता तस्य वैदग्ध्यं कौशलं तेन निष्पन्नः परिसमाप्तो योऽसौ निर्माणातिशयः सुन्दरः सर्गोल्लेखो रमणीयरमणीलावण्यादिः स उपमा निदर्शनं यस्य स तथोक्तः तेन विधातुरिव कवेः कौशलं यत्र विवेक्तुमशक्यम्। यथा—

ज्याबन्धनिष्पन्दभुजेन यस्य विनिःश्वसद्वक्त्रपरम्परेण।

कारागृहे निर्जितवासवेन दशाननेनोषितमा प्रसादात्॥॥८०॥

अत्र व्यपदेशप्रकारान्तरनिरपेक्षः कविशक्तिपरिणामः परं परिपाकमधिरूढः।

एतस्मिन् कुलके प्रथमश्लोके प्राधान्येन शब्दालङ्करणयोः सौन्दर्यं प्रतिपादितम्। द्वितीये वर्णनीयस्य वस्तुनः सौकुमार्यम्। तृतीये प्रकारान्तरनिरपेक्षस्य सन्निवेशस्य

सौकुमार्यम्। चतुर्थे वैचित्र्यमपि सौकुमार्याविसंवादि विधेयमित्युक्तम्। पञ्चमो विषयविषयिसौकुमार्यप्रतिपादनपरः।

एवं सुकुमारभिधानस्य मार्गस्य लक्षणं विधाय तस्यैव गुणान् लक्षयति—

असमस्तमनोहारिपदविन्यासजीवितम्।

माधुर्यं सुकुमारस्य मार्गस्य प्रथमो गुणः॥३०॥

असमस्तानि समासवर्जितानि मनोहारीणि हृदयाह्लादकानि श्रुतिरम्यत्वेनार्थरमणीयत्वेन च यानि पदानि सुप्तिङ्न्तानि तेषां विन्यासः सन्निवेशवैचित्र्यं जीवितं सर्वस्वं यस्य तत्तथोक्तं माधुर्यं नाम सुकुमारलक्षणस्य मार्गस्य प्रथमः प्रधानभूतो गुणः। असमस्तशब्दोऽत्र प्राचुर्यार्थः, न समासाभावनियमार्थः। उदाहरणं यथा—

क्रीडारसेन रहसि स्मितपूर्वमिन्दो

र्लेखां विकृष्य विनिबध्य च मूर्ध्नि गौर्या।

किं शोभिताहमनयेति शशाङ्कमौलेः

पृष्टस्य पातु परिचुम्बनमुत्तरं वः॥८१॥

अत्र पदानामसमस्तत्वं शब्दार्थरमणीयता विन्यासवैचित्र्यं च त्रितयमपि चकास्ति।

तदेवं माधुर्यमभिधाय प्रसादमभिधत्ते—

अक्लेशव्यञ्जिताकूतं झगित्यर्थसमर्पणम्।

रसवक्रोक्तिविषयं यत्प्रसादः स कथ्यते॥३१॥

झगिति प्रथमतरमेवार्थसमर्पणं वस्तुप्रतिपादनम्। कीदृशम्— अक्लेशव्यञ्जिताकूतम् अकदर्थनाप्रकटिताभिप्रायम्। किं विषयम्- रसवक्रोक्तिविषयम्। रसाः शृङ्गारादयः वक्रोक्तिः सकलालङ्कारसामान्यं विषयो गोचरो यस्य तत्तथोक्तम्। स एव प्रसादख्यो गुणो कथ्यते

भण्यते। अत्र पदानामसमस्तत्वं प्रसिद्धाभिधानत्वम् अव्यवहितसम्बन्धत्वं समाससद्भावेऽपि गमकसमासयुक्तता च परमार्थः। 'आकूत' शब्दस्तात्पर्यविच्छित्तौ च वर्तते। उदाहरणं यथा—

हिमव्यपायाद्विशदाधराणामापाण्डुरीभूतमुखच्छवीनाम्।

स्वेदोद्गमः किंपुरुषाङ्गनानां चक्रे पदं पत्रविशेषकेषु॥८२॥

अत्रासमस्तत्वादिसामग्री विद्यते। यदपि विविधपत्रविशेषकवैचित्र्यविहितं किमपि वदनसौन्दर्यं मुक्ताकणाकारस्वेदलवोपबृंहितं तदपि सुव्यक्तमेव। यथा वा—

अनेन सार्धं विहराम्बुराशेस्तीरेषु ताडीवनमर्मरेषु।

द्वीपान्तरानीतलवङ्गपुष्पैरपाकृतस्वेदलवा मरुद्भिः॥८३॥

अलङ्कारव्यक्तिर्यथा—

बालेन्दुवक्राणि इति॥८४॥

एवं प्रसादमभिधाय लावण्यं लक्षयति—

वर्णविन्यासविच्छित्तिपदसन्धानसम्पदा।

स्वल्पया बन्धसौन्दर्यं लावण्यमभिधीयते॥३२॥

बन्धो वाक्यविन्यासस्तस्य सौन्दर्यं रामणीयकं लावण्यमभिधीयते लावण्यमित्युच्यते। कीदृशम्—वर्णानामक्षराणां विन्यासो विचित्रं न्यसनं तस्य विच्छित्तिः शोभा वैदग्ध्यभङ्गी तया लक्षितं पदानां सुप्तिङ्न्तानां सन्धानं तस्य सम्पत्, सापि शोभैव, तया लक्षितम्। कीदृश्या—उभयरूपयापि स्वल्पया मनाङ्मात्रया नातिनिबन्धनिर्मितया। तदयमत्रार्थः शब्दार्थसौकुमार्यसुभगः सन्निवेशमहिमा लावण्याढयो गुणः कथ्यते। यथा—

स्नानार्द्रमुक्तेष्वनुधूपवासं विन्यस्तसायन्तनमल्लिकेषु।

कामो वसन्तात्ययमन्दवीर्यः केशेषु लेभे बलमङ्गनानाम्॥८५॥

अत्र सन्निवेशसौन्दर्यमहिमा सहृदयसंवद्यो न व्यपदेष्टुं पार्यते। यथा वा—

चकार बाणैरसुराङ्गनानां गण्डस्थलीः प्रोषितपत्रलेखाः॥८६॥

अत्रापि वर्णविन्यासविच्छित्तिः पदसन्धानसम्पच्च सन्निवेशसौन्दर्यनिबन्धन-स्फुटावभासैव।

एवं लावण्यमभिधाय आभिजात्यमभिधत्ते-

श्रुतिपेशलताशालि सुस्पर्शमिव चेतसा।

स्वभावमसृणच्छायमाभिजात्यं प्रचक्षते॥३३॥

एवंविधं वस्तु आभिजात्यं प्रचक्षते आभिजात्याभिधानं गुणं वर्णयन्ति। श्रुतिः श्रवणेन्द्रियं तत्र पेशलता रामणीयकं तेन शालते श्लाघते यत्तथोक्तम्। सुस्पर्शमिव चेतसा मनसा सुस्पर्शमिव। सुखेन स्पृश्यत इवेत्यतिशयोक्तिरियम्। यस्मादुभयमपि स्पर्शयोग्यत्वे सति सौकुमार्यात् किमपि चेतसि स्पर्शसुखमर्पयतीव। यतः स्वभावमसृणच्छायम् अनाहार्यश्लक्ष्णकान्ति यत्तद् आभिजात्यं कथयन्तीत्यर्थः। यथा—

ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी।

पुत्रप्रीत्या कुवलयदलप्रापि कर्णे करोति॥८७॥

अत्र श्रुतिपेशलतादि स्वभावमसृणच्छायत्वं किमपि सहृदयसंवेद्यं परिस्फुरति।

ननु च लावण्यमाभिजात्यं च लोकोत्तरतरुणीरूपलक्षणवस्तुधर्मतया यत् प्रसिद्धं तत् कथं काव्यस्य भवितुमर्हतीति चेत्तन्न। यस्मादनेन न्यायेन पूर्वप्रसिद्धयोरपि माधुर्यप्रसादयोः काव्यधर्मत्वं विघटते। माधुर्यं हि गुडादिमधुरद्रव्यधर्मतया प्रसिद्धं तथाविधाह्लादकारित्वसामान्योपचारात् काव्ये व्यपदिश्यते। तथैव च प्रसादः स्वच्छसलिलस्फटिकादिधर्मतया प्रसिद्धः स्फुटावमासित्वसामान्योपचारात् झगितिप्रतीतिपेशलतां प्रतिपद्यते। तद्वदेव च काव्ये कविशक्तिकौशलोल्लिखितकान्तिकमनीयं

बन्धसौन्दर्यं चेतनचमत्कारकारित्वसामान्योपचाराल्लावण्यशब्दव्यतिरेकेण शब्दान्तराभिधेयतां नोत्सहते। तथैव च काव्ये स्वभावमसृणच्छायत्वमाभिजात्यशब्देनाभिधीयते।

ननु च कैश्चित्प्रतीयमानं वस्तु ललनालावण्यसाम्याल्लावण्यमित्युत्पादितप्रतीति —

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।

यत्तत्प्रसिद्धावयवातिरिक्तमाभाति लावण्यमिवाङ्गनासु॥८८॥

तत्कथं बन्धसौन्दर्यमात्रं लावण्यमित्यभिधीयते? नैष दोषः, यस्मादनेन दृष्टान्तेन वाच्यवाचकलक्षणप्रसिद्धावयवव्यतिरिक्तत्वेनास्तित्वमात्रं साध्यते प्रतीयमानस्य, न पुनः सकललोकलोचनसंवेद्यस्य ललनालावण्यस्य। सहृदयहृदयानामेव संवेद्यं सत् प्रतीयमानं सङ्गीकर्त्तुं पार्यते।

तस्य बन्धसौन्दर्यमेवाव्युत्पन्नपदपदार्थानामपि श्रवणमात्रेणैव हृदयहारित्वस्पर्धया व्यपदिश्यते। प्रतीयमानं पुनः काव्यपरमार्थज्ञानामेवानुभवगोचरतां प्रतिपद्यते। यथा कामिनीनां किमपि सौभाग्यं तदुपभोगोचितानां नायकानामेव संवेद्यतामर्हति, लावण्यं पुनस्तासामेव सत्कविगिरामिव सौन्दर्यं सकललोकगोचरतामायातीत्युक्तमेवेत्यलमतिप्रसङ्गेन।

एवं सुकुमारस्य लक्षणमभिधाय विचित्रं लक्षयति—

प्रतिभाप्रथमोद्भेदसमये यत्र वक्रता।

शब्दाभिधेययोरन्तः स्फुरतीव विभाव्यते॥३४॥

अलङ्कारस्य कवयो यत्रालङ्करणान्तरम्।

असन्तुष्टा निबध्नन्ति हारादेर्मणिबन्धवत्॥३५॥

रत्नरश्मिच्छटोत्सेकभासुरैर्भूषणैर्यथा।

कान्ताशरीरमाच्छाद्य भूषायै परिकल्प्यते॥३६॥

यत्र तद्वदलङ्कारैर्भ्राजमानैर्निजात्मना।

स्वशोभातिशयान्तःस्थमलङ्कार्यं प्रकाश्यते॥३७॥

यदप्यनूतनोल्लेखं वस्तु यत्र तदप्यलम्।

उक्तिवैचित्र्यमात्रेण काष्ठां कामपि नीयते॥३८॥

यत्रान्यथाभवत् सर्वमन्यथैव यथारुचि।

भाव्यते प्रतिभाल्लेखमहत्त्वेन महाकवेः॥३९॥

प्रतीयमानता यत्र वाक्यार्थस्य निबध्यते।

वाच्यवाचकवृत्तिभ्यां व्यतिरिक्तस्य कस्यचित्॥४०॥

स्वभावः सरसाकूतो भावानां यत्र बध्यते।

केनापि कमनीयेन वैचित्र्येणोपबृंहितः॥४१॥

विचित्रो यत्र वक्रोक्तिवैचित्र्यं जीवितायते।

परिस्फुरति यस्यान्तः सा काप्यतिशयाभिधा॥४२॥

सोऽतिदुःसञ्चरो येन विदग्धकवयो गताः।

खड्गधारापथेनेव सुभटानां मनोरथाः॥४३॥

स विचित्राभिधानः पन्था, कीदृक्—अतिदुःसञ्चरः, यत्रातिदुःखेन सञ्चरते। किं बहुना, येन विदग्धकवयः केचिदेव व्युत्पन्नाः केवलं गताः प्रयाताः, तदाश्रयेण काव्यानि चक्रुरित्यर्थः। कथम् खड्गधारापथेनेव सुभटानां मनोरथाः। निस्त्रिंशधारामार्गेण यथा सुभटानां महावीराणां मनोरथाः सङ्कल्पविशेषाः। तदयमत्राभिप्रायः—यदसिधारामार्गगमने मनोरथानामौचित्यानुसारेण यथारुचि प्रवर्तमानानां मनाङ्मात्रमपि म्लानता न सम्भाव्यते। साक्षात्समरसम्मर्दसमाचरणे पुनः कदाचित् किमपि म्लानत्वमपि सम्भाव्येत। तदनेन मार्गस्य दुर्गमत्वं तत्प्रस्थितानां च विहरणप्रौढिः प्रतिपाद्यते।

कीदृक् स मार्गः—यत्र यस्मिन् शब्दाभिधेययोरभिधानाभिधीयमानयोरन्तः स्वरूपानुप्रवेशिनी वक्रता भणितिविच्छित्तिः स्फुरतीव प्रस्पन्दमानेव विभाव्यते। लक्ष्यते। कदा- प्रतिभाप्रथमोद्भेदसमये। प्रतिभायाः कविशक्तेरचरमोल्लेखावसरे। तदयमत्र परमार्थः —यत् कविप्रयत्ननिरपेक्षयोरेव शब्दार्थयोः स्वाभाविकः कोऽपि वक्रताप्रकारः परिस्फुरन् परिदृश्यते। यथा—

कोऽयं भाति प्रकारस्तव पवनपदं लोकपादाहतीनां

तेजस्विव्रातसेव्ये नभसि नयसि यत्पांसुपुरं प्रतिष्ठाम्।

यस्मिन्नुत्थाप्यमाने जननयनपथोपद्रवस्तावदास्तां

केनोपायेन सह्यो वपुषि कलुषतादोष एष त्वयैव॥८९॥

अत्राप्रस्तुतप्रशन्सालक्षणोऽलङ्कारः प्राधान्येन वाक्यार्थः। प्रतीयमानपदार्थान्तरत्वेन प्रयुक्तत्वात्तत्र विचित्रकविशक्तिसमुल्लिखितवक्रशब्दार्थोपनिबन्धमाहात्म्यात् प्रतीयमानमप्यभिधेयतामिव प्रापितम्। प्रक्रम एव प्रतिभासमानत्वान्न चार्थान्तरप्रतीतिकारित्वेऽपि पदानां श्लेषव्यपदेशः शक्यते कर्तुम्। वाच्यस्य समप्रधानभावेनानवस्थानात्। अर्थान्तरप्रतीतिकारित्वं च प्रतीयमानार्थस्फुटत्वावभासनार्थमुपनिबध्यमानमतीवचमत्कारकारितां प्रतिपद्यते।

तमेव विचित्रं प्रकारान्तरेण लशक्षयति— अलङ्कारस्येत्यादि। यत्र यस्मिन्मार्गे कवयो निबध्नन्ति विरचयन्ति, अलङ्कारस्य विभूषणस्यालङ्कणान्तरं विभूषणान्तरम् असन्तुष्टाः सन्तः। कथम्—हारादेर्मणिबन्धवत्। मुक्ताकलापप्रभृतेर्यथा पदकादिमणिबन्धं रत्नविशेषविन्यासं वैकटिकाः। यथा—

हे हेलाजितबोधिसत्त्ववचसां कि विस्तरैस्तोयधे

नास्ति त्वासदृशः परः परहिताधाने गृहीतव्रतः।

तृष्यत्पान्थजनोपकारघटनावैमुख्यलब्धायशो

भारप्रोद्वहने करोषि कृपया साहायकं यन्मरोः॥९०॥

अत्रात्यन्तगर्हणीयचरितं पदार्थान्तरं प्रतीयमानतया चेतसि निधाय तथाविधविलसितः सलिलनिधिर्वाच्यतयोपक्रान्तः। तदेतावदेवालङ्कृतेरप्रस्तुतप्रशंसायाः स्वरूपम्— गर्हणीयप्रतीयमानपदार्थान्तरपर्यवसानमपि वाक्यं वस्तुन्युपक्रमरमणीयतयो-पनिबध्यमानं तद्विदाह्लादकारितामायाति। तदेतद् व्याजस्तुतिप्रतिरूपकप्रायमलङ्करणा-न्तरमप्रस्तुतप्रशंसाया भूषणत्वेनोपात्तम्। न चात्र सङ्करालङ्कारव्यवहारो भवितुमर्हति, पृथगतिपरिस्फुटत्वेनावभासनात्। न चापि संसृष्टिसम्भवः समप्रधानभावेनानवस्थितेः। न च द्वयोरपि वाच्यालङ्कारत्वम्, विभिन्नविषयत्वात्। यथा वा—

नामाप्यन्यतरोर्निमीलितमभूत्तत्तावदुन्मीलितं

प्रस्थाने स्खलतः स्ववर्त्मनि विधेरन्यद् गृहीतः करः।

लोकश्चायमदृष्टदर्शनकृताद् दृग्वैशसादुद्धृतो

युक्तं काष्ठिक लूनवान् यदसि तामाम्रालिमाकालिकीम्॥९१॥

अत्रायमेव न्यायोऽनुसन्धेयः। यथा च—

किं तारुण्यतरोरियं रसभरोद्भिन्ना नवा वल्लरी

लीलाप्रोच्छलितस्य किं लहरिका लावण्यवारांन्निधेः॥

उद्गाढोत्कलिकावतां स्वसमयोपन्यासविश्रम्भिणः

किं साक्षादुपदेशयष्टिरथवा देवस्य शृङ्गारिणः॥९२॥

अत्र रूपकलक्षणो योऽयं वाक्यालङ्कारः तस्य सन्देहोक्तिरियं छायान्तरातिशयोत्पादनायोपनिबद्धा चेतनचमत्कारितामावहति। शिष्टं पूर्वोदाहरणद्वयोक्तमनुसर्तव्यम्।

अन्यच्च कीदृक् —रत्नेत्यादि। युगलकम्। यत्र यस्मिन्नलङ्कारैर्भ्राजमानैर्निजात्मना स्वजीवितेन भासमानैर्भूषायै परिकल्प्यते शोभायै भूष्यते। कथम्— यथा भूषणैः, कङ्कणादिभिः। कीदृशैः— रत्नरश्मिच्छटोत्सेकभासुरैः मणिमयूखोल्लासभ्राजिष्णुभिः। किं कृत्वा—कान्ताशरीरमाच्छाद्य कामिनीवपुः स्वप्रभाप्रसरतिराहितं विधाय। भूषायै कल्प्यते तद्वदेवालङ्करणैरुपमादिभिर्यत्र कल्प्यते। एतच्चैतेषां भूषायै कल्पनम् —यदेतैः स्वशोभातिशयान्तःस्थं निजकान्तिकमनीयान्तर्गतमलङ्कार्यमलङ्करणीयं प्रकाश्यते द्योत्यते। तदिदमत्र तात्पर्यम्—तदलङ्कारमहिमैव तथाविधोऽत्र भ्राजते, तस्यात्यन्तोद्रिक्तवृत्तेः स्वशोभातिशयान्तर्गतमलङ्कार्यं प्रकाश्यते। यथा—

आर्यस्याजिमहोत्सवव्यतिकरे नासम्भ्रक्तोऽत्र वः

कश्चित् क्वाप्यवशिष्यते त्यजत रे नक्तञ्चराः संभ्रमम्।

भूयिष्ठेष्वपि का भवत्सु गणनात्यर्थं किमुत्ताम्यते

तस्योदारभुजोष्मणोऽनवसिता नाचारसम्पत्तयः॥९३॥

अत्राजेर्महोत्सवव्यतिकरत्वेन तथाविधं रूपणं विहितं यत्रालङ्कार्यम् ''आर्यः स्वशौर्येण युष्मान् सर्वानेव मारयति'' इत्यलङ्कारशोभातिशयान्तर्गतत्वेन भ्राजते। तथा च कश्चित सामान्योऽपि क्वापि दवीयस्यपि देशे नासंविभक्तो युष्माकमवशिष्यते। तस्मात् समरमहोत्सवसंविभागलम्पटतया प्रत्येकं यूयं सम्भ्रमं त्यजत्। गणनया वयं भूयिष्ठा इत्यशक्त्यानुष्ठानतां यदि मन्यध्वे तदाह— युक्तम्। यस्मादसंख्यसंविभागाशक्यता

कदाचिदसम्पत्त्या कार्पण्येन वा सम्भाव्यते। तदेतदुभयमपि नास्तीत्युक्तम्—तस्योदारभुजोष्मणोऽनवसिता नाचारसम्पत्तयः (इति) यथा च-

कतमः प्रविजृम्भितविरहव्यथः शून्यतां नीतो देशः॥९४॥

कानि च पुण्यभाञ्जि भजन्त्यभिख्यामक्षराणि॥९५॥ इति।

अत्र कस्मादागताः स्थ, किं चास्य नाम इत्यलङ्कार्यमप्रस्तुतप्रशंसालक्षणालङ्कारच्छायाच्छुरितत्वेनैतदीयशोभान्तर्गतत्वेन सहृदयहृदयाह्लादकारितां प्रापितम्। एतच्च व्याजस्तुतिपर्यायोक्तप्रभृतीनां भूयसा विभाव्यते।

ननु च रूपकादीनां स्वलक्षणावसर एव स्वरूपं निर्णेष्यते तत् किं प्रयोजनमेतेषामिहोदाहरणस्य? सत्यमेतत्, किन्त्वेतदेव विचित्रस्य वैचित्र्यं नाम यदलौकिकच्छायातिशययोगित्वेन भूषणोपनिबन्धः कामपि वाक्यवक्रतामुन्मीलयति।

विचित्रमेव रूपान्तरेण लक्षयति— यदपीत्यादि। यदपि वस्तु वाच्यमनूतनोल्लेखमनभिनवत्वेनोल्लिखितं तदपि तत्र यस्मिन्नलं कामपि काष्ठां नीयते लोकोत्तरातिशयकोटिमधिरोप्यते।। कथम् – उक्तिवैचित्र्यमात्रेण, भणितिवैदग्ध्येनैवेत्यर्थः। यथा—

अण्ण— लडहत्तणअं अण्णं च्चिअ काइ वत्तणच्छाआ।

सामा सामण्णपआवइणो रेह च्चिअ ण होई॥९६॥

(अन्यद् लटभत्वमन्यैव च कापि वर्तनच्छाया।

श्यामा सामान्यप्रजापते रेखैव च न भवति)॥

यथा वा—

उद्देशोऽयं सरसकदलीश्रेणिशोभातिशायी

कुञ्जोत्कर्षाङ्कुरितहरिणीविभ्रमो नर्मदायाः।

किं चैतस्मिन् सुरतसुहृदस्तन्वि ते वान्ति वाता

येषामग्रे सरति कलिताकाण्डकोपो मनोभूः॥९७॥

भणितिवैचित्र्यमात्रमेवात्र काव्यार्थः। न तु नूतनोल्लेखशालिवाच्यविजृम्भितम्। एतच्च भणितिवैचित्र्यं सहस्रप्रकारं सम्भवतीति स्वयमेवोत्प्रेक्षणीयम्।

पुनर्विचित्रमेव प्रकारान्तरेण लक्षयति—यत्रान्यथेत्यादि। यत्र यस्मिन्नन्यथाभवदन्येन प्रकारेण सत् सर्वमेव पदार्थजातम्-अन्यथैव प्रकारान्तरेणैव भाव्यते। कथम्— यथारुचि। स्वप्रतिभासानुरूपेणोत्पद्यते। केन—प्रतिभोल्लेखमहत्त्वेन महाकवेः, प्रतिभासोन्मेषातिशयत्वेन सत्कवेः। यत्किल वर्ण्यमानस्य वस्तुनः प्रस्तावसमुचितं किमपि सहृदयहृदयहारि रूपान्तरं निर्मिमीते कविः। यथा—

तापः स्वात्मनि संश्रितद्रुमलताशोषोऽध्वगैर्वर्जनं

सख्यं दुःशमया तृषा तव मरो कोऽसावनर्थो न यः।

एकोऽर्थस्तु महानयं जललवस्वाभ्यस्मयोद्दर्जिनः

सन्नह्यन्ति न यत्तवोपकृतये धाराधराः प्राकृताः॥९८॥

यथा वा—

विशति यदि नो कञ्चित्कालं किलाम्बुनिधिं विधेः

कृतिषु सकलास्वेको लोके प्रकाशकतां गतः।

कथमितरथा धाम्नां धाता तमांसि निशाकरं

स्फुरदिदमियत्ताराचक्रं प्रकाशयति स्फुटम्॥९९॥

अत्र जगद्गर्हितस्यापि मरोः कविप्रतिभोल्लिखितेन लोकोत्तरौदार्यधुराधिरोपणेन तादृक् स्वरूपान्तरमुन्मीलितं यत्प्रतीयमानत्वेनोदारचरितस्य कस्यापि सत्स्वप्युचितपरिस्पन्दसुन्दरेषु पदार्थसहस्रेषु तदेव व्यदेशपात्रमर्हतीति तात्पर्यम्।

अवयवार्थस्तु— दुःशमयेति। 'तृड्'विशेषणेन प्रतीयमानस्य त्रैलोक्यराज्येनाप्यपरितोषः पर्यवस्यति। अध्वगैर्वर्जनमित्यौदार्येऽपि तस्य समुचितसंविभागासम्भवादर्थिभिर्लज्जमानैरपि स्वयमेवानभिसरणं प्रतीयते। संश्रितद्रुमलताशोष इति तदाश्रितानां तथाविधेऽपि सङ्कटे तदेकनिष्ठताप्रतिपत्तिः। तस्य च पूर्वोक्तस्वपरिकरपरितोषाक्षमतया तापः स्वात्मनि न भोगलवलौल्येनेति प्रतिपद्यते। उत्तरार्धेन—तादृशे दुर्विलसितेऽपि परोपकारविषयत्वेन श्लाघास्पदत्वमुन्मीलितम्।

अपरत्रापि विधिविहितसमुचितसमयसम्भवं सलिलनिधिभज्जनं निजोदयन्यक्कृतनिखिलस्वपरपक्षः प्रजापतिप्रणीतसकलपदार्थप्रकाशनव्रताभ्युपगमनिर्वहणाय विवस्वान् स्वयमेव समाचरतीत्यन्यथा कदाचिदपि शशाङ्कतमस्तारादीनामभिव्यक्तिर्मनागपि न सम्भवतीति कविना नूतनत्वेन यदुल्लिखितं तदतीवप्रतीयमानमहत्त्वव्यक्तिपरत्वेन चमत्कारकारितामापद्यते।

विचित्रमेव प्रकारान्तरेणोन्मीलयति— प्रतीयमानतेत्यादि। यत्र यस्मिन् प्रतीयमानता गम्यमानता काव्यार्थस्य मुख्यतया विवक्षितस्य वस्तुनः कस्यचिदनाख्येयस्य निबध्यते। कया युक्त्या—वाच्यवाचकवृत्तिभ्यां शब्दार्थशक्तिभ्याम्। व्यतिरिक्तस्य तदतिरिक्तवृत्तेरन्यस्य व्यङ्ग्यभूतस्याभिव्यक्तिः क्रियते। 'वृत्ति'-शब्दोऽत्र शब्दार्थयोस्तत्प्रकाशनसामर्थ्यमभिधत्ते। एष च 'प्रतीयमान' व्यवहारो वाक्यवक्रताव्याख्यानावसरे सुतरां समुन्मील्यते। अनन्तरोक्तमुदाहरणद्वयमत्र योजनीयम्। यथा वा—

वक्त्रेन्दोर्न हरन्ति बाष्पपयसां धारा मनोज्ञां श्रियं
निश्वासा न कदर्थयन्ति मधुरां बिम्बाधरस्य द्युतिम्।
तस्यास्त्वद्विरहे विपक्वलबलीलावण्यसंवादिनी
च्छाया कापि कपोलयोरनुदिनं तन्व्याः परं पुष्यति॥१००॥

अत्र त्वद्विरहवैधुर्यसंवरणकदर्थनामनुभवन्त्यास्तथाविधे महति गुरूसङ्कटे वर्तमानायाः— किं बहुना वाष्पनिश्वासमोक्षावसरोऽपि न सम्भवति। केवलं परिणतलवलीलावण्यसंवादसुभगा कापि कपोलयोः कान्तिरशक्यसंवरणा प्रतिदिनं परं परिपोषमासादयतीति वाच्यव्यतिरिक्तवृत्ति दूत्युक्तितात्पर्यं प्रतीयते। उक्त—प्रकारकान्तिमत्त्वकथनं च कान्तकौतुकोत्कलिकाकारणतां प्रतिपद्यते।

विचित्रमेव रूपान्तरेण प्रतिपादयति—स्वभाव इत्यादि। यत्र यस्मिन् भावानां स्वभावः स्वपरिस्पन्दः सरसाकूतो रसनिर्भराभिप्रायः पदार्थानां निबध्यते। कीदृशः— केनापि कमनीयेन वैचित्र्येणोपबृंहितः, लोकोत्तरेण हृदयहारिणा वैदग्ध्येनोत्तेजितः। 'भाव'शब्देनात्र सर्वपदार्थोऽभिधीयते, न रत्यादिरेव। उदाहरणम् —

क्रीडासु बालकुमुमायुधसङ्गताया

यत्तत् स्मितं न खलु तत् स्मितमात्रमेव।

आलोक्यते स्मितपटान्तरितं मृगाक्ष्या-

स्तस्याः परिस्फुरदिवापरमेव किञ्चित्॥१०१॥

अत्र न खलु तत् स्मितमात्रमेवेति प्रथमार्धेऽभिलाषसुभगं सरसाभिप्रायत्वमुक्तम्। अपरार्धे तु— हसितांशुकतिरोहितमन्यदेव किमपि परिस्फुरदवलोक्यत इति कमनीयवैचित्र्यविच्छित्तिः।

इदानीं विचित्रमेवोपसंहरति—विचित्रो यत्रेत्यादि। एवंविधो विचित्रो मार्गो यत्र यस्मिन् वक्रोक्तिवैचित्र्यम् अलङ्कारविचित्रभावो जीवितायते जीवितवदाचरति। वैचित्र्यादेव विचित्रे 'विचित्र'— शब्दः प्रवर्तते। तस्मात्तदेव तस्य जीवितम्। किं तद्वैचित्र्यं नानेत्याह—परिस्फुरति यस्यान्तः सा काप्यतिशयाभिधा। यस्यान्तः स्वरूपानुप्रवेशेन सा काप्यलौकिकातिशयोक्तिः परिस्फुरति भ्राजते। यथा—

यत्सेनारजसामुदञ्चति चये द्वाभ्यां दवीयोऽन्तरान्

पाणिभ्यां युगपद्विलोचनपुटानष्टाक्षमो रक्षितुम्।

एकैकं दलमुन्नमय्य गमयन् वासाम्बुजं कोशतां

धाता संवरणाकुलश्चिरमभूत् स्वाध्यायबद्धाननः॥१०२॥

एवं वैचित्र्यं सम्भावनानुमानप्रवृत्तायाः प्रतीयमानत्वमुत्प्रेक्षायाः। तच्च धाराधिरोहणरमणीयतयातिशयोक्तिपरिस्पन्दि सन्दृश्यते।

तदेवं वैचित्र्यं व्याख्याया तस्यैव गुणान् व्याचष्टे—

वैदग्ध्यस्यन्दि माधुर्यं पदानामत्र बध्यते।

याति यत्यक्तशैथिल्यं बन्धबन्धुरताङ्गताम्॥४४॥

अत्रास्मिन् माधुर्यं वैदग्ध्यस्यन्दिवैचित्र्यसमर्पकं पदानां बध्यते वाक्यैकदेशानां निवेश्यते। यत्यक्तशैथिल्यमुज्झितकोमलभावं भवद्बन्धबन्धुरताङ्गतां याति सन्निवेशसौन्दर्योपकरणतां गच्छति। यथा—

‘किं तारूण्यतरोः’ इत्यत्र पूर्वार्धः॥१०३॥

एवं माधुर्यमभिधाय प्रसादमभिधत्ते—

असमस्तपदन्यासः प्रसिद्धः कविवर्त्मनि।

किञ्चिदोजः स्पृशन् प्रायः प्रसादोऽप्यत्र दृश्यते॥४५॥

असमस्तानां समासरहितानां पदानां न्यासो निबन्धः कविवर्त्मनि विपश्चिन्मार्गे यः प्रसिद्धः प्रख्यातः सोऽप्यस्मिन् विचित्राख्ये प्रसादाभिधानो गुणः किञ्चित् कियन्मात्रमोजः स्पृशन्नुत्तानतया व्यवस्थितः प्रायो दृश्यते प्राचुर्येण लक्ष्यते। बन्धसौग्दर्यनिबन्धनत्वात्। तथाविधस्यौजसः समासवती वृत्तिः- ‘ओजः’—शब्देन चिरन्तनैरुच्यते। तदयमत्र परमार्थः— पूर्वस्मिन् प्रसादलक्षणे सत्योजःसंस्पर्शमात्रमिहाविधीयते। यथा—

अपाङ्गततारकाः स्तिमितपक्ष्मपालीभृतः

स्फुरत्सुभगकान्तयः स्मितसमुद्गतिद्योतिताः।

विलासभरमन्थरास्तरलकल्पितैकभ्रुवो

जयन्ति रमणेऽर्पिताः समदसुन्दरीदृष्टयः॥१०८॥

प्रसादमेव प्रकारान्तरेण प्रकटयति—

गमकानि निबध्यन्ते वाक्ये वाक्यान्तराण्यपि।

पदानीवात्र कोऽप्येष प्रसादस्यापरः क्रमः॥४६॥

अत्रास्मिन् विचित्रे यद्वाक्यं पदसमुदायस्तस्मिन् गमकानि समर्पकाण्यन्यानि वाक्यान्तराणि निबध्यन्ते निवेश्यन्ते। कथम्—पदानीव पदवत्, परस्परान्वितानीत्यर्थः। एष कोऽप्यपूर्वः प्रसादस्यापरः क्रमः बन्धच्छायाप्रकारः। यथा—

नामाप्यन्तरोः इति॥१०५॥

प्रसादमभिधाय लावण्यं लक्षयति—

अत्रालुप्तविसर्गान्तैः पदैः प्रोतैः परस्परम्।

ह्रस्वैः संयोगपूर्वैश्च लावण्यमतिरिच्यते॥४७॥

अत्रास्मिन्नेवंविधैः पदैर्लावण्यमतिरिच्यते परिपोषं प्राप्नोति। कीदृशैः—परस्परमन्योन्यं प्रोतैः संश्लेषं नीतैः। अन्यच्च कीदृशैः— अलुप्तविसर्गान्तैः, अलुप्तविसर्गाः श्रूयमाणविसर्जनीया अन्ता येषां तानि तथोक्तानि तैः। ह्रस्वैश्च लघुभिः। संयोगेभ्यः पूर्वैः। अतिरिच्यते इति सम्बन्धः। तदिदमत्र तात्पर्यम्— पूर्वोक्तलक्षणं लावण्यं विद्यमानमनेनातिरिक्ततां नीयते। यथा—

श्वासोत्कम्पतरङ्गिणि स्तनतटे धौताञ्जनश्यामलाः

कीर्यन्ते कणशः कृशाङ्गि किममी बाष्पाम्भसां बिन्दवः।

किञ्चाकुञ्चितकण्ठरोधकुटिलाः कर्णामृतस्यन्दिनो

हुङ्काराः कलपञ्चमप्रणयिनस्त्रुट्यन्ति निर्यान्ति च॥१०६॥

यथा वा—

एतन्मन्दविपक्वतिन्दुकफलश्यामोदरापाण्डुर-

प्रान्तं हन्त पुलिन्दसुन्दरकरस्पर्शक्षमं लक्ष्यते।

तत् पल्लीपतिपुत्रि कुञ्जरकुलं कुम्भाभयाभ्यर्थना-

दीनं त्वामनुनाथते कुचयुगं पत्रांशुकैर्मा पिधाः॥१०७॥

यथा वा-

'हंसानां निनदेषु' इति॥१०८॥

एवं लावण्यमभिधायाभिजात्यमभिधीयते-

यन्नातिकोमलच्छायं नातिकाठिन्यमुद्वहत्।

आभिजात्यं मनोहारि तदत्र प्रौढिनिर्मितम्॥४८॥

अत्रास्मिन् तदाभिजात्यं यन्नातिकोमलच्छायं नात्यन्तमसृणकान्ति नातिकाठिन्यमुद्वहन्नातिकठोरतां धारयन् प्रौढिनिर्मितं सफलकविकौशलसम्पादितं सन्मनोहारि हृदयरञ्जकं भवतीत्यर्थः। यथा—

अधिकरतलतल्पं कल्पितस्वापलीला-

परिमलननिमीलत्पाण्डिमा गण्डपाली।

सुतनु कथय कस्य व्यञ्जयत्यञ्जसैव

स्मरनरपतिकेलीयौवराज्याभिषेकम्॥१०९॥

एवं सुकुमारविहितानामेव गुणानां विचित्रे कश्चिदतिशयः सम्पाद्यत इति बोद्धव्यम्।

आभिजात्यप्रभृतयः पूर्वमार्गोदिता गुणाः।

अत्रातिशयमायान्ति जनिताहार्यसम्पदः॥११०॥

इत्यन्तरश्लोकः।

एवं विचित्रमभिधाय मध्यममुपक्रमते-

वैचित्र्यं सौकुमार्यं च यत्र सङ्कीर्णतां गते।

भ्राजेते सहजाहार्यशोभातिशयशालिनी॥४९॥

माधुर्यादिगुणग्रामो वृत्तिमाश्रित्य मध्यमाम्।

यत्र कामपि पुष्णाति बन्धच्छायातिरिक्तताम्॥५०॥

मार्गोऽसो मध्यमो नाम नानारुचिमनोहरः।

स्पर्धया यत्र वर्तन्ते मार्गद्वितयसम्पदः॥५१॥

अत्रारोचकिनः केचिच्छायावैचित्र्यरञ्जके।

विदग्धनेपथ्यविधौ भुजङ्गा इव सादराः॥५२॥

मार्गोऽसौ मध्यमो नाम मध्यमाभिधानोऽसौ पन्थाः। कीदृशः— नानाविधा रुचयः प्रतीभासा येषां ते तथोक्तास्तेषां सुकुमारविचित्रमध्यमव्यसनिनां सर्वेषामेव मनोहरो हृदयहारी। यस्मिन् स्पर्धया मार्गद्वितयसम्पदः सुकुमारविचित्रशोभाः साम्येन वर्तन्ते, व्यवतिष्ठन्ते, न न्यूनातिरिक्तत्वेन। यत्र वैचित्र्यं विचित्रत्वं सौकुमार्यं सुकुमारत्वं सङ्कीर्णतां गते तस्मिन् मिश्रतां प्राप्ते सती भ्राजेते शोभेते। कीदृशे — सहजाहार्यशोभातिशयशालिनी, शक्तिव्युत्पत्तिसम्भवो यः शोभातिशयः कान्त्युत्कर्षस्तेन शालेते श्लाघेते ये ते तथोक्ते।

माधुर्येत्यादि। यत्र च माधुर्यादिगुणग्रामो माधुर्यप्रभृतिगुणसमूहो मध्यमामुभयच्छायाच्छुरितां वृत्तिं स्वस्पन्दगतिमाश्रित्य कामप्यपूर्वां बन्धच्छायातिरिक्ततां सन्निवेशकान्त्याधिकतां पुष्णाति पुष्यतीत्यर्थः।

तत्र गुणानामुदाहरणानि। तत्र माधुर्यस्य यथा—

बेलानिलैर्मृदुभिराकुलितालकान्ता

गायन्ति यस्य चरितान्यपरान्तकान्ताः।

लीलानताः समवलम्ब्य लतास्तरूणां

हिन्तालमालिषु तटेषु महार्णवस्य॥१११॥

प्रसादस्य यथा —

'तद्वक्त्रेन्दुविलोकनेन' इत्यादि॥११२॥

लावण्यस्य यथा—

संक्रान्ताङ्गुलिपर्वसूचितकरस्वापा कपोलस्थली

नेत्रे निर्भरमुक्तबाष्पकलुषे निश्वासतान्तोऽधरः।

बद्धोद्भेदविसंष्ठुलालकलता निर्वेदशून्यं मनः

कष्टं दुर्नयवेदिभिः कुसचिवैर्वत्सा दृढं खेद्यते॥११३॥

आभिजात्यस्य यथा-

आलम्ब्य लम्बाः सरसाग्रवल्लीः पिबन्ति यस्य स्तनभारनम्राः।

स्रोतश्च्युतं शीकरकूणिताक्ष्यो मन्दाकिनीनिर्झरमश्वमुख्यः॥११४॥

एवं मध्यमं व्याख्याय तमेवोपसंहरति—अत्रेति। अत्रैतस्मिन् केचित् कतिपये सादरास्तदाश्रयेण काव्यानि कुर्वन्ति। यस्मात् अरोचकिनः कमनीयवस्तुव्यसनिनः। कीदृशे

चास्मिन्—छायावैचित्र्यरञ्जके कान्तिविचित्रभावाह्लादके। कथम्—विदग्धनेपथ्यविधौ भुजङ्गा इव, अग्राम्याकल्प। ने नागरा यथा। सोऽपि छायावैचित्र्यरञ्जक एव।

अत्र गुणोदाहरणानि परिमितत्वात्प्रदर्शितानि, प्रतिपदं पुनश्छायावैचित्र्यं सहृदयैः स्वयमेवानुसर्तव्यम्। अनुसरणदिक्प्रदर्शनं पुनः क्रियते। यथा—मातृगुप्त-मायुराज-मञ्जीरप्रभृतीनां सौकुमार्यवैचित्र्यसंवलितपरिस्पन्दस्यन्दीनि काव्यानि सम्भवन्ति। तत्र मध्यममार्गसंवलितं स्वरूपं विचारणीयम्। एवं सहजसौकुमार्यसुभगानि कालिदाससर्वसेनादीनां काव्यानि दृश्यन्ते। अत्र सुकुमारमार्गस्वरूपं चर्चनीयम्। तथैव च विचित्रवक्रत्वविजृम्भितं हर्षचरिते प्राचुर्येण भट्टबाणस्य विभाव्यते, भवभूतिराजशेखरविरचितेषु बन्धसौन्दर्यसुभगेषु मुक्तकेषु परिदृश्यते। तस्मात् सहृदयैः सर्वत्र सर्वमनुसर्तव्यम्। एवं मार्गत्रितयलक्षणं दिङ्मात्रमेव प्रदर्शितम्। न पुनः साकल्येन सत्कविकौशलप्रकाराणां केनचिदपि स्वरूपमभिधातुं पार्यते। मार्गेषु गुणानां समुदायधर्मता। यथा न केवलं शब्दादिधर्मत्वं तथा तल्लक्षणव्याख्यानावसर एव प्रतिपादितम्।

एवं प्रत्येकं प्रतिनियतगुणग्रामरमणीयं मार्गत्रितयं व्याख्याय साधारणगुणस्वरूपव्याख्यानार्थमाह—

आञ्जसेन स्वभावस्य महत्त्वं येन पोष्यते।

प्रकारेण तदौचित्यमुचिताख्यानजीवितम्॥५३॥

तदौचित्यं नाम गुणः। कीदृक्—आञ्जसेन सुस्पष्टेन स्वभावस्य पदार्थस्य महत्त्वमुत्कर्षो येन पोष्यते परिपोषं प्राप्यते। प्रकारेणेति प्रस्तुतत्वादभिधावैचित्र्यमत्र, ‘प्रकार’— शब्देनोच्यते। कीदृशम्— उचिताख्यानमुदाराभिधानं जीवितं परमार्थो यस्य तत्तथोक्तम्। एतदानुगुण्येनैव बिभूषणविन्यासो विच्छित्तिमावहति। यथा—

करतलकलिताक्षमालयोः समुदितसाध्वससन्नहरतयोः।

कृतरुचिरजटनिवेशयोपर इवेश्वरयोः समागमः॥११५॥

यथा वा—

उपगिरि पुरुहूतस्यैष सेनानिवेश-

स्तटमपरमितोऽद्रेस्त्वद्बलान्यावसन्तु।

ध्रुवमिह करिणस्ते दुर्धराः सन्निकर्षे

सुरगजमदलेखासौरभं न क्षमन्ते॥११६॥

यथा च—

हे नागराज बहुधास्य नितम्बभागं

भोगेन गाढमभिवेष्ट्य मन्दराद्रेः

सोढाविषह्यवृषवाहनयोलीला-

पर्यङ्कबन्धनविधेस्तव कोऽतिभारः॥१२६॥

अत्र पूर्वत्रोदाररणयोर्भूषणगुणेनैव तद्गुणपरितोषः, इतरत्र च स्वभावौदार्याभिधानेन।

औचित्यस्यैव छायान्तरेण स्वरूपमुन्मीलयति—

यत्र वक्तुः प्रमातुर्वा वाच्यं शोभातिशायिना।

आच्छाद्यते स्वभावेन तदप्यौचित्यमुच्यते॥५४॥

यत्र यस्मिन् वक्तुरभिधातुः प्रमातुर्वा श्रोतुर्वा स्वभावेन स्वपरिस्पन्देन वाच्यमभिधेयं वस्तु शोभातिशायिना रामणीयमनोहरेण आच्छाद्यते संव्रियते तदप्यौचित्यमेवोच्यते। यथा—

शरीरमात्रेण नरेन्द्र तिष्ठन्नाभासि तीर्थप्रतिपादितर्द्धिः।

आरण्यकोपात्तफलप्रसूतिः स्तम्बेन नीवार इवावशिष्टः॥११८॥

अत्र श्लाघ्यतया तथाविधमहाराजपरिस्पन्दे वर्ण्यमाने मुनिना स्वानुभवसिद्धव्यवहारानुसारेणालङ्करणयोजनमौचित्यपरिपोषमावहति। अत्र वक्तुः स्वभावेन च, वाच्यपरिस्पन्दः संवृत्तप्रायो लक्ष्यते। प्रमातुर्यथा—

निपीयमानस्तबका शिलीमुखैरशोकयष्टिश्चलबालपल्लवा।

विडम्बयन्ती ददृशे वधूजनैरमन्ददष्टौष्ठकरावधूननम्॥११९॥

अत्र वधूजनैर्निजानुभववासनानुसारेण तथाविधशोभाभिरामतानुभूतिरौचित्यपरि-पोषमावहति। यथा वा—

वापीतडे कुडुंगा पिअसहि ह्नाउं गएहिं दीसन्ति।

ण धरंति करेण भणंति ण त्ति वलिउं पुण ण देंति॥१२०॥

(वापीतटे कुरङ्गा प्रियसखि स्नातुं गतैदृश्यन्ते।

न धरन्ति करेण भणन्ति नेति वलितुं पुनर्न ददति॥)

अत्र कस्याश्चित्प्रमातृभूतायाः सातिशयमौग्ध्यपरिस्पन्दसुन्दरेण स्वभावेन वाच्यमाच्छादितमौचित्यपरिपोषमावहति।

एवमौचित्यमभिधाय सौभाग्यमभिधत्ते—

इत्युपादेयवर्गेऽस्मिन् यदर्थं प्रतिभा कवेः।

सम्यक् संरभते तस्य गुणः सौभाग्यमुच्यते॥५५॥

इत्येवंविधेऽस्मिन्नुपादेयवर्गे शब्दाद्युपेयसमूहे यदर्थं यन्निमित्तं कवेः सम्बन्धिनी प्रतिभाशक्तिः सम्यक् सावधानतया संरभते व्यवस्यति तस्य वस्तुनः प्रस्तुतत्वात् काव्याभिधानस्य यो गुणः स सौभाग्यमित्युच्यते भण्यते॥

तच्च न प्रतिभासंरम्भमात्रसाध्यम्, किन्तु तद्विहितसमस्तसामग्रीसम्पाद्यमित्याह—

सर्वसम्पत्परिस्पन्दसम्पाद्यं सरसात्मनाम्।

अलौकिकचमत्कारकारि काव्यैकजीवितम्॥५६॥

सर्वसम्पत्परिस्पन्दसम्पाद्यं सर्वस्योपादेयराशेर्या सम्पत्तिरनवद्यताकाष्ठा तस्याः परिस्पन्दः स्फुरितत्वं तेन सम्पाद्यं निष्पादनीयम्। अन्यच्च कीदृशम्— सरसात्मनामार्द्रचेतसामलौकिकचमत्कारकारि लोकोत्तराह्लादविधायि। किं बहुना, तच्च काव्यैकजीवितं काव्यस्य परः परमार्थः इत्यर्थः। यथा—

दोर्मूलावधिसूत्रितस्तनमुरः स्निह्यत्कटाक्षे दृशौ

किञ्चित्ताण्डवपण्डिते स्मितसुधासिक्तोक्तिषु भ्रूलते।

चेतः कन्दलितं स्मारव्यतिकरैर्लावण्यमङ्गैर्वृतं

तन्वङ्ग्यास्तरुणिम्नि सर्पति शनैरन्येव काचिल्लिपिः॥१२१॥

तन्व्याः प्रथमतरतारूण्येऽवतीर्णे, आकारस्य चेतसश्चेष्टायाश्च वैचित्र्यमत्र वर्णितम्। तत्र सूत्रितस्तनमुरो लावण्यमङ्गैर्वृतमित्याकारस्य, स्मरव्यतिकरैः कन्दलितमिति चेतसः, स्निह्यत्कटाक्षे दृशाविति किञ्चित्ताण्डवपण्डिते स्मितसुधासिक्तोषु भ्रूलते इति चेष्टायाश्च। सूत्रित-सिक्त-ताण्डव-पण्डित-कन्दलितानामुपचारवक्रत्वं लक्ष्यते, स्निह्यदित्येतस्य कालविशेषावेदकः प्रत्ययवक्रभावः, अन्यैव काचिदवर्णनीयेति संवृतिवक्रताविच्छत्तिः, अङ्गैर्वृतमिति कारकवक्रत्वम्। विचित्तमार्गविषयो लावण्यगुणातिरेकः। तदेवमेतस्मिन् प्रतिभासंरम्भजनितसकलसामग्रीसमुन्मीलितं सरसहृदयाह्लादकारि किमपि सौभाग्यं समुद्भासते।

अनन्तरोक्तस्य गुणद्वयस्य विषयं प्रदर्शयति—

एतत्त्रिष्वपि मार्गेषु गुणद्वितयमुज्ज्वलम्।

पदवाक्यप्रबन्धानां व्यापकत्वेन वर्तते॥५७॥

एतद् गुणद्वितयमौचित्यसौभाग्याभिधानम् उज्ज्वलमतीवभ्राजिष्णुपदवाक्यप्रबन्धानां त्रयाणामपि व्यापकत्वेन वर्तते सकलावयवव्यास्यावतिष्ठते। क्वेत्याह—त्रिष्वपि मार्गेषु सुकुमारविचित्रमध्यमाख्येषु। तत्र पदस्य तावदौचित्यम्-बहुविधभेदभिन्नो वक्रभावः, स्वभावस्याञ्जसेन प्रकारेण परिपोषणमेव वक्रतायाः परं रहस्यम्, उचिताभिधानजीवितत्वाद्। वाक्यस्याप्येकदेशेऽप्यौचित्यविरहात्तद्विदाह्लादकारित्वहानिः। यथा रघुवंशे—

पुरं निषादाधिपतेस्तदेतद्यस्मिन्मया मौलिमणिं विहाय।

जटासु बद्धास्वरुदत्सुमन्त्रः कैकेयि कामाः फलितास्तवेति ॥१२२॥

अत्र रघुपतेरनर्घमहापुरुषसम्पदुपेतत्वेन वर्ण्यमानस्य 'कैकयि कामाः फलितास्तव' इत्येवंविधतुच्छतरपदार्थसंस्मरणं तदभिधानं चात्यन्तमनौचित्यमावहति।

प्रबन्धस्यापि क्वचित्प्रकरणैकदेशेऽप्यौचित्यविरहादेकदेशदाहदूषितदग्धपटप्रायता प्रसज्यते। यथा - रघुवंशे एव दिलीप-सिंहसंवादावसरे-

अथैकधेनोरपराधचण्डाद्

गुरोः कृशानुप्रतिद्विभेषि।

शक्योऽस्य मन्युर्भवतापि जेतुं

गाः कोटिशः स्पर्शयता घटोघ्नीः॥१२३॥

इति सिंहस्याभिधातुमुचितमेव, राजोपहासपरत्वेनाभिधीयमानत्वात्। राज्ञः पुनरस्य निजयशःपरिरक्षणपरत्वेन तृणवल्लघुवृत्तयः प्राणाः प्रतिभासन्ते। तस्यैतत्पूर्वपक्षोत्तरत्वेन—

कथं च शक्यानुनयो महर्षिर्विश्राणनादन्यपयस्विनीनाम्।

इमां तनूजां सुरभेरवेहि रुद्रौजसा तु प्रहृतं त्वयास्याम्॥१२४॥

इत्यान्यासां गवां तत्प्रतिवस्तुप्रदानयोग्यता यदि कदाचित्सम्भवति ततस्तस्य मुनेर्मम चोभयोरप्येतज्जीवितपरिरक्षणनैरपेक्ष्यमुपपन्नमिति तात्पर्यावसानादत्यन्त-मनौचित्ययुक्तेयमुक्तिः।

यथा च कुमारसम्भवे त्रैलोक्याक्रान्तिप्रवणपराक्रमस्य तारकाख्यस्य रिपोर्जिगीषावसरे सुरपतिर्मन्मथेनाधीयते—

कामेकपत्नीं व्रतदुःखशीलां लोलं मनश्चारुतया प्रविष्टाम्।

नितम्बिनीमिच्छसि मुक्तलज्जां कण्ठे स्वयंग्राहनिषक्तबाहुम्॥१२५॥

इत्यविनयानुष्ठाननिष्ठं त्रिविष्टपाधिपत्यप्रतिष्ठतस्यापि तथाविधाभिप्रायानुवर्तनपरत्वेनाभिधीयमानमनौचित्यमावहति। एतच्चैतस्यैव कवेः सहजसौकुमार्यमुद्रितभूक्तिपरिस्पन्दसौन्दर्यस्य पर्यालोच्यते, न पुनरन्येषामाहार्यमात्रकाव्यकरणकौशलश्लाघिनाम्। सौभाग्यमपि पदवाक्यप्रकरणप्रबन्धानां प्रत्येकमनेकाकारकमनीयकारणकलापकलितरामणीयकानां किमपि सहृदयहृदयसंवेद्यं काव्यैकजीवितमलौकिकचमत्कारकारि संवलितानेकरसास्वादसुन्दरं सकलावयवव्यापकत्वेन काव्यस्य गुणान्तरं परिस्फुरतीत्यलमतिप्रसङ्गेन।

इदानीमेतदुपसंहृत्यान्यदवतारयति—

मार्गाणां त्रितयं तदेतदसकृत्प्राप्तव्यपर्युत्सुकैः

क्षुण्णं कैरपि यत्र कामपि भुवं प्राप्य प्रसिद्धिं गताः।

सर्वे स्वैरविहारहारि कवयो यास्यन्ति येनाधुना

तस्मिन् कोऽपि स साधु सुन्दरपदन्यासक्रमः कथ्यते॥५८॥

मार्गाणां सुकुमारादीनामेतित्रतयं कैरपि महाकविभिरेव, न सामान्यैः, प्राप्तव्यपर्युत्सुकैः प्राप्योत्कण्ठितैरसकृत् बहुवारमभ्यासेन क्षुण्णं परिगमितम्। यत्र यस्मिन् मार्गत्रये कामपि

भुवं प्राप्य प्रसिद्धिं गताः लोकोत्तरां भूमिमासाद्य प्रतीतिं प्राप्ताः। सर्वे कवयस्तस्मिन्मार्गत्रितये येन यास्यन्ति गमिष्यन्ति स्वैरविहारहारि स्वेच्छाविहरणरमणीयं स कोऽपि अलौकिकः साधु शोभनं कृत्वा सुन्दरपदन्यासक्रमः कथ्यते सुभगसुप्तिङन्तसमर्पणपरिपाटीविन्यासो वर्ण्यते। मार्गस्वैरविहारपदप्रभृतयः शब्दाः श्लेषच्छायाविशिष्टत्वेन व्याख्येयाः।

इति श्रीराजानककुन्तकविरचिते वक्रोक्तिजीविते काव्यालङ्कारे प्रथम उन्मेषः।

द्वितीयोन्मेषः

सर्वत्रैव सामान्यलक्षणे विहिते विशेषलक्षणं विधातव्यमिति काव्यस्य ''शब्दार्थौ सहितौ'' इत्यादि (१/७) सामान्यलक्षणं विधाय तदवयवभूतयोः शब्दार्थयोः साहित्यस्य प्रथमोन्मेष एव विशेषलक्षणं विहितम्। इदानी प्रथमोद्दिष्टस्य वर्णविन्यासवक्रत्वस्य विशेषलक्षणमुपक्रमते—

एको द्वौ बहवो वर्णा बध्यमानाः पुनः पुनः।

स्वल्पान्तरास्त्रिधा सोक्ता वर्णविन्यासवक्रता॥१॥

वर्णशब्दोऽत्र व्यञ्जनपर्यायः, तथा प्रसिद्धत्वात्। तेन सा वर्णविन्यासवक्रता व्यञ्जनविन्यासनविच्छित्तिः त्रिधा त्रिभिः प्रकारैरुक्ता वर्णिता। के पुनस्ते त्रयः प्रकारा इत्युच्यते— एकः केवल एव, कदाचिद् द्वौ बहवो वा वर्णाः पुनः पुनर्बध्यमाना योज्यमानाः। कीदृशाः—स्वल्पान्तराः। स्वल्पं स्तोकमन्तरं व्यवधानं येषां ते तथोक्ताः। त एव त्रयः प्रकारा इत्युच्यन्ते। अत्र वीप्सया पुनः पुनरित्ययोगव्यवच्छेदपरत्वेन नियमः, नान्ययोगव्यवच्छेदपरत्वेन। तस्मात्पुनः पुनर्बध्यमाना एव, न तु पुनः पुनरेव बध्यमाना इति।

यत्रैकव्यञ्जननिबद्धोदाहरणं यथा—

धम्मिलो विनिवेशिताल्पकुसुमः सौन्दर्यधुर्यं स्मितं
विन्यासो वचसां विदग्धमधुरः कण्ठे कलः पञ्चमः।
लीलामन्थरतारके च नयने यातं विलासालसं
कोऽप्येवं हरिणीदृशः स्मरशरापातावदातः क्रमः॥१॥

एकस्य द्वयोर्बहूना चोदाहरणं यथा—

भग्नैलावल्लरीकास्तरलितकदलीस्तम्बताम्बूलजम्बू-

जम्बीरास्तालतालीसरलतरलतालासिका यस्य जह्नुः।

वेल्लत्कल्लोलहेला बिसकलनजडाः कूलकच्छेषु सिन्धोः

सेनासीमन्तिनीनामनवरतरताभ्यासतान्तिं समीराः॥२॥

एतामेव वक्रतां विच्छित्त्यन्तरेण विविनक्ति—

वर्गान्तयोगिनः स्पर्शा द्विरुक्तास्त-ल-नादयः।

शिष्टाश्च रादिसंयुक्ताः प्रस्तुतौचित्यशोभिनः॥२॥

इयमपरा वर्णविन्यासवक्रता त्रिधा त्रिभिः प्रकारैरुक्तेति 'च'— शब्देनाभिसम्बन्धः। के पुनरस्यास्त्रयः प्रकारा इत्याह— वर्गान्तयोगिनः स्पर्शाः। स्पर्शाः कादयो मकारपर्यन्ता वर्गास्तदन्तैः ङकारादिभिर्योगः संयोगो येषां ते तथोक्ताः, पुनः पुनर्बध्यमानाः— प्रथमः प्रकारः। त-ल-नादयः तकार-लकार—नकारप्रभृतयो द्विरुक्ता द्विरुच्चारिता द्विगुणाः सन्तः, पुनः पुनर्बध्यमानाः- द्वितीयः। तद्व्यतिरिक्ताः शिष्टाश्च व्यञ्जनसञ्ज्ञा ये वर्णास्ते रेफप्रभृतिभिः संयुक्ताः पुनः पुनर्बध्यमानाः—तृतीयः। स्वल्पान्तराः परिमितव्यवहिता इति सर्वेषामभिसम्बन्धः ते च कीदृशाः— प्रस्तुतौचित्यशोभिनः। प्रस्तुतं वर्ण्यमानं वस्तु तस्य यदौचित्यमुचितभावस्तेन शोभन्ते ये ते तथोक्ताः। न पुनर्वर्णसावर्ण्यव्यसनितामात्रेणोपनिबद्धाः प्रस्तुतौचित्यम्लानकारिणः। प्रस्तुतौचित्यशोभित्वात् कुत्रचित्परुषरसप्रस्तावे तादृशानेवाभ्यनुजानाति।

अथ प्रथमप्रकारोदाहरणं यथा—

उन्निद्रकोकनदरेणुपिशङ्गिताङ्गा

गुञ्जन्ति मञ्जु मधुपाः कमलाकरेषु।

एतच्चकास्ति च रवेर्नवबन्धुजीव-

पुष्पच्छदाभमुदयाचलचुम्बि बिम्बम्॥३॥

यथा च—

कदलीस्तम्बताम्बूलजम्बूजम्बीराः इति॥४॥

यथा वा—

सरस्वतीहृदयारविन्दमकरन्दबिन्दुसन्दोहसुन्दराणाम् इति॥५॥

द्वितीयप्रकारोदाहरणम् —

प्रथममरुणच्छायः॥६॥

इत्यस्य द्वितीयचतुर्थौ पादौ।

तृतीयप्रकारोदाहरणमस्यैव तृतीयः पादः।

यथा वा —

सौन्दर्यधुर्यं स्मितम्॥७॥

यथा च —

'कह्लार'–शब्दसाहचर्येण 'ह्लाद'-शब्दप्रयोगः।

परुषरस-प्रस्तावे तथाविधसंयोगोदाहरणं यथा—

उत्ताम्यत्तालवश्च प्रतपति तरणावांशवीं तापतन्द्री-

मद्रिद्रोणीकुटीरे कुहरिणि हरिणारातयो यापयन्ति॥८॥

एतामेव वैचित्र्यान्तरेण व्याचष्टे —

क्वचिदव्यवधानेऽपि मनोहारिनिबन्धना।

सा स्वराणामसारूप्यात् परां पुष्णाति वक्रताम्॥३॥

क्वचिदनियतप्रायवाक्यैकदेशे कस्मिंश्चिदव्यवधानेऽपि व्यवधानाभावेऽप्येकस्य द्वयोः समुदितयोश्च बहूनां वा पुनः पुनर्बध्यमानानामेषां मनोहारिनिबन्धना हृदयावर्जकविन्यासा भवति। काचिदेवं सम्पद्यत इत्यर्थः। यमकव्यवहारोऽत्र न प्रवर्तते, यस्य नियतस्थानतया व्यवस्थानात्। स्वरैरव्यवधानमत्र न विवक्षितम्, तस्यानुपपत्तेः।

तत्रैकस्याव्यवधानोदाहरणं यथा—

वामं कज्जलवद्विलोचनमुरो रोहद्विसारिस्तनम्॥९॥

द्वयोर्यथा—

ताम्बूलीनद्धमुग्धक्रमुकतरुतलस्रस्तरे सानुगाभिः

पायं पायं कलाचीकृतकदलदलं नारिकेलीफलाम्भः।

सेव्यन्तां व्योमयात्राश्रमजलजयिनः सैन्यसीमन्तिनीभि-

र्दात्यूहव्यूहकेलीकलितकुहकुहारावकान्ता वनान्ताः॥१०॥

यथा वा—

अयि पिबत चकोराः कृत्स्नमुन्नाम्य कण्ठान्

क्रमुकबलनचञ्चच्चञ्चवश्चन्द्रिकाम्भः।

विरहविधुरितानां जीवितत्राणहेतो-

र्भवति हरिणलक्ष्मा येन तेजोदरिद्रः॥११॥

बहूनां यथा —

सरलतरलतालासिका इति॥१२॥

‘अपि-शब्दात् क्वचित् व्यवधानेऽपि। द्वयोर्यथा—

स्वस्थाः सन्तु वसन्त ते रतिपतेरग्रेसरा वासराः॥१३॥

बहूनां व्यवधानेऽपि यथा—

चकितचातकमेचकितवियति वर्षात्यये॥१४॥

सा स्वराणामसारूप्यात् सेयमनन्तरोक्ता स्वराणामकारादीनामसारूप्यादसादृश्यात् क्वचित्कस्मिंश्चिदावर्तमानसमुदायैकदेशे परामन्यां वक्रतां कामपि पुष्णाति पुष्यतीत्यर्थः।

यथा—

राजीवजीवितेश्वरे॥१५॥

यथा वा—

धूसरसरिति इति॥१६॥

यथा च—

स्वस्थाः सन्तु वसन्त इति॥१७॥

यथा वा—

तालताली इति॥१८॥

सोऽयमुभयप्रकारोऽपि वर्णविन्यासवक्रताविशिष्टवाक्यविन्यासो यमकाभासः। सन्निवेशविशेषो मुक्ताकलापमध्यप्रोतमणिमयपदकबन्धबन्धुरः सुतरां सहृदयहृदयहारितां प्रतिपद्यते। तदिदमुक्तम्—

अलङ्कारस्य कवयो यत्रालङ्करणान्तरम्।

असन्तुष्टा निबध्नन्ति हारादेर्मणिबन्धवत्॥१९॥ इति।

एतामेव विविधप्रकारां वक्रतां विशिनष्टि, यदेवंविधवक्ष्यमाणविशेषणविशिष्टा विधातव्येति—

नातिनिर्बन्धविहिता नाप्यपेशलभूषिता।

पूर्वावृत्तपरित्यागनूतनावर्तनोज्ज्वला॥४॥

नातिनिर्बन्धविहिता — 'निर्बन्ध'—शब्दोऽत्र व्यसनितायां वर्तते। तेनातिनिर्बन्धेन पुनः पुनरावर्तनव्यसनितया न विहिता, अप्रयत्नविरचितेत्यर्थः। व्यसनितया प्रयत्नविरचने हि प्रस्तुतौचित्यपरिहाणेर्वाच्यवाचकयोः परस्परस्पर्धित्वलक्षणसाहित्यविरहः पर्यवस्यति। यथा—

भण तरुणि इति॥२०॥

नाप्यपेशलभूषिता न चाप्यपेशलैरसुकुमारैरक्षरैरलङ्कृता। यथा—

शीर्णघ्राणाङ्घ्रि इति॥२१॥

तदेवं कीदृशी तर्हि कर्तव्येत्याह- पूर्वावृत्तपरित्यागनूतनावर्तनोज्ज्वला पूर्वमावृत्तानां पुनः पुनर्विरचितानां परित्यागेन प्रहाणेन नूतनानामभिनवानां वर्णानामावर्तनेन पुनः पुनः परिग्रहेण च तदेवमुभाभ्यां प्रकाराभ्यामुज्ज्वला भ्राजिष्णुः। यथा —

एतां पश्य पुरस्तटीमिह किल क्रीडाकिरातो हरः
कोदण्डेन किरीटिना सरभसं चूडान्तरे ताडितः।
इत्याकर्ण्य कथाद्भुतं हिमनिधावद्रौ सुभद्रापते-
र्मन्दं मन्दमकारि येन निजयोर्दोर्दण्डयोर्मण्डनम्॥२२॥

यथा वा—

हंसानां निनदेषु इति॥२३॥

यथा च—

एतन्मन्दविपक्व इत्यादौ॥२४॥

यथा वा—

णामह दसाणणसरहसकरतलिअबलन्तसेलभअविहलं।
वेवंतथोरथणहरहरकअकंठग्गहं गोरिं॥२५॥

(नमत दशाननसरभसकरतुलितबलच्छैलभयविह्वाम्।

वेपमानस्थूलस्तनभरहरकृतकव्यग्रहां गौरीम्॥)

एवमेतां वर्णविन्यासवक्रतां व्याख्याय तामेवोपसंहरति—

वर्णच्छायानुसारेण गुणमार्गानुवर्तिनी।

वृत्तिवैचित्र्ययुक्तेति सैव प्रोक्ता चिरन्तनैः॥५॥

वर्णानामक्षराणां या छाया कान्तिः श्रव्यतादिगुणसम्पत्तया हेतुभूतया यदनुसरणमनुसारः प्राप्यस्वरूपानुप्रवेशस्तेन। गुणान् माधुर्यादीन् मार्गां सुकुमारप्रभृतीननुवर्तते या सा तथोक्ता। तत्र गुणानामान्तरतम्यात् प्रथममुपन्यसनम्, गुणद्वारेणैव मार्गानुसरणोपपत्तेः। तदयमत्रार्थः— यद्यप्येषा वर्णविन्यासवक्रता व्यञ्जनच्छायानुसारेणैव, तथापि प्रतिनियतगुणविशिष्टानां मार्गाणामनुवर्तनद्वारेण यथा स्वरूपानुप्रवेशं विदधाति तथा विधातव्येति। तत एव च तस्यास्तन्निबन्धनाः प्रविततः प्रकाराः समुल्लसन्ति। चिरन्तनैः पुनः सैव स्वातन्त्र्येण वृत्तिवैचित्र्ययुक्तेति प्रोक्ता। वृत्तिनामुपनागरिकादीनां यद् वैचित्र्यं विचित्रभावः स्वनिष्ठसंख्याभेदभिन्नत्वं तेन युक्ता समन्वितेति चिरन्तनैः पूर्वसूरिभिरभिहता। तदिदमत्र तात्पर्यम्—यदस्याः सकलगुणस्वरूपानुसरणसमन्वयेन सुकुमारादिमार्गानुवर्तनायत्तवृत्तेः पारतन्त्र्यमपरिगणितप्रकारत्वं चैतदुभयमप्यवश्यम्भावि तस्मादपारतन्त्र्यं परिमितप्रकारत्वं चेति नातिचतुरस्रम।

ननु च प्रथममेको द्वावित्यादिना प्रकारेण परिमितान् प्रकारान् स्वतन्त्रत्वं च स्वयमेव व्याख्याय किमेतदुक्तामिति चेन्नैष दोषः, यस्माल्लक्षणकारैर्यस्य कस्यचित्पदार्थस्य समुदायपरायत्तवृत्तेः परव्युत्पत्तये प्रथममपोद्धारबुद्ध्या स्वतन्त्रतया स्वरूपमुल्लिख्यते, ततः समुदायान्तर्भावो भविष्यतीत्यलमतिप्रसङ्गेन।

येयं वर्णविन्यासवक्रता नाम वाचकालङ्कृतिः स्थाननियमाभावात् सकलवाक्यस्य विषयत्वेन समाम्नाता, सैव प्रकारान्तरविशिष्टा नियतस्थानतयोपनिबध्यमाना किमपि वैचित्र्यान्तरमाबध्नातीत्याह—

समानवर्णमन्यार्थं प्रसादि श्रुतिपेशलम्।

औचित्ययुक्तमाद्यादिनियतस्थानशोभि यत्॥६॥

यमकं नाम कोऽप्यस्याः प्रकारः परिदृश्यते।

स तु शोभान्तराभावादिह नाति प्रतन्यते॥७॥

कोऽप्यस्याः प्रकारः परिदृश्यते, अस्याः पूर्वोक्तायाः, कोऽप्यपूर्वः प्रभेदो विभाव्यते। कोऽसावित्याह— यमकं नाम। यमकमिति यस्य प्रसिद्धिः। तच्च कीदृशम्— समानवर्णम्। समानाः स्वरूपाः सदृशश्रुतयो वर्णा यस्मिन् तत्तथोक्तम्। एवमेकस्य द्वयोर्बहूनां सदृशश्रुतीनां व्यवहितमव्यवहितं वा यदुपनिबन्धनं तदेव यमकमित्युच्यते। तदेवमेकरूपे संस्थानद्वये सत्यपि–अन्यार्थं भिन्नभिधेयम्। अन्यच्च कीदृशम्—प्रसादि प्रसादगुणयुक्तं झगिति वाक्यसमर्पकम्, अकदर्थनाबोध्यमिति यावत्। श्रुतिपेशलमित्येतदेव विशिष्यते—श्रुतिः श्रवणेन्द्रियं तत्र पेशलं रञ्जकम्, अकठोरशब्दविरचितम्। कीदृशम्—औचित्ययुक्तम्। औचित्यं वस्तुनः स्वभावोत्कर्षस्तेन युक्तं समन्वितम्। यत्र यमकोपनिबन्धनव्यसनित्वेनाप्यौचित्यमपरिम्लानमित्यर्थः। तदेव विशेषणान्तरेण विशिनष्टि— आद्यादिनियतस्थानशोभि यत्। आदिरादिर्येषां ते तथोक्ताः प्रथममध्यान्तास्तान्येव नियतानि स्थानानि विशिष्टाः सन्निवेशास्तैः शोभते भ्राजते यत्तथोक्तम्। अत्राद्यादयः सम्बन्धिशब्दाः पदाभिर्विशेषणीयाः। स तु प्रकारः प्रोक्तलक्षणसम्पदुपेतोऽपि भवन् इह नाति प्रतन्यते ग्रन्थेऽस्मिन्नाति विस्तार्यते। कुतः— शोभान्तराभावात्। स्थाननियमव्यतिरिक्तस्यान्यस्य शोभान्तरस्य

छायान्तरस्यासम्भवादित्यर्थः। अस्य च वर्णविन्यासवैचित्र्यव्यतिरेकेणान्यत्किञ्चिदपि जीवितान्तरं न परिदृश्यते। तेनानन्तरोक्तालङ्कृतिप्रकारतैव युक्ता। उदाहरणान्यत्र शिशुपालवधे चतुर्थे सर्गे समर्पकाणि कानिचिदेव यमकानि, रघुवंशे वा वसन्तवर्णने।

एवं पदावयवानां वर्णानां विन्यासवक्रभावे विचारिते वर्णसमुदायात्मकस्य पदस्य च वक्रभावविचारः प्राप्तावसरः। तत्र पदपूर्वार्धस्य तावद्वक्रताप्रकारः कियन्तः सम्भवन्तीति प्रक्रमते—

यत्र रूढेरसम्भाव्यधर्माध्यारोपगर्भता।

सद्धर्मातिशयारोपगर्भत्वं वा प्रतीयते॥८॥

लोकोत्तरतिरस्कारश्लाघ्योत्कर्षाभिधित्सया।

वाच्यस्य सोच्यते कापि रूढिवैचित्र्यवक्रता॥९॥

यत्र रूढेरसम्भाव्यधर्माध्यारोपगर्भता प्रतीयते। शब्दस्य नियतवृत्तिता नाम धर्मो रूढिरुच्यते, रोहणं रूढिरिति कृत्वा। सा च द्विप्रकारा सम्भवति— नियतसामान्यवृत्तिता नियतविशेषवृत्तिता। तेन रूढिशब्देनात्र रूढिप्रधानः शब्दोऽभिधीयते, धर्मधर्मिणोरभेदोपचारदर्शनात्। यत्र यस्मिन्े विषये रूढिशब्दस्य असम्भाव्यः सम्भावयितुमशक्यो यो धर्मः कश्चित्परिस्पन्दस्तस्याध्यारोपः समर्पणं गर्भोऽभिप्रायो यस्य स तथोक्तस्तस्य भावस्तत्ता सा प्रतीयते प्रतिपद्यते। यत्रेति सम्बन्धः। सद्धर्मातिशयारोपगर्भत्वं वा। संश्चासौ धर्मश्च सद्धर्मः विद्यमानपदार्थस्य परिस्पन्दस्तस्मिन् यस्य कस्यचिदपूर्वस्यातिशयस्याद्भुतरूपस्य महिम्न आरोपः समर्पणं गर्भोऽभिप्रायो यस्य स तथोक्तस्तस्य भावस्तत्त्वम्। तच्च वा यस्मिन् प्रतीयते। केन हेतुना— लोकोत्तरतिरस्कारश्लाघ्योत्कर्षाभिधित्सया। लोकोत्तरः सर्वातिशायी यस्तिरस्कारः खलीकरणं श्लाघ्यश्च स्पृहणीयो य उत्कर्षः सातिशयत्वं तयोरभिधित्सा अभिधातुमिच्छा वक्तुकामता

तया। कस्य वाच्यस्य। रूढिशब्दस्य वाच्यो योऽभिधेयोऽर्थस्तस्य। सोच्यते कथ्यते काप्यलौकिकी रूढिवैचित्र्यवक्रता। रूढिशब्दस्यैवंविधेन वैचित्र्येण विचित्रभावेन वक्रता वक्रभावः। तदिदमत्र तात्पर्यम्—यत्सामान्यमात्रसंस्पर्शिनां शब्दानामनुमानवन्नियत-विशेषालिङ्गनं यद्यपि स्वभावादेव न किञ्चिदपि सम्भवति, तथाप्यनया युक्त्या कविविवक्षितनियतविशेषनिष्ठतां नीयमानाः कामपि चमत्कारकारितां प्रतिपद्यन्ते। यथा—

ताला जाअंति गुणा जाला दे सहिअएहि घेप्पंति।

रइकिरणाणुग्गहिआइ होंति कमलाइ जमलाइ॥२६॥

(तदा जायन्ते गुणा यदा ते सहृदयैर्गृह्यन्ते।

रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि।)

प्रतीयते इति क्रियापदवैचित्र्यस्यायमभिप्रायो यदेवंविधे विषये शब्दानां वाचकत्वेन न व्यापारः, अपि तु वस्त्वन्तरवत्प्रतीतिकारित्वमात्रेणेति युक्तियुक्तमप्येतदिह नाति प्रतन्यते। यस्माद् ध्वनिकारेण व्यङ्ग्यव्यञ्जकभावोऽत्र सुतरां समर्थितस्तत् किं पौनरुक्त्येन।

सा च रूढिवैचित्र्यवक्रता मुख्यतया द्विप्रकारा सम्भवति—यत्र रूढिवाच्योऽर्थः स्वयमेव आत्मन्युत्कर्षं निकर्षं वा समारोपयितुकामः कविनोपनिबध्यते, तस्यान्यो वा कश्चिद्वक्तेति। यथा—

स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना

वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः।

कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे

बैदेही तु कथं भविष्यति हहा हा देवि धीरा भव॥२७॥

अत्र 'राम'–शब्देन 'दृढं कठोरहृदयः' सर्वं सहे' इति यदुभाभ्यां प्रतिपादयितुं न पार्यते, तदेवंविधविविधोद्दीपनविभावविभवसहनसामर्थ्यकारणं दुःसहजनकसुताविरहव्य-

थाविसंष्ठुलेऽपि समये निरपत्रपप्राणपरिरक्षावैचक्षण्यलक्षणं संज्ञापदनिबन्धनं किमप्यसम्भाव्यमसाधारणं क्रौर्यं प्रतीयते। वैदेहीत्यनेन जलधरसमयसुन्दरपदार्थसन्दर्शनासहत्वसमर्पकं सहजसौकुमार्यसुलभं किमपि कातरत्वं तस्याः समर्थ्यते। तदेव च पूर्वस्माद्विशेषाभिधायिनः 'तु'-शब्दस्य जीवितम्।

विद्यमानधर्मातिशयवाच्याध्यारोपगर्भत्वं यथा—

ततः प्रहस्याह पुनः पुरन्दरं व्यपेतभीर्भूमिपुरन्दरात्मजः।

गृहाण शस्त्रं यदि सर्ग एष ते न खल्वनिर्जित्य रघुं कृती भवान्॥२८॥

'रघु'-शब्देनात्र सर्वत्राप्रतिहतप्रभावस्यापि सुरपतेस्तथाविधाध्यवसायव्याघात-सामर्थ्यनिबन्धनः कोऽपि स्वपौरुषातिशयः प्रतीयते। प्रहस्येत्यनेनैतदेवोपबृंहितम्।

अन्यो वक्ता यत्र तत्रोदाहरणं यथा—

आज्ञा शक्रशिखामणिप्रणयिनि शास्त्राणि चक्षुर्नवं

भक्तिर्भूतपतौ पिनाकिनि पदं लङ्केति दिव्या पुरी।

सम्भूतिर्द्रुहिणान्वये च तदहो नेदृग्वरो लभ्यते

स्याच्चेदेष न रावणः क्व नु पुनः सर्वत्र सर्वे गुणाः॥२९॥

'रावण'-शब्देनात्र सकललोकप्रसिद्धदशाननदुर्विलासव्यतिरिक्तमभिजनविवेकसदाचार-प्रभावसम्भोगसुखसमृद्धिलक्षणायाः समस्तवरगुणसामग्रीसम्पदस्तिरस्कारकारणं किमप्यनुपादेयतानिमित्तभूतमौपहत्यं प्रतीयते।

अत्रैव विद्यमानगुणातिशयाध्यारोपगर्भत्वं यथा—

रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं पराम्॥३०॥

अत्र 'राम'शब्देन सकलत्रिभुवनातिशायी रावणानुचरविस्मयास्पदं शौर्यातिशयः प्रतीयते।

एषा च रूढिवैचित्र्यवक्रता प्रतीयमानधर्मबाहुल्याद् बहुप्रकारा भिद्यते। तच्च स्वयमेवोत्प्रेक्षणीयम्। यथा—

गुर्वर्थमर्थी श्रुतपारदृश्वा रघोः सकाशादनवाप्य कामम्।

गतो वदान्यान्तरमित्ययं मे मा भूत्परीवादनवावतारः॥३१॥

'रघु'—शब्देनात्र त्रिभुवनातिशाय्यौदार्यातिरेकः प्रतीयते। एतस्यां वक्रतायामयमेव परमार्थो यत् सामान्यमात्रनिष्ठतामपाकृत्य कविविवक्षितविशेषप्रतिपादनसामर्थ्यलक्षणः शोभातिशयः समुल्लास्यते। संज्ञाशब्दानां नियतार्थनिष्ठत्वात् सामान्यविशेषिभावो न कश्चित् सम्भवतीति न वक्तव्यम्। यस्मात्तेषामप्यवस्थासहस्रसाधारणवृत्तेर्वाच्यस्य नियतदशाविशेषवृत्तिनिष्ठता सत्कविविवक्षिता सम्भवत्येव, स्वरश्रुतिन्यायेन, लग्नांशुकन्यायेन चेति।

एवं रूढिवक्रतां विवेच्य क्रमप्राप्तसमन्वयां पर्यायवक्रतां विविनक्ति-

अभिधेयान्तरतमस्तस्यातिशयपोषकः।

रम्यच्छायान्तरस्पर्शात्तदलङ्कर्तुमीश्वरः॥१०॥

स्वयं विशेषणेनापि स्वच्छायोत्कर्षपेशलः।

असम्भाव्यार्थपात्रत्वगर्भं यश्चाभिधीयते॥११॥

अलङ्कारोपसंस्कारमनोहारिनिबन्धनः

पर्यायस्तेन वैचित्र्यं परा पर्यायवक्रता॥१२॥

पूर्वोक्तविशेषणविशिष्टः काव्यविषये पर्यायस्तेन हेतुना यद्वैचित्र्यं विचित्रभावो विच्छित्तिविशेषः सा परा प्रकृष्टा काचिदेव पर्यायवक्रतेत्युच्यते। पर्यायप्रधानः शब्दः पर्यायोऽभिधीयते। तस्य चैतदेव पर्यायप्राधान्यं यत् स कदाचिद्विवक्षिते वस्तुनि वाचकतया प्रवर्तते, कदाचिद्वाचकान्तरमिति। तेन पूर्वोक्तनीत्या बहुप्रकारः पर्यायोऽभिहितः, तर्हि

कियन्तस्तस्य प्रकाराः सन्तीत्याह—अभिधेयान्तरतमः। अभिधेयं वाच्यं वस्तु तस्यान्तरतमः प्रत्यासन्नतमः। यस्मात् पर्यायशब्दत्वे सत्यप्यन्तरङ्गत्वात् स यथा विवक्षितं वस्तु व्यनक्ति तथा नान्यः कश्चिदिति। यथा—

नाभियोक्तुमनृतं त्वमिष्यसे कस्तपस्विविशिखेषु चादरः।

सन्ति भूभृति हि नः शराः परे ये पराक्रमवसूनि वज्रिणः॥३२॥

अत्र महेन्द्रवाचकेष्वसंख्येषु सम्भवत्सु पर्यायशब्देषु 'वज्रिणः' इति प्रयुक्तः पर्यायवक्रतां पुष्णाति। यस्मात् सततसन्निहितवज्रस्यापि सुरपतेर्ये पराक्रमवसूनि विक्रमधनानीति सायकानां लोकोत्तरत्वप्रतीतिः। 'तपस्वि'शब्दोऽप्यतितरां रमणीयः। यस्मात् सुभटसायकानामादरो बहुमानः कदाचिदुपद्यते, तापसमार्गणेषु पुनरकिञ्चित्करेषु कः संरम्भ इति।

यथा— वा

कस्त्वं ज्ञास्यसि मां स्मर स्मरसि मां दिष्ट्या किमभ्यागत-

स्त्वामुन्मादयितुं कथं ननु बलात् किं ते बलं पश्य तत्।

पश्यामीत्यभिधाय पावकमुचा यो लोचनेनैव तं

कान्ताकण्ठनिषक्तबाहुमदह त्तस्मै नमः शूलिने॥३३॥

अत्र परमेश्वरे पर्यायसहस्रेष्वपि सम्भवत्सु 'शूलिने' इति यत्प्रयुक्तं तत्रायमभिप्रायो यत्तस्मै भगवते नमस्कारव्यतिरेकेण किमन्यदभिधीयते। यत्तथाविधोत्सेकपरित्यक्तविनयवृत्तेः स्मरस्य कुपितेनापि तदभिमतावलोकव्यतिरेकेण तेन सततसन्निहितशूलेनापि कोपसमुचितमायुधग्रहणं नाचरितम्। लोचनपातमात्रेणैव कोपकार्यकरणाद्भगवतः प्रभावातिशयः परिपोषितः। अत एव तस्मै नामोऽस्त्विति युक्तियुक्ततां प्रतिपद्यते।

अयमपरः पदपूर्वार्धवक्रताहेतुः पर्यायः। यस्तस्यातिशयपोषकः। तस्याभिधेयस्यार्थस्यातिशयमुत्कर्षं पुष्णाति यः स तथोक्तः। यस्मात् सहजसौकुमार्यसुभगोऽपि पदार्थस्तेन परिपोषितातिशयः सुतरां सहृदयहृदयहारितां प्रतिपद्यते। **यथा -**

सम्बन्धी रघुभूभुजां मनसिजव्यापारदीक्षागुरु-

गौराङ्गीवदनोपमापरिचितस्तारावधूवल्लभः।

सद्योमार्जितदाक्षिणात्यतरुणीदन्तावदातद्युति-

श्चन्द्रः सुन्दरि दृश्यतामयमितश्चण्डीशचूणामणिः॥३४॥

अत्र पर्यायाः सहजसौन्दर्यसम्पदुपेतस्यापि चन्द्रमसः सहृदयहृदयाह्लादकारणं कमप्यतिशयमुत्पादयन्तः पदपूर्वार्धवक्रतां पुष्णन्ति। तथा च रामेण रावणं निहत्य पुष्पकेण गच्छता सीतायाः सविस्रम्भं स्वैरकथास्वेतदभिधीयते यच्चन्द्रः सुन्दरि दृश्यतामिति, रामणीयकमनोहारिणि सकललोकलोचनोत्सवश्चन्द्रमा विचार्यतामिति। यस्मात्तथाविधानामेव तादृशः समुचितो विचारगोचरः। सम्बन्धी रघुभूभुजामित्यनेन चास्माकं नापूर्वो बन्धुरयमित्यवलोकनेन सम्मान्यतामिति प्रकारान्तरेणापि तद्विषयो बहुमानः प्रतीयते। शिष्टाश्च तदतिशयाधानप्रवणत्वमेवात्मनः प्रथयन्ति। तत एव च प्रस्तुतमर्थं प्रति प्रत्येकं पृथक्त्वेनोत्कर्षप्रकटनात्पर्यायाणां बहूनामप्यपौनरुक्त्यम्। तृतीये पादे विशेषणवक्रता विद्यते, न पर्यायवक्रत्वम्।

अयमपरः पर्यायप्रकारः पदपूर्वार्धवक्रतानिबन्धनः— यस्तदलं कर्तुमीश्वरः। तदभिधेयलक्षणं वस्तु विभूषयितुं यः प्रभवतीत्यर्थः। कस्मात्— रम्यच्छायान्तरस्पर्शात्। रम्यं रमणीयं यच्छायान्तरं विच्छित्त्यन्तरं श्लिष्टत्वादि तस्य स्पर्शात्,

शोभान्तरप्रतीतेरित्यर्थः। कथम्—स्वयं विशेषेणेनापि। स्वयमात्मनैव, स्वविशेषणभूतेन पदान्तरेण वा। तत्र स्वयं यथा—

इत्थं जडे जगति को नु बृहत्प्रमाण-

कर्णःकरी ननु भवेद् ध्वनितस्य पात्रम्।

इत्यागतं झटिति योऽलिनमुन्ममाथ

मातङ्ग एव किमतः परमुच्यतेऽसौ॥३५॥

अत्र 'मातङ्ग'—शब्दः प्रस्तुते वारणमात्रे प्रवर्तते। श्लिष्टया वृत्त्या चाण्डाललक्षणस्याप्रस्तुतस्य वस्तुनः प्रतीतिमुत्पादयन् रूपकालङ्कारच्छायासंस्पर्शाद् गौर्वाहीक इत्येनन न्यायेन सादृश्यनिबन्धनस्योपचारस्य सम्भवात् प्रस्तुतस्य वस्तुनस्तत्त्वमध्यारोपयन् पर्यायवक्रतां पुष्णाति। यस्मादेवंविधे विषये प्रस्तुतस्याप्रस्तुतेन सम्बन्धोपनिबन्धो रूपकालङ्कारद्वारेण कदाचिदुपमामुखेन वा। यथा 'स एवायं' 'स इवाय'मिति वा।

एष एव च शब्दशक्तिमूलानुरणनरूपव्यङ्ग्यस्य पदध्वनेर्विषयः, बहुषु चैवंविधेषु सत्सु वाक्यध्वनेर्वा। यथा—

कुसुमसमययुगमुपसंहरन्नुत्फुल्लमल्लिकाधवलाट्टहासो व्यजृम्भत ग्रीष्माभिधानो महाकालः॥३६॥

यथा —

वृत्तेऽस्मिन् महाप्रलये धरणीधारणायाधुना त्वं शेषः इति॥३७॥

अत्र युगादयः शब्दा प्रस्तुताभिधानपरत्वेन प्रयुज्यमानाः सन्तोऽप्यप्रस्तुतवस्तुप्रतीतिकारितया कामपि काव्यच्छायां समुन्मीलयन्तः प्रतीयमानालङ्कारव्यपदेशभाजनं भवन्ति॥

विशेषणेन यथा—

सुस्निग्धमुग्धधवलोरुदृशं विदग्ध-

मालोक्य यन्मधुरमद्य विलासदिग्धम्।

भस्मीचकार मदनं ननु काष्ठमेव

तन्नूनमीश इति वेत्ति पुरन्ध्रिलोकः॥३८॥

अत्र काष्ठमिति विशेषणपदं वर्ण्यमानपदार्थापेक्षया मन्मथस्य नीरसतां प्रतिपादयद् रम्यच्छायान्तसपर्शिश्लेषच्छायामनोज्ञविन्यासपरमस्मिन् वस्तुन्यप्रस्तुते मदनाभिधानपादपलक्षणे प्रतीतिमुत्पादयद् रूपकालङ्कारच्छायासंस्पर्शात् कामपि पर्यायवक्रतानुन्मीलयति।

अयमपरः पर्यायप्रकारः पदपूर्वार्धवक्रतायाः कारणम्—यः स्वच्छायोत्कर्षपेशलः। स्वस्यात्मनश्छाया कान्तिर्या सुकुमारता तदुत्कर्षेण तदतिशयेन यः पेशलो हृदयहारी। तदिदमत्र तात्पर्यम्— यद्यपि वर्ण्यमानस्य वस्तुनः प्रकारान्तरोल्लासकत्वेन व्यवस्थितिस्तथापि परिस्पन्दसौन्दर्यसम्पदेव सहृदयहृदयहारितां प्रतिपद्यते। यथा—

इत्थमुत्कयति ताण्डवलीलापण्डिताब्धिलहरीगुरुपादैः।

उत्थितं विषमकाण्डकुटुम्बस्यांशुभिः स्मरवतीविरहौ माम्॥३९॥

अत्रेन्दुपर्यायो 'विषमकाण्डकुटुम्ब'-शब्दः कविनोपनिबद्धः। यस्मान्मृगाङ्कोदयद्वेषिणा विरहविधुरहृदयेन केनचिदेतदुच्यते। यदयमप्रसिद्धोऽप्यमरिम्लानसमन्वयतया प्रसिद्धतमतामुपनीतस्तेन प्रथमतरोल्लिखितत्वेन च चेतनचमत्कारिता नूतनोल्लेखविलक्षणत्वेन च कविभिः पर्यायान्तरपरिहारपूर्वकमुपवर्ण्यते। यथा—

कृष्णकुटिलकेशीति वक्तव्ये यमुनाकल्लोलवक्रालकेति। यथा वा गौराङ्गीवदनोपमापरिचित इत्यत्र वनितादिवाचकसहस्रसद्भावेऽपि गौराङ्गीत्यभिधानमतीवरमणीयम्।

अयमपरः पर्यायप्रकारः पदपूर्वार्धवक्रताभिधायी—असम्भाव्यार्थपात्रत्वगर्भं यश्चाभिधीयते। वर्ण्यमानस्यासम्भाव्यः सम्भावयितुमशक्यो योऽर्थः कश्चित्परिस्पन्दस्तत्र पात्रत्वं भाजनत्वं गर्भोऽभिप्रायो यत्राभिधाने तत्तथाविधं कृत्वा यश्चाभिधीयते भण्यते। यथा—

अलं महीपाल तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात्।

न पादपोन्मूलनशक्तिरं हः शिलोच्चये मूर्च्छति मारुतस्य॥४०॥

अत्र महीपालेति राज्ञः सकलपृथ्वीपरिरक्षणमपौरुषस्यापि तथाविधप्रयत्नपरिपालनीयगुरुगोरूपजीवमात्रपरित्राणासामर्थ्यं स्वप्नेऽप्यसम्भावनीयं यत्तत्पात्रत्वगर्भमामन्त्रणमुपनिबद्धम्।

यथा वा—

भूतानुकम्पा तव चेदियं गौरेका भवेत् स्वस्तिमती त्वदन्ते।

जीवन् पुनः शश्वदुपप्लवेभ्यः प्रजाः प्रजानाथ पितेव पासि॥४१॥

अत्र यदि प्राणिकरुणाकारणं निजप्राणपरित्यागमाचरसि तदप्ययुक्तम्। यस्मात्त्वदन्ते स्वस्तिमती भवेदियमेकैव गौरिति त्रितयमप्यनादरास्पदम्। जीवन् पुनः शश्वत्सदैवोपप्लवेभ्योऽनर्थेभ्यः प्रजाः सकलभूतधात्रीवलयवर्तिनीः प्रजानाथ पासि रक्षसि। पितेवेत्यनादरातिशयः प्रथते।

तदेवं यद्यपि सुस्पष्टसमन्वयोऽयं वाक्यार्थस्तथापि तात्पर्यान्तरमत्र प्रतीयते। यस्मात् सर्वस्य कस्यचित्प्रजानाथत्वे सति सदैव तत्परिरक्षणस्याकरणमसम्भाव्यम्। तत्पात्रत्वगर्भमेव तदभिहितम्। यस्मात् प्रत्यक्षप्राणिमात्रभक्ष्यमाणगुरुहोमधेनुप्राणपरिरक्षणापेक्षानिरपेक्षस्य सतो

जीवतस्तवानेन न्यायेन कदाचिदपि प्रजापरिरक्षणं मनागपि न सम्भाव्यत इति प्रमाणोपपन्नम्।

तदिदमुक्तम्—

प्रमाणवत्त्वादायातः प्रवाहः केन वार्यते॥४२॥ इति

अत्राभिधानप्रतीतिगोचरीकृतानां पदार्थानां परस्परप्रतियोगित्वमुदाहरणप्रत्युदाहरण-न्यायेनानुसन्धेयम्।

अयमपरः पर्यायप्रकारः पदपूर्वार्धवक्रतां विदधाति—अलङ्कारोपसंस्कारमनोहारिनिबन्धनः। अत्र 'अलङ्कारोपसंस्कार'-शब्दे तृतीयासमासः षष्ठीसमासश्च करणीयः। तेनार्थद्वमभिहितं भवति। अलङ्कारेण रूपकादिनोपसंस्कारः शोभान्तराधानं यत्तेन मनोहारि हृदयरञ्जकं निबन्धनमुपनिबन्धो यस्य स तथोक्तः। अलङ्कारस्योत्प्रेक्षादेरुपसंस्कारः शोभान्तराधानं चेति विगृह्य। तत्र तृतीयासमासपक्षोदाहरणं यथा—

यो लीलातालवृन्तो रहसि निरुपधिर्यश्च केलीप्रदीपः

कोपक्रीडासु योऽस्त्रं दशनकृतरुजो योऽधरस्यैकसेकः।

आकल्पे दर्पणं यः श्रमशयनविधौ यश्च गण्डोपधानं

देव्याः स व्यापदं वो हरतु हरजटाकन्दलीपुष्पमिन्दुः॥४३॥

अत्र तालवृन्तादिकार्यसामान्यादभेदोपचारनिबन्धो रूपकालङ्कारविन्यासः सर्वेषामेव पर्यायाणां शोभातिशयकारित्वेनोपनिबद्धः।

षष्ठीसमासपक्षोदाहरणं यथा—

देवि त्वन्मुखपङ्कजेन शशिनः शोभातिरस्कारिणा

वश्याब्जानि विनिर्जितानि सहसा गच्छन्ति विच्छायताम्॥४४॥

अत्र स्वरससम्प्रवृत्तसायंसमयसमुचिता सरोरुहाणां विच्छायताप्रतिपत्तिर्नायकेन नागरकतया वल्लभोपलालनाप्रवृत्तेन तन्निदर्शनोपक्रमरमणीयत्वमुखेन निर्जितानीवेति प्रतीयमानोत्प्रेक्षालङ्कारकारित्वेन प्रतिपाद्यते। एतदेव च युक्तियुक्तम्। यस्मात्सर्वस्य कस्यचित्पङ्कजस्य शशाङ्कशोभातिरस्कारितां प्रतिपद्यते। त्वन्मुखपङ्कजेन पुनः शशिनः शोभातिरस्कारिणा न्यायतो निर्जितानि सन्ति विच्छायतां गच्छन्तीवेति प्रतीयमानस्योत्प्रेक्षालक्षणस्यालङ्कारस्य शोभातिशयः समुल्लास्यते।

एवं पर्यायवक्रतां विचार्य क्रमसमुचितावसरामुपचारवक्रतां विचारयति—

यत्र दूरान्तरेऽन्यस्मात्सामान्यमुपचर्यते।

लेशेनापि भवत् काञ्चिद्वक्तुमुद्रिक्तवृत्तिताम्॥१३॥

यन्मूला सरसोल्लेखा रूपकादिरलङ्कृतिः।

उपचारप्रधानासौ वक्रता काचिदुच्यते॥१४॥

असौ काचिदपूर्वा वक्रतोच्यते वक्रभावोऽभिधीयते। कीदृशी—उपचारप्रधाना। उपचरणमुपचारः स एव प्रधानं यस्याः सा तथोक्ता। किंस्वरूपा च—यत्र यस्यामन्यस्मात्पदार्थान्तरात् प्रस्तुतत्वाद्वर्ण्यमाने वस्तुनि सामान्यमुपचर्यते साधारणो धर्मः कश्चिद्वक्तुमभिप्रेतः समारोप्यते। कस्मिन् वर्ण्यमाने वस्तुनि—दूरान्तरे। दूरमनल्पन्तरं व्यवधानं यस्य तत्तथोक्तं तस्मिन्।

ननु च व्यवधानमूर्तत्वाद्वर्ण्यमानस्य वस्तुनो देशविहितं तावन्न सम्भवति। कालविहितमपि नास्त्येव, तस्य क्रियाविषयत्वात्। क्रियास्वरूपं कारकस्वरूपं चेत्युभयात्मकं यद्यपि वर्ण्यमानं वस्तु. तथापि देशकालव्यवधानेनात्र न भवितव्यम्। यस्मात्पदार्थानामनुमानवत् सामान्यमात्रमेव शब्दैर्विषयीकर्तुं पार्यते, न विशेषः। तत्कथं दूरान्तरत्वमुपपद्यते?

सत्यमेतत्, किन्तु 'दूरान्तर'-शब्दो मुखतया देशकालविषये विप्रकर्षे प्रत्यासत्तिविरहे वर्तमानोऽप्युपचारात् स्वभावविप्रकर्षे वर्तते। सोऽयं स्वभावविप्रकर्षो विरुद्धधर्माध्यासलक्षणः पदार्थानाम्। यथा मूर्तिमत्त्वमूर्तत्वापेक्षया, द्रवत्वं च घनत्वापेक्षया, चेतनत्वमचेतनत्वापेक्षयेति।

कीदृक् तत्सामान्यम्—लेशेनापि भवत्। मनाङ्मात्रेणापि सत्। किमर्थम्—काञ्चिदपूर्वामुद्रिक्तवृत्तितां वक्तुं सातिशयपरिस्पन्दतामभिधातुम्। यथा–

स्निग्धश्यामलकान्तिलिप्तवियतः॥४५॥

अत्र यथा बुद्धिपूर्वकारिणः केचिच्चेतनवर्णच्छायातिशयोत्पादनेच्छया केनचिद्विद्यमानलेपनशक्तिना मूर्तेन नीलादिना रञ्जनद्रव्यविशेषेण किञ्चिदेव लेपनीयं मूर्तिमद्वस्तु वस्त्रप्रायं लिम्पन्ति, तद्वदेव तत्कारित्वसामान्यं मनाङ्मात्रेणापि विद्यमानं कामप्युद्रिक्तवृत्तितामभिधातुमुपचारात् स्निग्धश्यामलया कान्त्या लिप्तं वियद् द्यौरित्युपनिबद्धम्। 'स्निग्ध'–शब्दोऽप्युपचारवक्र एव। यथा मूर्तं वस्तु दर्शनस्पर्शनसंवेद्यस्नेहनगुणयोगात् स्निग्धमित्युच्यते, तथैव कान्तिरमूर्ताप्युपचारात् स्निग्धेत्युक्ता। यथा वा–

गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं

रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः

सौदामिन्या कनकनिकषस्निग्धया दर्शयोर्वीं

तोयोत्सर्गस्तनितमुखरो मास्म भूर्विक्लवास्ताः॥४६॥

अत्रामूर्तानामपि तमसामतिबाहुल्याद् घनत्वान्मूर्तसमुचितं सूचिभेद्यत्वमुपचरितम्। यथा वा—

गअणं च मत्तमेहं धारालुलिअज्जुणाइ अ वणाइ।

णिरहंकारमिअंका हरंति णीलाओ वि णिसानओ॥४७॥

(गगनं च मत्तमेघं धारालुलितार्जुनानि च वनानि।

निरहङ्कामृगाङ्का हरन्ति नीला अपि निशाः।)

अत्र मत्तत्वं निरहंकारत्वं च चेतनधर्मसामान्यमुपचरितम्। सोऽयमुपचारवक्रताप्रकारः सत्कविप्रवाहे सहस्रशः सम्भवतीति सहृदयैः स्वयमेवोत्प्रेक्षणीयः। अत एव च प्रत्यासन्नान्तरेऽस्मिन्नुपचारे न वक्रताव्यवहारः, यथा गौर्वाहीक इति।

इदमपरमुपचारवक्रतायाः स्वरूपम्—यन्मूला सरसोल्लेखा रूपकादिरलङ्कृतिः। या मूलं यस्याः सा तथोक्ता। रूपकमादिर्यस्याः सा तथोक्ता। का सा—अलङ्कृतिरलङ्करणं रूपकप्रभृतिरलङ्कारविच्छित्तिरित्यर्थः। कीदृशी—सरसोल्लेखा। सरसः सास्वादः सचमत्कृतिरुल्लेखः समुन्मेषो यस्याः सा तथोक्ता। समानाधिकरणयोरत्र हेतुहेतुमद्भावः, यथा—

अतिगुरवो राजभाषा न भक्ष्या इति॥४८॥

यन्मूला सती रूपकादिरलङ्कृतिः सरसोल्लेखो। तेन रूपकादेरलङ्करणकलापस्य सकलस्यैवोपचारवक्रता जीवितमित्यर्थः।

ननु च पूर्वस्मादुपचारवक्रताप्रकारादेतस्य को भेदः? पूर्वस्मिन् स्वभावविप्रकर्षात् सामान्येन मनाङ्मात्रमेव साम्यं समाश्रित्य सातिशयत्वं प्रतिपादयितुं तद्धर्ममात्राध्यारोपः प्रवर्तते, एतस्मिन् पुनरदूरविप्रकृष्टसादृश्यसमुद्भवप्रत्यासत्तिसमुचितत्वादभेदोचारनिबन्धनं तत्त्वमेवाध्यारोप्यते। यथा—

सत्स्वेव कालश्रवणोत्पलेषु सेनावनालीविषपल्लवेषु।

गाम्भीर्यपातालफणीश्वरेषु खड्गेषु को वा भवतां मुरारिः॥४९॥

अत्र कालश्रवणोत्पलादिसादृश्यजनितप्रत्यासत्तिविहितमभेदोपचारनिबन्धनं तत्त्वमध्यारोपितम्।

'आदि'- ग्रहणादप्रस्तुतप्रशंसाप्रकारस्य कस्यचिदन्यापदेशलक्षणस्यो-पचारवक्रतैव जीवितत्वेन लक्ष्यते।

तथा च किमपि पदार्थान्तरं प्राधान्येन प्रतीयमानतया चेतसि निधाय तथाविधलक्षणसाम्यसमन्वयं समाश्रित्य पदार्थान्तरमभिधीयमानतां प्रापयन्तः प्रायशः कवयो दृश्यन्ते। यथा—

अनर्घः कोऽप्यस्तस्तव हरिण हेवाकमहिमा

स्फुरत्येकस्यैव त्रिभुवनचमत्कारजनकः।

यदिन्दोर्मूर्तिस्ते दिवि विहरणारण्यवसुधा

सुधासारस्यन्दी किरणनिकरः शष्पकवलः॥५०॥

अत्र लोकोत्तरत्वलक्षणमुभयानुयायि सामान्यं समाश्रित्य प्राधान्येन विवक्षितस्य वस्तुनः प्रतीयमानवृत्तेरभेदोपचारनिबन्धनं तत्त्वमध्यारोपितम्। यथा चैतयोर्द्वयोरप्यलङ्कारयोस्तुल्येऽप्युपचारवक्रताजीवितत्वे वाच्यत्वमेकत्र प्रतीयमानत्वमपरस्मिन् स्वरूपभेदस्य निबन्धनम्। एतच्चोभयोरपि स्वलक्षणव्याख्यानावसरे समुन्मील्यते।

एवमुपचारवक्रतां विवेच्य समनन्तरप्राप्तावकाशां विशेषणवक्रतां विविनक्ति—

विशेषणस्य माहात्म्यात् क्रियायाः कारकस्य वा।

यत्रोल्लसति लावण्यं सा विशेषणवक्रता॥१५॥

सा विशेषणवक्रता विशेषणवक्रत्वविच्छित्तिरभिधीयते। कीदृशी यत्र यस्यां लावण्यमुल्लसति रामणीयकमुद्भिद्यते। कस्य— क्रियायाः कारकस्य वा। क्रियालक्षणस्य

वस्तुनः कारकलक्षणस्य वा। कस्मात्—विशेषणस्य माहात्म्यात्। एतयोः प्रत्येकं यद्विशेष्णं भेदकं (तस्य माहात्म्यात्) पदार्थान्तरस्य सातिशयत्वात्। किं तत्सातिशयत्वम्—भावस्वभावसौकुमार्यसमुल्लासकत्वमलङ्कारच्छायातिशयपरिपोषकत्वं च। यथा—

श्रमजलसेकजनिततनवलिखितनखपददाहमूर्च्छिता

वल्लभरभसलुलितललितालकवलयचयार्धनिह्नुता।

स्मररसविविधविहितसुरतक्रमपरिमलनत्रपालसा

जयति निशात्यये युवतिदृक् तनुमधुमदविशदपाटला॥५१॥

यथा वा—

करान्तरालीनकपोलभित्तिर्बाष्पोच्छलत्कूणितपत्रलेखा।

श्रोत्रान्तरे पिण्डितचित्तवृत्तिः शृणोति गीतध्वनिमत्र तन्वी॥५२॥

यथा वा —

शुचिशीतलचन्द्रिकाप्लुताश्चिरनिःशब्दमनोहरा दिशः।

प्रशमस्य मनोभवस्य वा हृदि तस्याप्यथ हेतुतां ययुः॥५३॥

क्रियाविशेषणवक्रत्वं यथा—

सस्मार वारणपतिर्विनिमीलिताक्षः।

स्वेच्छाविहारवनवासमहोत्सवानाम्॥५४॥

अत्र सर्वत्रैव स्वभावसौन्दर्यसमुल्लासक्त्वं विशेषणानाम्। अलङ्कारकच्छाया-परिपोषकत्वं विशेषणस्य। यथा—

शशिनः शोभातिरस्कारिणा॥५५॥

एतदेव विशेषणवक्रत्वं नाम प्रस्तुतौचित्यानुसारि सकलसत्काव्यजीवितत्वेन लक्ष्यते, यस्मादनेनैव रसः परां परिपोषपदवीमवतार्यते। यथा—

करान्तरालीन इति॥५६॥

एवं विशेषणवक्रतां विचार्य क्रमसमर्पितावसरां संवृत्त्विक्रता विचारयति—

यत्र संव्रियते वस्तु वैचित्र्यस्य विवक्षया।

सर्वनामादिभिः कश्चित् सोक्ता संवृतिवक्रता॥१६॥

सोक्ता संवृतिवक्रता—या किलैवंविधा सा संवृतिवक्रतेत्युक्ता कथिता। संवृत्या वक्रता संवृतिप्रधाना वेति समासः। यत्र यस्यां वस्तुपदार्थलक्षणं संव्रियते समाच्छाद्यते। केन हेतुना—वैचित्र्यस्य विवक्षया विचित्रभावस्याभिधानेच्छया। यया पदार्थो विचित्रभावं समासादयतीत्यर्थः। केन संव्रियते—सर्वनामादिभिः कैश्चित्। सर्वस्य नाम सर्वनाम तदादिर्येषां ते तथोक्तास्तैः कैश्चिदपूर्वैर्वाचकैरित्यर्थः।

अत्र बहवः प्रकाराः सम्भवन्ति। (१) यत्र किमपि सातिशयं वस्तु वक्तुं शक्यमपि साक्षादभिधानादियत्तापरिच्छिन्नतया परिमितप्रायं मा प्रतिभासतामिति सामान्यवाचिना सर्वनाम्नाच्छाद्य तत्कार्याभिधायिना तदतिशयाभिधानपरेण वाक्यान्तरेण प्रतीतिगोचरतां नीयते। यथा—

तत्पितर्यथ परिग्रहलिप्सौ स व्यधत्त करणीयमणीयः।

पुष्पचापशिखरस्थकपोलो मन्मथः किमपि येन निदध्यौ॥५८॥

अत्र सदाचारप्रवणतया गुरुभक्तिभावितान्तःकरणो लोकोत्तरौदार्यगुणयोगा-द्विविधविषयोपभोगवितृष्णमना निजेन्द्रियनिग्रहमसम्भावनीयमपि शान्तनवो विहितवानित्यभिधातुं शक्यमपि सामान्याभिधायिना सर्वनाम्नाच्छाद्योत्तरार्धेन कार्यान्तराभिधायिना वाक्यान्तरेण प्रतीतिगोचरतामानीयमानं कामपि चमत्कारकारितामावहति।

(२) अयमपरः प्रकारो यत्र स्वपरिस्पन्दकाष्ठाधिरूढेः सातिशयं वस्तु वचसामगोचर इति प्रथयितुं सर्वनाम्ना समाच्छाद्य तत्कार्याभिधायिना तदतिशयवाचिना वाच्यान्तरेण समुन्मील्यते। यथा –

याते द्वारवतीं तदा मधुरिपौ तद्दत्तकम्पानतां

कालिन्दीजलकेलिवञ्जुलतामालम्ब्य सोत्कण्ठया।

तद् गीतं गुरुबाष्पगद्गदगलत्तारस्वरं राधया

येनान्तर्जलचारिभिर्जलचरैरप्युत्कमुत्कूजितम्॥५९॥

अत्र सर्वनाम्ना संवृतं वस्तु तत्कार्याभिधायिना वाक्यान्तरेण समुन्मील्य सहृदयहृदयहारितां प्रापितम्। यथा वा—

तह रूण्णं कण्ह विसाहीआए रोहगग्गरगिराए।

जह कस्स वि जम्मसए वि कोइ मा वल्लहो होउ॥६०॥

(तथा रुदितं कृष्ण विशाख्या रोधगद्गदगिरा।

यथा कस्यापि जन्मशतेऽपि कोऽपि मा वल्लभो भवतु॥)

अत्र पूर्वार्धे संवृतं वस्तु रोदनलक्षणं तदतिशयाभिधायिना वाक्यान्तरेण कामपि तद्विदाह्लादकारितां नीतम्।

(३) इदमपरमत्र प्रकारान्तरं यत्र सातिशयसुकुमारं वस्तुकार्यातिशयाभिधानं विना संवृतिमात्ररमणीयतया कामपि काष्ठामधिरोप्यते। यथा –

दर्पणे च परिभोगदर्शिनी पृष्ठतः प्रणयिनो निषेदुषः।

वीक्ष्य बिम्बमनुबिम्बमात्मनः कानि कानि न चकार लज्जया॥६१॥

(४) अयमपरं प्रकारो यत्र स्वानुभवसंवेदनीयं वस्तु वचसा वक्तुमविषय इति ख्यापयितुं संव्रियते। यथा—

तान्यक्षराणि हृदये किमपि ध्वनन्ति॥६२॥

इति पूर्वमेव व्याख्यातम्।

(५) इदमपि प्रकारान्तरं सम्भवति यत्र परानुभवसंवेद्यस्य वस्तुनो वक्तुरगोचरतां प्रतिपादयितुं संवृतिः क्रियते। यथा—

मन्यथः किमपि येन निदध्यौ॥६३॥

अत्र त्रिभुवनप्रथितप्रतापमहिमा तथाविधशक्तिव्याघातविषण्णचेताः कामः किमपि स्वानुभवसमुचितमचिन्तयदिति।

(६) इदमपरं प्रकारान्तरमत्र विद्यते—यत्र स्वभावेन कविविवक्षया वा केनचिदौपहत्येन युक्तं वस्तु महापातकमिव कीर्तनीयतां नार्हतीति समर्पयितुं संव्रियते।

दुर्वचं तदथ मास्म भून्मृगस्त्वय्यसौ यदकरिष्यदोजसा।

नैनमाशु यदि वाहिनीपतिः प्रत्यपत्स्यत शितेन पत्रिणा॥६४॥

यथा वा—

निवार्थतामालि किमप्ययं वटुः पुनर्विवक्षुः स्फुरितोत्तराधरः।

न केवलं यो महतोऽपभाषते शृणोति तस्मादपि यः स पापभाक्॥६५॥

अत्रार्जुनमारणं भगवदपभाषणं च न कीर्तनीयतामर्हतीति संवरणेन रमणीयतां नीतम्। कविविवक्षयोपहतं यथा—

सोऽयं दम्भधृतव्रतः प्रियतमे कर्तुं किमप्युद्यतः॥६६॥

इति प्रथममेव व्याख्यातम्।

एवं संवृतिवक्रतां विचार्य प्रत्ययवक्रतायाः कोऽपि प्रकारः पदमध्यान्तर्भूतत्वादिहैव समुचितावसरस्तस्मात्तद्विचारमाचरति—

प्रस्तुतौचित्यविच्छित्तिं स्वमहिम्ना विकासयन्।

प्रत्ययः पदमध्येऽन्यामुल्लासयति वक्रताम्॥१७॥

कश्चित् प्रत्ययः कृदादिः पदमध्यवृत्तिरन्यामपूर्वां वक्रतामुल्लासयति वक्रभावमुद्दीपयति। किं कुर्वन्—प्रस्तुतस्य वर्ण्यमानस्य वस्तुनो यदौचित्यमुचितभावस्तस्य विच्छित्तिमुपशोभां विकासयन् समुल्लासयन्। केन – स्वमहिम्ना निजोत्कर्षेण। यथा—

वेल्लद्बलाका घनाः॥६७॥

यथा वा—

स्निह्यत्कटाक्षे दृशौ इति॥६८॥

अत्र वर्तमानकालाभिधायी शतृप्रत्ययः कामप्यतीतानागतविभ्रमविरहितां तात्कालिकपरिस्पन्दसुन्दरीं प्रस्तुतौचित्यविच्छित्तिं समुल्लासयन् सहृदयहृदयहारिणीं प्रत्ययवक्रतामावहति।

इदानीमेतस्याः प्रकारान्तरं पर्यालोचयति—

आगमादिपरिस्पन्दसुन्दरः शब्दवक्रताम्।

परः कामपि पुष्णाति बन्धच्छायाविधायिनीम्॥१८॥

परो द्वितीयः प्रत्ययप्रकारः कामप्यपूर्वां शब्दवक्रतामाबध्नाति वाचकवक्रभावं विदधाति। कीदृक्— आगमादिपरिस्पन्दसुन्दरः। आगमो मुमादिरादिर्यस्य स तथोक्तः, तस्यागमादेः परिस्पन्दः स्वविलसितं तेन सुन्दरः सुकुमारः। कीदृशीं शब्दवक्रताम्— बन्धच्छायाविधायिनीं सन्निवेशकान्तिकारिणीमित्यर्थः। यथा—

जाने सख्यास्तव मयि मनः सम्भृतस्नेहमस्मा-

दित्थम्भूतां प्रथमविरहे तामहं तर्कयामि।

वाचालं मां न खलु सुभगंमन्यभावः करोति

प्रत्यक्षं ते निखिलमचिराद् भ्रातरुक्तं मया यत्॥६९॥

यथा च—

दाह्रोऽम्भः प्रसृतिंपचः इति॥७०॥

यथा वा—

पायं पायं कलाचीकृतकदलदलम् इति॥७१॥

अत्र सुभगंमन्यभावप्रभृतिशब्देषु मुमादिपरिस्पन्दसुन्दराः सन्निवेशच्छायाविधायिनीं वाचकवक्रतां प्रत्ययाः पुष्णन्ति।

एवं प्रसङ्गसमुचितां पदमध्यवर्तिप्रत्ययवक्रतां विचार्य समनन्तरसम्भविनीं वृत्तिवक्रतां विचारयति—

अव्ययीभावमुख्यानां वृत्तीनां रमणीयता।

यत्रोल्लसति सा ज्ञेया वृत्तिवैचित्र्यवक्रता॥१९॥

सा वृत्तिवैचित्र्यवक्रता ज्ञेया बोद्धव्या। वृत्तीनां वैचित्र्यं विचित्रभावः सजातीयापेक्षया सौकुमार्योत्कर्षस्तेन वक्रता वक्रभावविच्छित्तिः। कीदृशी—रमणीयता यत्रोल्लसति। रामणीयकं यस्यामुद्भिद्यते। कस्य—वृत्तीनाम्। कासाम्—अव्ययीभावमुख्यानाम्। अव्ययीभावः समासः मुख्यः प्रधानभूतो यासां तास्तथोक्तास्तासां समास-तद्धितसुब्धातुवृत्तीनां वैयाकरप्रसिद्धानाम्। तदयमत्रार्थः—यत्र स्वपरिस्पन्दसौन्दर्यमेतासां समुचितभित्तिभागोपनिबन्धादभिव्यक्ति-मासादयति। यथा—

अभिव्यक्तिं तावद् बहिरलभमानः कथमपि

स्फुरन्नन्तः स्वात्मन्यधिकतरसम्मूर्च्छितभरः।

मनोज्ञामुद्भितां परपरिमलस्पन्दसुभगा-

मह्रा धत्ते शोभामधिमधु लतानां नवरसः॥७२॥

अत्र 'अधिमधु'–शब्दे विभक्त्यर्थविहितः समासः समयाभिधाय्यपि विषयसप्तमीप्रतीतिमुत्पादयन् 'नवरस'-शब्दस्य श्लेषच्छायास्फुरणवैचित्र्यमुन्मीलयति। एतद्वृत्तिविरहिते विन्यासान्तरे वस्तुप्रतीतौ सत्यामपि न तादृक तद्विदाह्लादकारित्वम्। उद्वृत्तपरिमल-स्पन्द-सुभगशब्दानामुपचारवक्रत्वं परिस्फुरद्विभाव्यते। यथा च—

आ स्वर्लोकादुरगनगरं नूतनालोकलक्ष्मी-

मातन्वद्भिः किमिव सिततां चेष्टितैस्ते न नीतम्।

अप्येतासां दयितविहिता विद्विषत्सुन्दरीणां

यैरानीता नखपदमया मण्डना पाण्डिमानम्॥७३॥

अत्र पाण्डुत्व-पाण्डुता—पाण्डुभाव-शब्देभ्यः पाण्डिम-शब्दस्य किमपि वृत्तिवैचित्र्यवक्रत्वं विद्यते।

यथा च—

कान्तत्वीयति सिंहलीमुखरुचां चूर्णाभिषेकोल्लस-

ल्लावण्यामृतवाहिनिर्झरजुषामाचान्तिभिश्चन्द्रमाः।

येनापानमहोत्सवव्यतिकरेष्वेकातपत्रायते

देवस्य त्रिदशाधिपावधि जगज्जिष्णोर्मनोजन्मनः॥७४॥

अत्र सुब्धातुवृत्तेः समासवृत्तेश्च किमपि वक्रतावैचित्र्यं परिस्फुरति।

साध्यतामप्यनादृत्य सिद्धत्वेनाभिधीयते।

यत्र भावो भवत्येषा भाववैचित्र्यवक्रता॥२०॥

एषा वर्णितार्थस्वरूपा भाववैचित्र्यवक्रता भवत्यस्ति। भावो धात्वर्थरूपस्तस्य वैचित्र्यं विचित्रभावः प्रकारान्तराभिधानव्यतिरेकि रामणीयकं तेन वक्रता वक्रत्वविच्छित्तिः। कीदृशी— यत्र यस्यां भावः सिद्धत्वेन परिनिष्पन्नत्वेनाभिधीयते भण्यते। किं कृत्वा—

साध्यतामप्यनादृत्य निष्पाद्यमानतां प्रसिद्धामप्यवधीर्य। तदिदमत्र तात्पर्यम्—यत् साध्यत्वेनापरिनिष्पत्तेः प्रस्तुतस्यार्थस्य दुर्बलः परिपोषः. तस्मात् सिद्धत्वेनाभिधानं परिनिष्पन्नत्वात्पर्याप्तं प्रकृतार्थपरिपोषमावहति। यथा—

श्वासायासमलीमसाधाररुचेर्दोःकन्दलीतानवात्।

केयूरायितमङ्गदैः परिणतं पाण्डिम्नि गण्डत्विषा।

अस्याः किञ्च विलोचनोत्पलयुगेनात्यन्तमश्रुस्रुता।

तारं तादृगपाङ्गयोररुणितं येनोत्प्रतापः स्मरः॥७५॥

यत्र भावस्य सिद्धत्वेनाभिधानमतीव चमत्कारकारि।

एवं भाववक्रतां विचार्य प्रातिपदिकान्तर्वर्तिनीं लिङ्गवक्रतां विचारयति—

भिन्नयोर्लिङ्गयोर्यस्यां सामानाधिकरण्यतः।

कापि शोभाभ्युदेत्येषा लिङ्गवैचित्र्यवक्रता॥२१॥

एषा कथितस्वरूपा लिङ्गवैचित्र्यवक्रतास्त्र्यादिविचित्रभाववक्रताविच्छित्तिः। भवतीति सम्बन्धः, क्रियान्तराभावात्। कीदृशी— यस्यां यत्र विभिन्नयोर्विभक्तस्वरूपयोर्लिङ्गयोः सामानाधिकरण्यतास्तुल्याश्रयत्वादेकद्रव्यवृत्तित्वात् काप्यपूर्वा शोभाभ्युदेति कान्तिरुल्लसति।

यथा—

यस्यारोपणकर्मणापि बहवो वीरव्रतं त्याजिताः

कार्यं पुङ्खितबाणमीश्वरधनुस्तद्दोर्भिरेभिर्मया।

स्त्रीरत्नं तदगर्भसम्भवमितो लभ्यं च लीलायिता

तेनैषा मम फुल्लपङ्कजवनं जाता दृशां विंशतिः॥७६॥

यथा वा —

नभस्वता लासितकल्पवल्लीप्रबालबालव्यजनेन यस्य।

उरःस्थलेऽकीर्यत दक्षिणेन सर्वास्पदं सौरभमङ्गरागः॥७७॥

यथा च—

आयोज्य मालामृतुभिः प्रयत्नसम्पादितामंसतटेऽस्य चक्रे।

करारविन्दं मकरन्दबिन्दुस्यन्दि श्रिया विभ्रमकर्णपूरः॥७८॥

इयमपरा च लिङ्वैचित्र्यवक्रता—

सति लिङ्गान्तरे यत्र स्त्रीलिङ्गं च प्रयुज्यते।

शोभानिष्पत्तये यस्मान्नामैव स्त्रीति पेशलम्॥२२॥

यत्र यस्यां लिङ्गान्तरे सत्यन्यस्मिन् सम्भवत्यपि लिङ्गे स्त्रीलिङ्गं प्रयुज्यते निबध्यते। अनेकलिङ्गत्वेऽपि पदार्थस्य स्त्रीलिङ्गविषयः प्रयोगः क्रियते। किमर्थम्— शोभानिष्पत्तये। कस्मात् कारणात्— यस्मान्नामैव स्त्रीति पेशलम्। स्त्रीत्यभिधानमेव हृदयहारि। विच्छित्त्यन्तरेण रसादियोजनयोग्यत्वात्। उदाहरणं, यथा—

यथेयं ग्रीष्मोष्मव्यतिकरवती पाण्डुरभिदा

मुखोद्भिन्नम्लानानिलतरलवल्लीकिसलया।

तटी तारं ताम्यत्यतिशशियशाः कोऽपि जलद-

स्तथा मन्ये भावी भुवनवलयाक्रान्तिसुभगा॥७६॥

अत्र त्रिलिङ्गत्वे सत्यपि 'तट'शब्दस्य, सौकुमार्यात् स्त्रीलिङ्गमेव प्रयुक्तम्। तेन विच्छित्त्यन्तरेण भावी नायकव्यवहारः कश्चिदासूत्रित इत्यतीव रमणीयत्वाद्वक्रतामावहति।।

इदमपरमेतस्याः प्रकारान्तरं लक्षयति—

विशिष्टं योज्यते लिङ्गमन्यस्मिन् सम्भवत्यपि।

यत्र विच्छित्तये सान्या वाच्यौचित्यानुसारतः॥२३॥

सा चोक्तस्वरूपान्यापरा विद्यते। यत्र यस्यां विशिष्टं योज्यते लिङ्गत्रयाणामेकतमं किमपि कविविवक्षया निबध्यते। कथम्—अन्यस्मिन् सम्भवत्यपि, लिङ्गान्तरे विद्यमानेऽपि। किमर्थम्—अविच्छित्तये शोभायै। कस्मात् कारणात्—वाच्यौचित्यानुसारतः। वाच्यस्य वर्ण्यमानस्य वस्तुनो यदौचित्यमुक्तिभावस्तस्यानुसरणमनुसारस्तस्मात्। पदार्थौचित्यमनु-सृत्येत्यर्थः। यथा—

त्वं रक्षसा भीरु यतोऽपनीता तं मार्गमताः कृपया लता मे।

अदर्शयन् वक्तुमशक्नुवन्त्यः शाखाभिरावर्जितपल्लवाभिः॥८०॥

अत्र सीतया सह रामः पुष्पकेणावतरंस्तस्याः स्वयमेव तद्विरहवैधुर्यमावेदयति—यत्त्वं रावणेन तथाविधत्वरापरन्त्रचेतसा मार्गे यस्मिन्नपनीता तत्र तदुपमर्दवशात्तथाविधसंस्थानयुक्तत्वं लतानामुन्मुखत्वं मम त्वन्मार्गानुमानस्य निमित्ततामापन्नमिति वस्तु विच्छित्त्यन्तरेण रामेण योज्यते। यथा–हे भीरु स्वाभाविकसौकुमार्यकातरान्तःकरणे, रावणेन तथाविधक्रूरकर्मकारिणा यस्मिन्मार्गे त्वमपनीता तमेताः साक्षात्परिदृश्यमानमूर्तयो लताः किल मामदर्शयन्निति। तन्मार्गप्रदर्शनं परमार्थतस्तासां निश्चेतनया न सम्भाव्यम् इति प्रतीयमानवृत्तिरुत्प्रेक्षालङ्कारः कवेरभिप्रेतः। यथा–तव भीरुत्वं रावणस्य क्रौर्यं ममापि त्वत्परित्राणप्रयत्नपरतां पर्यालोच्य स्त्रीस्वभावादार्द्रहृदयत्वेन समुचितस्वविषयपक्षपातमाहात्म्यादेताः कृपयैव मम मार्गप्रदर्शनमकुर्वन्निति। केन करणभूतेन—शाखाभिरावर्जितपल्लवाभिः। यस्माद्वागिन्द्रियवर्जितत्वाद्वक्तुमशक्नुवन्त्यः। यत्किल ये केचिदजल्पन्तो मार्गप्रदर्शनं प्रकुर्वन्ति ते तदुन्मुखीभूतहस्तपल्लवैर्बाहुभिरित्येतदतीव युक्तियुक्तम्। तथा चात्रैव वाक्यान्तरमपि विद्यते—

मृग्यश्च दर्भाङ्कुरनिर्व्यपेक्षास्तवागतिज्ञं समबोधयन्माम्।

व्यापारयन्त्यो दिशि दक्षिणस्यामुत्पक्ष्मराजीनि विलोचनानि॥८१॥

हरिण्यश्च मां समबोधयन्। कीदृशम्—तवागतिज्ञम्, लताप्रदर्शितमार्गमजानन्तम्। ततस्ताः सम्यगबोधयन्निति, यतस्तास्तदपेक्षया किञ्चित्प्रबुद्धा इति। ताश्च कीदृश्यः– तथाविधवैशससन्दर्शनवशाद् दुःखितत्वेन परित्यक्ततृणग्रासाः। किं कुर्वाणाः- तस्यां दिशि नयनानि समर्पयन्त्यः। कीदृशानि—ऊर्ध्वीकृतपक्ष्मपङ्क्तीनि। तदेवं तथाविधस्थानयुक्तत्वेन दक्षिणां दिशमन्तरिक्षेण नीतेति संज्ञेया निवेदयन्त्यः। अत्र वृक्षमृगादिषु लिङ्गान्तरेषु सम्भवत्स्वपि स्त्रीलिङ्गमेव पदार्थौचित्यानुसारेण चेतनचमत्कारकारितया कवेरभिप्रेतम्। तस्मात् कामपि वक्रतामावहति।

एवं प्रातिपदिकलक्षणस्य सुबन्तसम्भविनः पदपूर्वार्धस्य यथासम्भवं वक्रभावं विचार्येदानीमुभयोरपि सुप्तिङन्तयोर्धातुस्वरूपः पूर्वभागो यः सम्भवति तस्य वक्रतां विचारयति। तस्य च क्रियावैचित्र्यनिबन्धनमेव वक्रत्वं विद्यते। तस्मात् क्रियावैचित्र्यस्यैव कीदृशाः कियन्तश्च प्रकाराः सम्भवन्तीति तत्स्वरूपनिरूपणार्थमाह—

कर्तुरत्यन्तरङ्गत्वं कर्त्रन्तरविचित्रता।

स्वविशेषणवैचित्र्यमुपचारमनोज्ञता॥२४॥

कर्मादिसंवृतिः पञ्च प्रस्तुतौचित्यचारवः।

क्रियावैचित्र्यवक्रत्वप्रकारास्त इमे स्मृताः॥२५॥

क्रियावैचित्र्यवक्रत्वप्रकारा धात्वर्थविचित्रभाववक्रताप्रभेदास्त इमे स्मृता वर्ण्यमानस्वरूपाः कीर्तिताः। कियन्तः—पञ्च पञ्चसंख्याविशिष्टाः। कीदृशाः– प्रस्तुतौचित्यचारवः। प्रस्तुतं वर्ण्यमानं वस्तु तस्य यदौचित्यमुचितभावस्तेन चारवो रमणीयाः। तत्र प्रथमस्तावत् प्रकारो यः– कर्तुरत्यन्तरङ्गत्वं नाम। कर्तुः स्वतन्त्रतया

मुख्यभूतस्य कारकस्य क्रियां प्रति निर्वर्तयितुर्यदत्यन्तरङ्गत्वम् अत्यन्तमान्तरतम्यम्। यथा—

चूडारत्ननिषण्णदुर्वहजगद्भारोन्नमत्कन्धरो

धत्तामुद्धरतामसौ भगवतः शेषस्य मूर्धा परम्।

स्वैरं संस्पृशतीषदप्यवनतिं यस्मिन् लुठन्त्यक्रमं

शून्ये नूनमियन्ति नाम भुवनान्युद्दामकम्पोत्तरम्॥८२॥

अत्रोद्धुरताधारणलक्षणक्रियाकर्तुः फणीश्वरमस्तकस्य प्रस्तुतौचित्यमाहात्म्यादन्तर्भावं यथा भजते तथा नान्या काचिदिति क्रियावैचित्र्यवक्रतामावहति। यथा वा—

किं शोभिताहमनयेति पिनाकपाणेः।

पृष्टस्य पातु परिचुम्बनमुत्तरं वः॥८३॥

अत्र चुम्बनव्यतिरेकेण भगवता तथाविधलोकोत्तरं गौरीशोभातिशयाभिधानं न केनचित् क्रियान्तरेण कर्तुं पार्यत इति क्रियावैचित्र्यनिबन्धनं वक्रभावमावहति। यथा च—

रुद्दस्य तइअणअण पव्वइपरिचूम्बिअं जअइ॥८४॥

(रुद्रस्य तृतीयनयनं पार्वतीपरिचुम्बतं जयति।)

यथा वा—

सिढिलिअचाआओ जअइ मअरद्धओ॥८५॥

(शिथिलितचापो जयति मकरध्वजः।)

एतयोर्वैचित्र्यं पूर्वमेव व्याख्यातम्।

अयमपरः क्रियावैचित्र्यवक्रतायाः प्रकारः— कर्त्रन्तरविचित्रता। अन्यः कर्ता कर्त्रन्तरं तस्माद्विचित्रता वैचित्र्यम्। प्रस्तुतत्वात् सजातीयत्वाच्च कर्तुरेव। एतदेव च तस्य वैचित्र्यं यत् क्रियामेव कर्त्रन्तरापेक्षया विचित्रस्वरूपां सम्पादयति। यथा —

नैकत्र शक्तिविरतिः क्वचिदस्ति सर्वे

भावाः स्वभावपरिनिष्ठिततारतम्याः।

आकल्पमौर्वदहनेन निपीयमान-

मम्भोधिमेकचुलुकेन पपावगस्त्यः॥८६॥

अत्रैकचुलुकेनाम्भोधिपानं सतताध्यवसायाभ्यासकाष्ठाधिरुढिप्रौढत्वाद्वाडवाग्नेः किमपि क्रियावैचित्र्यमुद्वहत् कामपि वक्रतामुन्मीलयति।

यथा वा —

प्रपन्नार्तिच्छिदो नखाः॥८७॥

यथा वा—

स दहतु दुरितं शाम्भवो वः शराग्निः॥८८॥

एतयोर्वैचित्र्यं पूर्वमेव प्रदर्शितम्।

अयमपरः क्रियावैचित्र्यवक्रतायाः प्रभेदः— स्वविशेषणवैचित्र्यम्। मुख्यतया— प्रस्तुतत्वात् क्रियायाः स्वयमात्मनो यद् विशेषणं भेदकं तेन वैचित्र्यं विचित्रभावः। यथा—

इत्युद्गते शशिनि पेशलकान्तिदूती-

संलापसंवलितलोचनमानसाभिः।

अग्राहि मण्डनविधिर्विपरीतभूषा-

विन्यासहासितसखीजनमङ्गनाभिः॥८९॥

अत्र मण्डनविधिग्रहणलक्षणायाः क्रियाया विपरीतभूषाविन्यासहासितसखीजनमिति विशेषणेन किमपि सौकुमार्यमुन्मीलितम्। यस्मात्तथाविधादरोपरचितं प्रसाधनं यस्य व्यञ्जकत्वेनोपात्तं मुख्यतया वर्ण्यमानवृत्तेर्वल्लभानुरागस्य सोऽप्यनेन सुतरां समुत्तेजितः।

यथा वा—

मय्यासक्तश्चकितहरिणीहारिनेत्रत्रिभागः॥९०॥

अस्य वैचित्र्यं पूर्वमेवोदितम्। एतच्च क्रियाविशेषणं द्वयोरपि क्रियाकारकयोर्वक्रत्वमुल्लासयति। यस्माद्विचित्रक्रियाकारित्वमेव कारकवैचित्र्यम्।

इदमपरं क्रियावैचित्र्यवक्रतायाः प्रकारान्तरम्—उपचारमनोज्ञता। उपचारः—सादृश्यादिसमन्वयं समाश्रित्य धर्मान्तराध्यारोपस्तेन मनोज्ञता वक्रत्वम्। यथा—

तरन्तीवाङ्गानि स्खलदमललावण्यजलधौ

प्रथिम्नः प्रागल्भ्यं स्तनजघनमुन्मुद्रयति च।

दृशोर्लीलारम्भाः स्फुटमपवदन्ते सरलता-

महो सारङ्गाक्ष्यास्तरुणिमनि गाढः परिचयः॥९१॥

अत्र स्खलदमललावण्यजलधौ समुल्लसद्विमलसौन्दर्यसम्भारसिन्धौ परिस्फुरन्त्यपि स्पन्दतया प्लवमानत्वेन लक्ष्यमाणानि पारप्राप्तिमासादयितुं व्यवस्यन्तीवेति चेतनपदार्थसम्भाविसादृश्योपचारात्तारुण्यतरलतरूणीगात्राणां तरणमुत्प्रेक्षितम्। उत्प्रेक्षायाश्चोपचार एव भूयसा जीवितत्वेन परिस्फुरतीत्युत्प्रेक्षावसर एव विचारयिष्यते। प्रथिम्नः प्रागल्भ्यं स्तनजघनमुन्मुद्रयति च (इति) — अत्र स्तनजघनं कर्तृ प्रथिम्नः प्रागल्भ्यं महत्त्वस्य प्रौढिमुन्मुद्रयत्युन्मीलयति। यथा कश्चिच्चेतनः किमपि रक्षणीयं वस्तु मुद्रयित्वा कमपि समयमवस्थाप्य समुचितोपयोगावसरे स्वयमुन्मुद्रयत्युद्घटयति, तदेवं तत्कारित्वसाम्यात् स्तनजघनस्योन्मुद्रणमुपचरितम्। तदिदमुक्तं भवति—यत् यदेव शैशवदशायां शक्त्यात्मना निभालितस्वरूपमनवस्थितमासीत्, तस्य प्रथिम्नः प्रागल्भ्यस्य प्रथमतरतारुण्यावतारावसरसमुचितं प्रथनप्रसरं समर्पयति। दृशोर्लीलारम्भाः स्फुटमवदन्ते सरलताम् (इति) – अत्र शैशवप्रतिष्ठितां स्पष्टतां प्रकटमेवापसार्य दृशोर्विलासोल्लासाः कमपि नवयौवनसमुचितं विभ्रममधिरोपयन्ति। यथा केचिच्चेतनाः कुत्रचिद्विषये कमपि व्यवहारं

समासादितप्रसरमपसार्य किमपि स्वाभिप्रायाभिमतं परिस्पन्दान्तरं प्रतिष्ठापयन्तीति तत्कारित्वसादृश्याल्लीलावतीलोचनविलासोल्लासानां सरलत्वापदनमुपचरितम्। तदेवंविधेनोपचारेणैतास्तिस्रोऽपि क्रियाः कामपि वक्रतामधिरोपिताः। वाक्येऽस्मिन्नपरेऽपि वक्रताप्रकाराः प्रतिपदं सम्भवन्तीत्यवसरावन्तरे विचार्यन्ते।

इदमपरं क्रियावैचित्र्यवक्रतायाः प्रकारान्तरम्—कर्मादिसंवृतिः। कर्मप्रभृतीनां कारकाणां संवृतिः संवरणम् प्रस्तुतौचित्यानुसारेण सातिशयप्रतीतये समाच्छाद्याभिधा। सा च क्रियावैचित्र्यकारित्वात् प्रकारत्वेनाभिधीयते।

कारणे कार्योपचारद् यथा—

नेत्रान्तरे मधुरमर्पयतीव किञ्चित्

कर्णान्तिके कथयतीव किमप्यपूर्वम्।

अन्तःसमुल्लिखति किञ्चिदिवायताक्ष्या

रागालसे मनति रम्यपदार्थलक्ष्मीः॥९२॥

अत्र तदनुभवैकगोचरत्वादनाख्येयत्वेन किमपि सातिशयं प्रतिपदं कर्म सम्पादयन्त्यः क्रियाः स्वात्मनि कमपि वक्रभावमुद्भावयन्ति। उपचारमनोज्ञाताप्यत्र विद्यते। यस्मादर्पणकथनोल्लेखनान्युपचारनिबन्धनान्येव चेतनपदार्थधर्मत्वात्। यथा च—

नृत्तारम्भाद्विरतरभसस्तिष्ठ तावन्मुहूर्तं

यावन्मौलौ श्लथमचलतां भूषणं ते नयामि।

इत्याख्याय प्रणयमधुरं कान्तया योज्यमाने

चूडाचन्द्रे जयति सुखिनः कोऽपि शर्वस्य गर्वः॥९३॥

अत्र 'कोऽपि' इत्यनेन सर्वनामपदेन तदनुभवैकगोचरत्वादव्यपदेश्यत्वेन सातिशयः शर्वस्य गर्व इति कर्तृसंवृतिः। जयति सर्वोत्कर्षेण वर्तते इति क्रियावैचित्र्यनिबन्धनम्।

इत्ययं पदपूर्वार्धवक्रभावो व्यवस्थितः।

दिङ्मात्रमेवैतस्य शिष्टं लक्ष्ये निरूप्यते॥९४॥

इति संग्रहश्लोकः।

तदेवं सुप्तिङन्तयोर्द्वयोरपि पदपूर्वार्धस्य प्रातिपदिकस्य धातोश्च यथायुक्ति वक्रतां विचार्येदानीं तयोरेव यथास्वमपरार्धस्य प्रत्ययलक्षणस्य वक्रतां विचारयति। तत्र क्रियावैचित्र्यवक्रतायाः समनन्तरसम्भविनः क्रमसमन्वितत्वात् कालस्य वक्रत्वं पर्यालोच्यते, क्रियापरिच्छेदकत्वात्तस्य।

औचित्यान्तरतम्येन समयो रमणीयताम्।

याति यत्र भवत्येषा कालवैचित्र्यवक्रता॥२६॥

एषा प्रकान्तस्वरूपा भवत्यस्ति कालवैचित्र्यवक्रता। कालो वैयाकरणादिप्रसिद्धो वर्तमानादिर्लट्प्रभृतिप्रत्ययवाच्यो यः पदार्थानामुदयतिरोधानविधायी तस्य वैचित्र्यं विचित्रभावस्तथाविधत्वेनोपनिबन्धस्तेन वक्रता वक्रत्वविच्छित्तिः। किंदृशी—यत्र यस्यां समयः कालाख्यो रमणीयतां याति रामणीयकं गच्छति। केन हेतुना—औचित्यान्तरतम्येन। प्रस्तुतत्वात्प्रस्तावाधिकृतस्य वस्तुनो यदौचित्यमुचितभावस्तस्यान्तरतम्येनान्तरङ्गत्वेन। तदतिशयोत्पादकत्वेनेत्यर्थः।

यथा—

समविसमणिव्विसेसा समंतदो मंदमंदसंचारा।

अइरो होहिति पहा मणोरहाणं पि दुल्लंघा॥९५॥

(समविषमनिर्विशेषाः समन्ततो मन्दमन्दसञ्चाराः।

अचिराद्भविष्यन्ति पन्थानो मनोरथानामपि दुर्लङ्घ्याः॥)

अत्र वल्लभाविरहवैधुर्यकातरान्तःकरणेन भाविनः समयस्य सम्भावनानुमानमाहात्म्यमुत्प्रेक्ष्य उद्दीपनविभावत्वविभवविलसितं तत्परिस्पन्दसौन्दर्यसन्दर्शनासहिष्णुना किमपि भयविसंष्ठुलत्वमनुभूय शङ्काकुलत्वेन केनचिदेतदभिधीयते—यदचिराद् भविष्यन्ति पन्थानो मनोरथानामप्यलङ्घनीया इति—भविष्यकालाभिधायी प्रत्ययः कामप्यपरार्धवक्रतां विकासयति। यथा वा—

यावत्किञ्चिदपूर्वमार्द्रमनसामावेदयन्तो नवाः

सौभाग्यातिशयस्य कामपि दशां मन्तुं व्यवस्यन्त्यमी।

भावास्तावदनन्यजस्य विधुरः कोऽप्युद्यमो जृम्भते

पर्याप्ते मधुविभ्रमे तु किमयं कर्तेति कम्पामहे॥९६॥

अत्र व्यवस्यन्ति जृम्भते कर्ता कम्पामहे चेति प्रत्ययाः प्रत्येकं प्रति नियतकालाभिधायिनः कामपि पदपरार्धवक्रतां प्रख्यापयन्ति। तथा च—प्रथमतरावतीर्णमधुसमयसौकुमार्यसमुल्लसितसुन्दरपदार्थसार्थसमुन्मेषसमुद्दीपितसहजविभव-विलसितत्वेन मकरकेतोर्मनाङ्मात्रमाधवसानाथ्यसमुल्लसितातुलशक्तेः सरसहृदयविधुरता-विधायी कोऽपि संरम्भः समुज्जृम्भते। तस्मादनेनानुमानेन परं परिपोषमधिरोहति कुसुमाकरविभवविभ्रमे मानिनीमानदलनदुर्ललितसमुदितसहजसौकुमार्य-सम्पत्संजनितसमुचितजिगीषावसरः किमसौ विधास्यतीति विकल्पयन्तस्तत्कुसुमशर-निकरनिपातकातरान्तःकरणाः किमपि कम्पामहे चकितचेतसः सम्पद्यामहे इति प्रियतमाविरहविधुरचेतसः सरसहृदयस्य कस्यचिदेतदभिधानम्।

एवं कालवक्रतां विचार्य क्रमसमुचितावसरां कारकवक्रतां विचारयति—

यत्र कारकसामान्यं प्राधान्येन निबध्यते।

तत्त्वाध्यारोपणान्मुख्यगुणभावाभिधानतः॥२७॥

परिपोषयितुं काञ्चिद्भङ्गीभणितिरम्यताम्।

कारकाणां विपर्यासः सोक्ता कारकवक्रता॥२८॥

सोक्ता कारकवक्रता सा कारकवक्रत्वविच्छत्तिरभिहिता। कीदृशी—यस्यां कारकाणां विपर्यासः साधनानां विपरिवर्तनम्, गौणमुख्ययोरितरेतरत्वापत्तिः। कथम् – यत् कारकसामान्यं मुख्यापेक्षया करणादि तत् प्राधान्येन मुख्यभावेन प्रयुज्यते। कया युक्त्या—तत्वाध्यारोपणात्। तदिति मुख्यपरामर्शः., तस्य भावस्तत्त्वं तदध्यारोपणात् मुख्यभावसमर्पणात्। तदेवं मुख्यस्य का व्यवस्थेत्याह – मुख्यगुणभावाभिधानतः। मुख्यस्य यो गुणभावस्तदभिधानादमुख्यत्वेनोपनिबन्धादित्यर्थः। किमर्थम्—परिपोषयितुं काञ्चित् भङ्गीभणितिरम्यताम्। काञ्चिदपूर्वां विच्छित्त्युक्तिरमणीयतामुल्लासयितुम्। तदेवमचेतनस्यापि चेतनसम्भविस्वातन्त्र्यसमर्पणादमुख्यस्य करणादेर्वा कर्तृत्वाध्यारोपणाद्यत्र कारकविपर्यासश्चमत्कारी सम्पद्यते। यथा—

याच्ञां दैन्यपरिग्रहप्रणयिनीं नेक्ष्वाकवः शिक्षिताः।

सेवासंवलितः कदा रघुकुले मौलौ निबद्धोऽञ्जलिः।

सर्वं तद्विहितं तथाप्युदधिना नैवोपरोधः कृतः

पाणिः सम्प्रति मे हठात् किमपरं स्प्रष्टुं धनुर्धावति॥९७॥

अत्र पाणिना धनुर्ग्रहीतुमिच्छामीति वक्तव्ये पाणिः। करणभूतस्य कर्तृत्वाध्यारोपः कामपि कारकवक्रतां प्रतिपद्यते।

यथा वा—

स्तनद्वन्द्वम् इत्यादौ॥९८॥

यथा वा—

निष्पर्यायनिवेशपेशलरसैरन्योन्यनिर्भर्त्सिभि-

र्हस्ताग्रैर्युगपन्निपत्य दशभिर्वामैर्धृतं कार्मुकम्।

सव्यानां पुनरप्रथीयसि विधावस्मिन् गुणरोपणे

मत्सेवाविदुषामहं प्रथमिका काप्यम्बरे वर्तते॥९९॥

अत्र पूर्ववदेव कर्तृत्वाध्यारोपनिबन्धनं कारकवक्रत्वम्।

यथा वा—

बद्धस्पर्द्ध इति॥१००॥

एवं कारकवक्रतां विचार्य क्रमसमन्वितां संख्यावक्रतां विचारयति तत्परिच्छेदकत्वात् संख्यायाः—

कुर्वन्ति काव्यवैचित्र्यविवक्षापरतन्त्रिताः।

यत्र संख्याविपर्यासं तां संख्यावक्रतां विदुः॥२९॥

यत्र यस्यां कवयः काव्यवैचित्र्यविवक्षापरतन्त्रिताः स्वकर्मविचित्रभावाभिधित्सापर-वशाः संख्याविपर्यासं वचनविपरिवर्तनं कुर्वन्ति विदधते तां संख्यावक्रतां विदुः तद्वचनवक्रत्वं जानन्ति तद्विदः। तदयमत्रार्थः — यदेकवचने प्रयोक्तव्ये वैचित्र्यार्थं वचनान्तरं यत्र प्रयुज्यते, भिन्नवचनयोर्वा यत्र सामानाधिकरण्यं विधीयते। यथा—

कपोले पत्राली करतलनिरोधेन मृदिता

निपीतो निश्वासैरयममृतहृद्योऽधररसः।

मुहुः कण्ठे लग्नस्तरलयति बाष्पः स्तनतटीं

प्रियो मन्युर्जातस्तव निरनुरोधे न तु वयम्॥१०१॥

अत्र 'न त्वहम्' इति वक्तव्ये, 'न तु वयम्' इत्यनन्तरङ्गत्वप्रतिपादनार्थं ताटस्थ्यप्रतीतये बहुवचनं प्रयुक्तम्। यथा वा—

वयं तत्त्वान्वेषान्मधुर हतास्त्वं खलु कृती॥१०२॥

अत्रापि पूर्ववदेव ताटस्थ्यप्रतीतिः। यथा वा—

फुल्लेन्दीवरकानननानि नयने पाणी सरोजाकराः॥१०३॥

अत्र द्विवचनबहुवचनयोः सामानाधिकरण्यलक्षणः संख्याविपर्यासः सहृदयहृदयहारितामावहति।

यथा वा—

शास्त्राणि चक्षुर्नवम् इति॥१०४॥

अत्र पूर्ववदेवैकवचनबहुवचनयोः सामानाधिकरण्यं वैचित्र्यविधायि।

एवं संख्यावक्रतां विचार्य तद्विषयत्वात् पुरुषाणां क्रमसमर्पितावसरां पुरुषवक्रतां विचारयति—

प्रत्यक्तापरभावश्च विपर्यासेन योज्यते।

यत्र विच्छित्तये सैषा ज्ञेया पुरुषवक्रता॥३०॥

अत्र यस्यां प्रत्यक्ता निजात्मभावः परभावश्च अन्यत्वमुभयमप्येतद्विपर्यासेन योज्यते विपरिवर्तनेन निबध्यते। किमर्थम्—विच्छित्तये वैचित्र्याय। सैषा वर्णितस्वरूपा ज्ञेया ज्ञातव्या पुरुषवक्रता पुरुषवक्रत्वविच्छित्तिः। तदयमत्रार्थः— यदन्यस्मिन्नुत्तमे मध्यमे वा पुरुषे प्रयोक्तव्ये वैचित्र्यायान्यः कदाचित् प्रथमः प्रयुज्यते। तस्माच्च पुरुषैकयोगक्षेमत्वादस्मदादेः प्रातिपदिकमात्रस्य च विपर्यासः पर्यवस्यति।

यथा –

कौशाम्बी परिभूयः नः कृपणकैर्विद्वेषिभिः स्वीकृतां

जानाम्येव तथा प्रमादपरतां पत्युर्नयद्वेषिणः।

स्त्रीणां च प्रियविप्रयोगविधुरं चेतः सदैवात्र मे

वक्तुं नोत्सहते मनः परमतो जानातु देवी स्वयम्॥१०५॥

अत्र 'जानातु देवी स्वयम्' इति युष्मदि मध्यमपुरुषे प्रयोक्तव्ये प्रातिपदिकमात्रप्रयोगेण वक्तुस्तदशक्त्यनुष्ठानतां, मन्यमानस्यौदासीन्यप्रतीतिः। तस्याश्च प्रभुत्वात् स्वातन्त्र्येण हिताहितविचारपूर्वकं स्वयमेव कर्तव्यार्थप्रतिपत्तिः कमपि वाक्यवक्रभावमावहति। यस्मादेतदेवास्य वाक्यस्य जीवतित्वेन परिस्फुरति।

एवं पुरुषवक्रतां विचार्य पुरुषाश्रयत्वादात्मनेपदपरस्मैपदयोरुचितावसरां वक्रतां विचारयति। धातूनां लक्षणानुसारेण नियतपदाश्रयः प्रयोगः पूर्वाचार्याणाम् 'उपग्रह'-शब्दाभिधेयतया प्रसिद्धः तस्मात्तदभिधानेनैव व्यवहरति—

पदयोरुभयोरेकमौचित्याद् विनियुज्यते।

शोभायै यत्र जल्पन्ति तामुपग्रहवक्रताम्॥३१॥

तामुक्तस्वरूपामुपग्रहवक्रतामुग्रहवक्रत्वविच्छत्तिं जल्पन्ति कवयः कथयन्ति। कीदृशी— यत्र यस्यां पदयोरुभयोर्मध्यादेकमात्मनेपदं परस्मैपदं वा विनियुज्यते विनिबध्यते नियमेन। कस्मात्कारणात्। औचित्यात्। वर्ण्यमानस्य वस्तुनो यदौचित्यमुचितभावस्तस्मात्, तं समाश्रित्येत्यर्थः। किमर्थम्—शौभायै विच्छित्तये।

यथा —

तस्यापरेष्वपि मृगेषु शरान्मुमुक्षोः

कर्णान्तमेत्य बिभिदे निविडोऽपि मुष्टिः।

त्रासातिमात्रचटुलैः स्मरयत्सु नेत्रैः

प्रौढप्रियानयनविभ्रमचेष्टितानि॥१०६॥

अत्र राज्ञः सुललितविलासवतीलोचनविलासेषु स्मरणगोचरमवतरत्सु तत्परायत्तचित्तवृत्तेराङ्गिकप्रयत्नपरिस्पन्दविनिवर्तमाना मुष्टिर्बिभिदे भिद्यते स्म। स्वयमेवेति कर्मकर्तृनिबन्धनमात्मनेपदमतीव चमत्कारिणीं कामपि वाक्यवक्रतामावहति।

एवमुपग्रहवक्रतां विचार्य तदनुसम्भविनीं प्रत्ययान्तरवक्रतां विचारयति—

विहितः प्रत्ययादन्यः प्रत्ययः कमनीयताम्।

यत्र कामपि पुष्णाति सान्या प्रत्ययवक्रता॥३२॥

सान्या प्रत्ययवक्रता सा सामाम्नातरूपादन्यापरा काचित् प्रत्ययवक्रत्वविच्छित्तिः। अस्तीति सम्बन्धः। यत्र यस्यां प्रत्ययः कामप्यपूर्वां कमनीयतां रम्यतां पुष्णाति पुष्यति। कीदृशः— प्रत्ययात् तिङादेर्विहितः पदत्वेन विनिर्मितोऽन्यः कश्चिदिति। यथा—

लीनं वस्तुनि येन सूक्ष्मसुभगं तत्त्वं गिरा कृष्यते

निर्मातुं प्रभवेन्मनोहरमिदं वाचैव यो वाक्पतिः।

वन्दे द्वावपि तावहं कविवरौ वन्देतरां तं पुन-

र्यो विज्ञातपरिश्रमोऽयमनयोर्भारावतारश्रमः॥१०७॥

'वन्देतराम्' इत्यत्र कापि प्रत्ययवक्रता कवेश्चेतसि परिस्फुरति। तत एव 'पुनः'–शब्दः पूर्वस्माद्विशेषाभिधायित्वेन प्रयुक्तः।

एवं नामाख्यातस्वरूपयोः पदयोः प्रत्येकं प्रकृत्याद्यवयवविभागद्वारेण यथासम्भवं वक्रत्वं विचार्येदानीमुपसर्गनिपातयोरव्युत्पन्नत्वादसम्भवद्विभक्तित्वाच्च निरस्तावयवत्वे सत्यविभक्तयोः साकल्येन वक्रतां विचारयति —

रसादिद्योतनं यस्यामुपसर्गनिपातयोः।

वाक्यैकजीवित्वेन सा परा पदवक्रता॥३३॥

सापरा पदवक्रता—सा समर्पितस्वरूपापरा पूर्वोक्तव्यतिरिक्ता पदवक्रत्वविच्छित्तिः। अस्तीति सम्बन्धः। कीदृशी—यस्यां वक्रतायामुपसर्गनिपातयोर्वैयाकरणप्रसिद्धाभिधानयो रसादिद्योतनं शृङ्गारप्रभृतिप्रकाशनम्। कथम्—वाक्यैजीवितत्वेन। वाक्यस्य श्लोकादेरेकजीवितं वाक्यैकजीवितं तस्य भावस्तत्त्वं तेन। तदिदमुक्तं भवति—यद्वाक्यस्यैकस्फुरितभावेन परिस्फुरति यो रसादिस्तत्प्रकाशनेनेत्यर्थः। यथा—

वैदेही तु कथं भविष्यति हहा हा देवि धीरा भव॥१०८॥

अत्र रघुपतेस्तत्कालज्वलितोद्दीपनविभावसम्पत्समुल्लासितः सम्भ्रमो निश्चितजनितजानकीविपत्तिसम्भावनस्तत्परित्राणकरणोत्साहकारणतां प्रतिपद्यमानस्तदेकाग्रतोल्लिखितसाक्षात्कारस्तदाकारतया विस्मृतविप्रकर्षः प्रत्यग्ररसपरिस्पन्दसुन्दरो निपातपरम्पराप्रतिपद्यमानवृत्तिर्वाक्यैकजीवितत्वेन प्रतिभासमानः कामपि वाक्यवक्रतां समुन्मीलयति। तु-शब्दस्य च वक्रभावः पूर्वमेव व्याख्यातः। यथा वा—

अयमेकपदे तया वियोगः प्रियया चोपनतः सुदुःसहो मे।

नववारिधरोदयादहोभिर्भवितव्यं च निरातपत्वरम्यैः॥१०९॥

अत्र द्वयोः परस्परं सुदुःसहत्वोद्दीपनसामर्थ्यसमेतयोः प्रियाविरहवर्षाकालयोस्तुल्यकालत्वप्रतिपादनपरं 'च' शब्दद्वितयं समसमयसमुल्लसितव-ह्निदाहदक्षदक्षिणवातव्यजनसमानतां समर्थयत् कामपि वाक्यवक्रतां समुद्दीपयति। 'सु'–'दुः'–शब्दाभ्यां च प्रियाविरहस्याशक्यप्रतीकारता प्रतीयते। यथा च—

मुहुरङ्गुलिसंवृताधरोष्ठं प्रतिषेधाक्षरविक्लवाभिरामम्।

मुखमंसविवर्ति पक्ष्मलाक्ष्याः कथमप्युन्नमितं न चुम्बितं तु॥११०॥

अत्र नायकस्य प्रथमाभिलाषविवशवृत्तेरनुभवस्मृतिसममुल्लिखिततत्कालसमुचिततद्वदनेन्दुसौन्दर्यस्य पूर्वपरिचुम्बनस्खलितसमुद्दीपित-पश्चात्तापवशावेशद्योतनपरः 'तु'-शब्दः काममपि वाक्यवक्रतामुत्तेजयति।

एतदुत्तरत्र प्रत्ययवक्रत्वमेवंविधप्रत्ययान्तरवक्रभावान्तर्भूतत्वात् पृथक्त्वेन नोक्तमिति स्वयमेवोत्प्रेक्षणीयम्। यथा —

येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते।

बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः॥१११॥

अत्र 'अतितराम्' इत्यतीव चमत्कारि। एवमन्येषामपि सजातीयलक्षणद्वारेण लक्षणनिष्पत्तिः स्वयमनुसर्तव्या। तदेवमियमनेकाकारा वक्रत्वच्छित्तिश्चतुर्विधपदविषया वाक्यैकदेशजीवितत्वेनापि परिस्फुरन्ती सकलवाक्यवैचित्र्यनिबन्धनतामुपयाति।

वक्रतायाः प्रकाराणामेकोऽपि कविकर्मणः।

तद्विदाह्लादकारित्वहेतुतां प्रतिपद्यते॥११२॥

इत्यन्तरश्लोकः।

यद्येवमेकस्यापि वक्रताप्रकारस्य यदेवंविधो महिमा तदेते बहवः सम्पतिताः सन्तः किं सम्पादयन्तीत्याह—

परस्परस्य शोभायै बहवः पतिताः क्वचित्।

प्रकारा जनयन्त्येतां चित्रच्छायामनोहरम्॥३४॥

क्वचिदेकस्मिन् पदमात्रवाक्ये वा वक्रताप्रकारा वक्रत्वप्रभेदा बहवः प्रभूताः कविप्रतिभामाहात्म्यसमुल्लसिताः। किमर्थम्—परस्परस्य शोभायै, अन्योन्यस्य विच्छित्तये। एतामेव चित्रच्छायामनोहरामनेकाकारकान्तिरमणीयां वक्रतां जनयन्त्युत्पादयन्ति। यथा—

तरन्तीव इति॥११६॥

अत्र क्रियापदानां त्रयाणामपि प्रत्येकं त्रिप्रकारं वैचित्र्यं परिस्फुरति— क्रियावैचित्र्यं कारकवैचित्र्यं कालवैचित्र्यं च। प्रथिम-स्तन-जघन-तरुणिम्नां त्रयाणामपि वृत्तिवैचित्र्यम्। लावण्यजलधि-प्रागल्भ्य-सरलता-परिचय-शब्दानामुपचारवैचित्र्यम्। तदेवमेते बहवो वक्रताप्रकारा एकस्मिन् पदे वाक्ये वा सम्पतिताश्चित्रच्छायामनोहरामेतामेव चेतनचमत्कारकारिणीं वाक्यवक्रतामावहन्ति।

एवं नामाख्यातोपसर्गनिपातलक्षणस्य चतुर्विधस्यापि पदस्य यथासम्भवं वक्रताप्रकारान् विचार्येदानीं प्रकरणमुपसंहृत्यान्यदवतारयति—

वाग्वल्ल्याः पदपल्लावास्पदतया या वक्रतोद्भासिनी
विच्छित्तिः सरसत्वसम्पदुचिता काप्युज्ज्वला जृम्भते।
तामालोच्य विदग्धषट्पदगणैर्वाक्यप्रसूनाश्रयि
स्फारामोदमनोहरं मधु नवोत्कण्ठाकुलं पीयताम्॥३५॥

वागेव वल्ली वाणीलता तस्याः काप्यलौकिकी विच्छित्तिर्जृम्भते शोभा समुल्लसति। कथम्—पदपल्लवास्पदतया। पदान्येव पल्लवानि सुप्तिङन्तान्येव पत्राणि तदास्पदतया तदाश्रयत्वेन। कीदृशी विच्छित्तिः। सरसत्वसम्पदुचिता, रसवत्त्वातिशयोपपन्ना। किंविशिष्टा च— वक्रतया वक्रभावेनोद्भासते भ्राजते या सा तथोक्ता। कीदृशी—उज्जवला छायातिशयरमणीया। तामेवंविधामालोच्य विचार्य विदग्धषट्पदगणैर्विबुधषट्चरणचक्रैर्मधु पीयतां मकरन्द आस्वाद्यताम्। कीदृशम्— वाक्यप्रसूनाश्रयम्। वाक्यान्येव पदसमुदायरूपाणि प्रसूनानि पुष्पाण्याश्रयः स्थानं यस्य तत्तथोक्तम्। अन्यच्च कीदृशम्— स्फारामोदमनोहरम्। स्फारः स्फीतो योऽसावामोदस्तद्धर्मविशेषस्तेन मनोहरं हृदयहारि। कथमास्वाद्यताम्— नवोत्कण्ठाकुलं नूतनोत्कलिकाव्यग्रम्। मधुकरसमूहाः खलु वल्ल्याः प्रथमोल्लसितपल्लवोल्लेखमालोच्य प्रतीतचेतसः

समनन्तरोद्भिन्नसुकुमारकुसुममकरन्दपानमहोत्सवमनुभवन्ति। तद्वदेव सहृदयाः पदास्पदं कामपि वक्रताविच्छित्तिमालोच्य नवोत्कलिकाकलितचेतसो वाक्याश्रयं किमपि वक्रताजीवितसर्वस्वं विचारयन्त्विति तात्पर्यार्थः। अत्रैकत्र सरसत्वं स्वसमयसम्भविरसाढ्यत्वम्, अन्यत्र शृङ्गारादिव्यञ्जकत्वम्। वक्रतैकत्र बालेन्दुसुन्दरसंस्थानयुक्तत्वम्। इतरत्रोक्त्यादिवैचित्र्यम्। विच्छित्तिरेकत्र सुविभक्तपत्रत्वम् अन्यत्र कविकौशलकमनीयता उज्जवलत्वमेकत्र पर्णच्छायायुक्तत्वम्, अपरत्र सन्निवेशसौन्दर्यसमुदयः। आमोदः पुष्पेषु सौरभम्, वाक्येषु तद्विदाह्लादकारिता। मधुकुसुमेषु मकरन्दः, वाक्येषु सकलकाव्यकारणसम्पत्समुदय इति।

इति श्रीमत्कुन्तकविरचिते वक्रोतिजीविते द्वितीय उन्मेषः॥

तृतीयोन्मेषः

एवं पूर्वस्मिन् प्रकरणे वाक्यावयवानां यथासभवं वक्रभावं विचारयन् वाचकवक्रताविच्छित्तिप्रकाराणां दिक्प्रदर्शनं विहितवान्। इदानीं वाक्यवक्रतावैचित्र्यमासूत्रयितुं वाच्यस्य वर्णनीयतया प्रस्तावाधिकृतस्य वस्तुनो वक्रतास्वरूपं निरूपयति, पदार्थावबोधपूर्वकत्वाद् वाक्यार्थावसितेः –

उदारस्वपरिस्पन्दसुन्दरत्वेन वर्णनम्।

वस्तुनो वक्रशब्दैकगोचरत्वेन वक्रता॥१॥

वस्तुनो वर्णनीयतया प्रस्तावितस्य पदार्थस्य यदेवंविधत्वेन वर्णनं सा तस्य वक्रता वक्रत्वविच्छित्तिः। किंविधत्वेनेत्याह— उदारस्वपरिस्पन्दसुन्दरत्वेन। उदारः सोत्कर्षः सर्वातिशायी यः स्वपरिस्पन्दः स्वभावमहिमा तस्य सुन्दरत्वं सौकुमार्यातिशयस्तेन, अत्यन्तरमणीयस्वाभाविकधर्मयुक्तत्वे। वर्णनं प्रतिपादनम्। कथम्— वक्रशब्दैकगोचरत्वेन। वक्रो योऽसौ नानाविधवक्रताविशिष्टः शब्दः कश्चिदेव वाचकविशेषो विवक्षितार्थसमर्थस्तस्यैकस्य केवलस्य गोचरत्वेन प्रतिपाद्यतया विषयत्वेन। वाच्यत्वेनेति नोक्तम्, व्यङ्ग्यत्वेनापि प्रतिपादनसम्भवात्। तदिदमुक्तं भवति— यदेवंविधे भावस्वभावसौकुमार्यवर्णनप्रस्तावे भूयसां न वाच्यालङ्काराणामुपमादीनामुपयोगयोग्यता सम्भवति, स्वभावसौकुमार्यातिशयम्लानताप्रसङ्गात्।

ननु च सैषा सहृदयाह्लादकारिणी स्वभावोक्तिरलङ्कारतया समाम्नाता, तस्मात् किं तद्दूषणदुर्व्यसनप्रयासेन? यतस्तेषां सामान्यवस्तुधर्ममात्रमलङ्कार्यम्, सातिशयस्वभावसौन्दर्यपरिपोषणमलङ्कारः प्रतिभासते। तेन स्वभावोक्तेरलङ्कारत्वमेव युक्तियुक्तिमिति ये मन्यन्ते तान् प्रति समाधीयते यदेतन्नातिचतुरश्रम्। यस्मादगतिकगतिन्यायेन काव्यकरणं न यथाकथञ्चिदनुष्ठेयतामर्हति,

तद्विदाह्लादकारिकाव्यलक्षणप्रस्तावात्। किञ्च— अनुत्कृष्टधर्मयुक्तस्य वर्णनीयस्यालङ्करणमप्यसमुचितभित्तिभागोल्लिखितालेख्यवन्न शोभातिशयकारितामावहति। यस्मादत्यन्तरमणीयस्वाभाविकधर्मयुक्तं वर्णनीयवस्तु परिग्रहणीयम्। तथाविधस्य तस्य यथायोगमौचित्यानुसारेण रूपकाद्यलङ्कारयोजनया भवितव्यम्। एतांवास्तु विशेषो यत् स्वाभाविकसौन्दर्यप्राधान्येन विवक्षितस्य न भूयसा रूपकाद्यलङ्कार उपकाराय कल्प्यते, वस्तुस्वभावसौकुमार्यस्य रसादिपरिपोषणस्य वा समाच्छादनप्रसङ्गात्। तथा चैतस्मिन् विषये सर्वाकारमलङ्कार्यं विलासवतीव पुनरपि स्नानसमयविरहव्रतपरिग्रहसुरतावसानादौ नात्यन्तमलङ्करणसहतां प्रतिपद्यते, स्वाभावाविकसौकुमार्यस्यैव रसिकहृदयाह्लादकारित्वात्। यथा—

तां प्राङ्मुखीं तत्र निवेश्य तन्वीं क्षणं व्यलम्बन्त पुरो निषण्णाः।

भूतार्थशोभाह्रियमाणनेत्राः प्रसाधने सन्निहितेऽपि नार्यः॥१॥

अत्र तथाविधस्वाभाविकसौकुमार्यमनोहरः शोभातिशयः कवेः प्रतिपादयितुमभिप्रेतः। अस्यालङ्करणकलापकलनं सहजच्छायातिरोधानशङ्कास्पदत्वेन सम्भावितम्। यस्मात् स्वाभाविकसौकुमार्यप्राधान्येन वर्ण्यमानस्योदारस्वपरिस्पन्दमहिम्नः सहजच्छायातिरोधानविधायि प्रतीत्यन्तरापेक्षमलङ्करणकल्पनं नोपकारितां प्रतिपद्यते। विशेषस्तु—रसपरिपोषपेशलायाः प्रतीतेर्विभावानुभावव्यभिचार्यौचित्यव्यतिरेकेण प्रकारान्तरेण प्रतिपत्तिः प्रस्तुतशोभापरिहारकारितामावहति। तथा च प्रथमतरतरुणीतारुण्यावतारप्रभृतयः पदार्थाः सुकुमारवसन्तादिसमयसमुन्मेष-परिपोषपरिसमाप्तिप्रभृतयश्च स्वप्रतिपादकवाक्यवक्रताव्यतिरेकेण भूयसा न कस्यचिदलङ्करणान्तरस्य कविभिरलङ्करणीयतामुपनीयमानाः परिदृश्यन्ते। यथा—

स्मितं किञ्चिन्मुग्धं तरलमधुरो दृष्टिविभवः

परिस्पन्दो वाचामभिनवविलासोक्तिसरसः।

गतानामारम्भः किसलयितलीलापरिमलः

स्पृशन्त्यास्तारुण्यं किमिव हि न रम्यं मृगदृशः॥२॥

यथा वा—

अव्युत्पन्नमनोभवा मधुरिमस्पर्शोल्लसन्मानसा

भिन्नान्तःकरणं दृशौ मुकुलयन्त्याघ्रातभूतोद्भ्रमाः।

रागेच्छां न समापयन्ति मनसः खेदं विनैवालसा

वृत्तान्तं न विदन्ति यान्ति च वशं कन्या मनोजन्मनः॥३॥

यथा वा—

दोर्मूलावधि इति॥४॥

यथा वा—

गर्भग्रन्थिषु वीरुधां सुमनसो मध्येऽङ्कुरं पल्लवा

वाच्छामात्रपरिग्रहः पिकवधूकण्ठोदरे पञ्चमः।

किञ्च त्रीणि जगन्ति जिष्णुदिवसैर्द्वित्रैर्मनोजन्मनो

देवस्यापि चिरोज्झितं यदि भवेदभ्यासवश्यं धनुः॥५॥

यथा वा —

हंसानां निनदेषु इति॥६॥

यथा च—

सज्जेइ सुरहिमासो ण दाव अप्पेइजुअइअणलक्खसुहे।

अहिणअसहआरमुहे णवपल्लवगत्तले अणंगस्स सरे॥७॥

(सज्जयति सुरभिमासो न तावदर्पयति युवतिजनलक्ष्यसुखान्।

अभिनवसहकारमुखान् नवपल्लवापत्राननङ्गस्य शरान्॥)

एवंविधविषये स्वाभाविकसौकुमार्यप्राधान्येन वर्ण्यमानस्य वस्तुनस्तदाच्छादनभयादेव न भूयसा तत्कविभिरलङ्करणमुपनिबध्यते। यदि वा कदाचिदुपनिबध्यते तत्तदेव स्वाभाविकं सौकुमार्यं सुतरां समुन्मीलयितुम्, न पुनरलङ्कारवैचित्र्योपपत्तये। यथा—

धौताञ्जने च नयने स्फटिकाच्छकान्ति-

र्गण्डस्थली विगतकृत्रिमरागमोष्ठम्।

अङ्गानि दन्तिशिशुदन्तविनिर्मलानि

किं यन्न सुन्दरमभूत्तरुणीजनस्य॥८॥

अत्र 'दन्तिशिशुदन्तविनिर्मलानि' इत्युपमया स्वाभाविकमेव सौन्दर्यमुन्मीलितम्। यथा वा—

अकठोरवारणवधूदन्ताङ्कुरस्पर्धिनः इति॥९॥

एतदेवातीव युक्तियुक्तम्। यस्मान्महाकवीनां प्रस्तुतौचित्यानुरोधेन कदाचिद् स्वाभाविकमेव सौन्दर्यमैकराज्येन विजृम्भयितुमभिप्रेतं भवति, कदाचिद् विविधरचनावैचित्र्ययुक्तमिति। अत्र पूर्वस्मिन् पक्षे, रूपकादेलङ्करणकलापस्य न तादृक् तत्त्वम्। अपरस्मिन् पुनः, स एव सुतरां समुज्जृम्भते। तस्मादनेन न्यायेन सर्वातिशायिनः स्वाभाविकसौन्दर्यलक्षणस्य पदार्थपरिस्पन्दस्यालङ्कार्यत्वमेव युक्तियुक्ततामालम्बते। न पुनरलङ्करणत्वम्। सातिशयत्वशून्यधर्मयुक्तस्य वस्तुनो विभूषितस्यापि पिशाचादेरिव तद्विदाह्लादकारित्वविरहादनुपादेयत्वमेवेत्यलमतिप्रसङ्गेन। यदि वा प्रस्तुतौचित्यमाहात्म्यान्मुख्यतया भावस्वभावः सातिशयत्वेन वर्ण्यमानः स्वमहिम्ना भूषणान्तरासहिष्णुः स्वयमेव शोभातिशयशालित्वादलङ्कार्योऽप्यलङ्करणमित्यभिधीयते

तदयमास्माकीन एव पक्षः। तदतिरिक्तवृत्तेरलङ्कारान्तरस्य तिरस्कारतात्पर्येणाभिधानान्नात्र वयं विवदमहे।

एवमेषैव वर्ण्यमानस्य वस्तुनो वक्रतेत्युक्त्या काचिदस्तीत्याह—

अपरा सहजाहार्यकविकौशलशालिनी।

निर्मितिर्नूतनोल्लेखलोकातिक्रान्तगोचरा॥२॥

अपरा द्वितीया वर्ण्यमानवृत्तेः पदार्थस्य निर्मितिः सृष्टिः। वक्रतेति सम्बन्धः। कीदृशी— सहजाहार्यकविकौशलशालिनी। सहजं स्वाभाविकमाहार्यं शिक्षाभ्यासमुल्लासितं च शक्तिव्युपत्तिपरिपाकप्रौढं यत् कविकौशलं निर्मातृनैपुण्यं तेन शालते श्लाघते या सा तथोक्ता। अन्यच्च कीदृशी—नूतनोल्लेखलोकातिक्रान्तगोचरा। नूतनस्तत्प्रथमो योऽसावुल्लिख्यत इत्युल्लेखस्तत्कालसमुल्लिख्यमानोऽतिशयः, तेन लोकातिक्रान्तः प्रसिद्धव्यापारातीतः कोऽपि सर्वातिशायी गोचरो विषयो यस्याः सा तथोक्तेति विग्रहः। तस्मान्निर्मितिस्तेन रूपेण विहितिरित्यर्थः। तदिदमत्र तात्पर्यम्— यन्न वर्ण्यमानस्वरूपाः पदार्थाः कविभिरभूताः सन्तः क्रियन्ते, केवलं सत्तामात्रेण परिस्फुरतां चैषां तथाविधः कोऽप्यतिशयः पुनराधीयते, येन कामपि सहृदयहृदयहारिणीं रमणीयतामधिरोप्यते। तदिदमुक्तम्—

लीनं वस्तुनि इत्यादि॥१०॥

तदेवं सत्तामात्रेणैव परिस्फुरतः पदार्थस्य कोऽप्यलौकिकः शोभातिशयविधायी विच्छित्तिविशेषोऽभिधीयते, येन नूतनच्छायामनोहारिणा वास्तवस्थितितिरोधानप्रवणेन निजावभासोद्भासिततत्स्वरूपेण तत्कालोल्लिखित इव वर्णनीयपदार्थपरिस्पन्दमहिमा प्रतिभासते, येन विधातृव्यपदेशपात्रतां प्रतिपद्यन्ते कवयः। तदिदमुक्तम्।

अपारे काव्यसंसारे कविरेव प्रजापतिः।

यथास्मै रोचते विश्वं तथेदं परिवर्तते॥११॥

सैषा सहजार्यहाभेदभिन्ना वर्णनीयस्य वस्तुनो द्विप्रकारा वक्रता। तदेवमाहार्या येयं सा प्रस्तुतविच्छित्तिविधाप्यलङ्कारव्यतिरेकेण नान्या काचिदुपद्यते। तस्माद् बहुविधतत्प्रकारभेदद्वारेणात्यन्तविततव्यवहाराः पदार्थाः परिदृश्यन्ते। यथा—

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तद्युतिः

शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः।

वेदाभ्यासजडः कथं न विषयव्यावृत्तकौतूहलो

निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः॥१२॥

अत्र कान्तायाः कान्तिमत्त्वमसीमविलाससम्पदां पदं च रसवत्त्वमसामान्यसौष्ठवं च सौकुमार्यं प्रतिपादयितुं प्रत्येकं तत्परिस्पन्दप्राधान्यसमुचितसम्भावनानुमानमाहात्म्यात् पृथक् पृथगपूर्वमेव निर्माणमुत्प्रेक्षितम्। तथा च कारणत्रितयस्याप्येतस्य सर्वेषां विशेषणानां स्वयम् इति सम्बध्यमानमेतदेव सुतरां समुद्दीपयति। यः किल स्वयमेव कान्तद्युतिस्तस्य सौजन्यसमुचितादरोचकित्वात् कान्तिमत्कार्यकरणकौशलमेवोपपन्नम्। यश्च स्वयमेव शृङ्गारपरैकरसस्तस्य रसिकत्वादेव रसवद्वस्तुविधानवैदग्ध्यमौचित्यं भजते। यश्च स्वयमेव पुष्पाकरस्तस्याभिजात्यादेव तथाविधः सुकुमार एव सर्गः समुचितः। तथा चोत्तरार्धे व्यतिरेकमुखेन त्रयस्याप्येतस्य कान्तिमत्त्वादेर्विशेषणैरन्यथानुपपत्तिरुपपादिता। यस्माद् वेदाभ्यासजडत्वात् कान्तिमद्वस्तुविधानानभिज्ञत्वम्, व्यावृत्तकौतुकत्वाद् रसवत्पदार्थे विहितवैमुख्यं पुराणत्वात् सौकुमार्यसरसभावविरचनवैरस्यं प्रजापतेः प्रतीयते। तदेवमुत्प्रेक्षालक्षणोऽयमकलङ्कारः कविना वर्णनीयवस्तुनः कमप्यलौकिकलेखविलक्षणमतिशयमाधातुं निबद्धः। स च स्वभावसौन्दर्यमहिम्ना स्वयमेव तत्सहायसम्पदा सह अर्थमहनीयतामीहमानः सन्देहसंसर्गमङ्गीकरोतीति तेनोपबृंहितः। तस्माल्लोकोत्तरनिर्मातृनिमित्तत्वं नाम नूतनः कोऽप्यतिशयः पदार्थस्य

वर्ण्यमानवृत्तेर्नायिकास्वरूपसौन्दर्यलक्षणस्यात्र निर्मितः कविना येन तदेव तत्प्रथममुत्पादितमिव प्रतिभाति।

यत्राप्युत्पाद्यं वस्तु प्रबन्धार्थवदपूर्वतया वाक्यार्थस्तत्कालमुल्लिख्यते कविभिः, तस्मिन् स्वसत्तासमन्वयेन स्वयमेव परिस्फुरतां पदार्थानां तथाविधपरस्परान्वयलक्षणसम्बन्धोपनिबन्धनं नाम नवीनमतिशयमात्रमेव निर्मितिविषयतां नीयते, न पुनः स्वरूपम्। यथा—

कस्त्वं भो दिवि मालिकोऽहमिह किं पुष्पार्थमभ्यागतः

किं ते सूनमहक्रयो यदि महच्चित्रं तदाकर्ण्यताम्।

संग्रामेष्वलभाभिधाननृपतौ दिव्याङ्गनाभिः स्रजः

प्रोज्झन्तीभिरविद्यमानकुसुमं यस्मात्कृतं नन्दनम्॥१३॥

तदेवंविधे विषये वर्णनीयवस्तुविशिष्टातिशयविधायी विभूषणविन्यासो विधेयतां प्रतिपद्यते। तथा च— प्रकृतमिदमुदाहरणमलङ्करणकल्पनं विना सम्यङ् न कथञ्चिदपि वाक्यार्थसङ्गतिं भजते। यस्मात् प्रत्यक्षादिप्रमाणोपपत्तिनिश्चयाभावात् स्वाभाविकं वस्तु धर्मितया व्यवस्थापनां न सहते, तस्माद्विदग्धकविप्रतिभोल्लिखितालङ्करणगोचरत्वेनैव सहृदयहृदयाह्लादमादधाति। तथा च, दुःसहसमरसमयसमुचितशौर्यातिशयश्लाघया प्रस्तुतनरनाथविषये वल्लभलाभरभसोल्लसितसुरसुन्दरीसमूहसंगृह्यमाणमन्दारादिकु-सुमदामसहस्रसम्भावनानुमानान्नन्दनोद्यानपादपप्रसूनसमृद्धिप्रध्वंसभावसिद्धिः समुत्प्रेक्षिता। यस्मादुत्प्रेक्षाविषयं वस्तु कवयस्तदिवेति तदेवेति वा द्विविधमुपनिबध्नन्तीत्येतत्तल्लक्षणावसर एव विचारयिष्यामः। तदेवमियमुत्प्रेक्षा पूर्वार्धविहिता प्रस्तुतप्रशंसोपनिबन्धबन्धुरा प्रकृतपार्थिवप्रतापातिशयपरिपोषप्रवणतया सुतरां समुद्भासमाना तद्विदावर्जनं जनयति। सातिशयत्वम्

उत्प्रेक्षातिशयान्विता॥१४॥

इत्यस्याः, स्वलक्षणानुप्रवेश इत्यतिशयोक्तेश्च

कोऽलङ्कारोऽनया विना॥१५॥

इति सकलालङ्करणानुग्राहकत्वम्। तस्मात् पृथगतिशयोक्तिरेवेयं मुख्यतयेत्युच्यमानेऽपि न किञ्चिदतिरिच्यते। कविप्रतिभोत्प्रेक्षितत्वेन चात्यन्तमसम्भाव्यमप्युपनिबध्यमानमनयैव युक्त्या समञ्जसतां गाहते। न पुनः स्वातन्त्र्येण। यद्वा कारणतो लोकातिक्रान्तगोचरत्वेन वचसः सैवेयमित्यस्तु, तथापि प्रस्तुतातिशयविधानव्यतिरेकेण न किञ्चिदपूर्वमत्रास्ति।

तदेवमभिधानस्य पूर्वमभिधेयस्य चेह वक्रतामभिधायेदानीं वाक्यस्य वक्त्वमभिधातुमुक्रमते—

मार्गस्थवक्रशब्दार्थगुणालङ्कारसम्पदः।

अन्यद्वाक्यस्य वक्रत्वं तथाभिहितिजीवितम्॥३॥

मनोज्ञफलकोल्लेखवर्णच्छायाश्रियः पृथक्।

चित्रस्येव मनोहारि कर्तुः किमपि कौशलम्॥४॥

अन्यद्वाक्यस्य वक्रत्वम्— वाक्यस्य परस्परान्वितवृत्तेः पदसमुदायस्यान्यदपूर्वं व्यतिरिक्तमेव वक्रत्वं वक्रभावः। भवतीति सम्बन्धः, क्रियान्तराभावात्। कुतः— मार्गस्थवक्रशब्दार्थगुणालङ्कारसम्पदः। मार्गाः सुकुमारादयस्तत्रस्थाः केचिदेव वक्राः प्रसिद्धव्यवहारव्यतिरेकिणो ये शब्दार्थगुणालङ्कारास्तेषां सम्पत् काप्युपशोभा तस्याः। पृथग्भूतं किमपि वक्रत्वान्तरमेव। कीदृशम्— तथाभिहितिजीवितम्। तथा तेन प्रकारेण केनाप्यव्यपदेश्येन याभिहितिः काप्यपूर्वैवाभिधा सैव जीवितं सर्वस्वं यस्य तत्तथोक्तम्। किंस्वरूपमित्याह— कर्तुः किमपि कौशलम्। कर्तुर्निर्मातुः किमप्यलौकिकं यत्कौशलं नैपुण्यं

तदेव वाक्यस्य वक्रत्वमित्यर्थः। कथञ्चिद् चित्रस्येव, आलेख्यस्य यथा, मनोहारि हृदयरञ्जकं प्रकृतोपकरणव्यतिरेकि कर्तुरेव कौशलं किमपि पृथग्भूतं व्यतिरिक्तम्। कुत इत्याह— मनोज्ञफलकोल्लेखवर्णच्छायाश्रियः। मनोज्ञाः काश्चिदेव हृदयहारिण्यो याः फलकोल्लेखवर्णच्छायास्तासां श्रीरूपशोभा तस्याः। पृथग्रूपं किमपि तत्त्वान्तरमेवेत्यर्थः। फलकमालेख्याधारभूता भित्तिः, उल्लेखश्चित्रसूत्रप्रमाणोपपन्नं रेखाविन्यसनमात्रम्, वर्णा रञ्जकद्रव्यविशेषाः, छाया कान्तिः। तदिदमत्र तात्पर्यम्— यथा चित्रस्य किमपि फलकाद्युपकरणकलापव्यतिरेकि सकलप्रकृतपदार्थजीवितायमानं चित्रकरकौशलं पृथक्त्वेन मुख्यतयोद्भासते, तथैव वाक्यस्य मार्गादिप्रकृतपदार्थसार्थ व्यतिरेकि कविकौशललक्षणं किमपि सहृदयसंवेद्यं सफलप्रस्तुतपदार्थस्फुरितभूतं वक्रत्वमुज्जृम्भते।

तथा च, भावस्वभावसौकुमार्यवर्णने शृङ्गारादिरसस्वरूपसमुन्मीलने वा विविधविभूषणविन्यासविच्छित्तिविरचने च परः परिपोषातिशयस्तद्विदाह्लादकारितायाः कारणम्। पदवाक्यैकदेशवृत्तिर्वा यः कश्चिद्वक्रताप्रकारस्तस्य कविकौशलमेव निबन्धनया व्यवतिष्ठते। यस्मादाकल्पमेवेषां तावन्मात्रस्वरूपनियतनिष्ठतया व्यवस्थितानां स्वभावालङ्करणवक्रताप्रकाराणां नवनवोल्लेखविलक्षणं चेतनचमत्कारकारि किमपि स्वरूपान्तरमेतस्मादेव समुजृम्भते। तेनेदमभिधीयते—

आसंसारं कइपुंगवेहि पडिदिअहगहिअसारो बि।
अज्जवि अभिन्नमुद्दो व्व जअइ वाआं परिप्फंदो॥१६॥

(आसंसारं कविपुङ्गवै प्रतिदिवसगृहीतसोऽपि।
अद्याप्यभिन्नमुद्र इव जयति वाचां परिस्पन्दः॥)

अत्र सर्गारम्भात् प्रभृति कविप्रधानैः प्रातिस्विकप्रतिभापरिस्पन्दमाहात्म्यात् प्रतिदिवसगृहीतसर्वस्वोऽप्यद्यापि नवनवप्रतिभासानन्त्यविजृम्भणादनुद्घाटितप्राय इव यो

वाक्यपरिस्पन्दः स जयति सर्वोत्कर्षेण वर्तते इत्येवमस्मिन् सुसङ्गतेऽपि वाक्यार्थे कविकौशलस्य विलसितं किमप्यलौकिकमेव परिस्फुरति। यस्मात् स्वाभिमानध्वनिप्राधान्येन तेनैतदभिहितम् यथा- आसंसारं कविपुङ्गवैः प्रतिदिवसगृहीतसारोऽप्यद्याप्यभिन्नमुद्र इवायम्। एवमपरिज्ञाततत्त्वतया न केनचित् किमप्येतस्माद् गृहीतमिति सत्प्रतिभोद्घाटितपरमार्थस्येदानीमेव मुद्राबन्धोद्भेदो भविष्यतीति लोकोत्तरस्वपरिस्पन्दसाफल्यापत्तेर्वाक्यपरिस्पन्दो जयतीति सम्बन्धः।

यद्यपि रसस्वभावालङ्काराणां सर्वेषां कविकौशलमेव जीवितम्, तथाप्यलङ्कारस्य विशेषतस्तदनुग्रहं विना वर्णनविषयवस्तुनो भूषणाभिधायित्वेनाभिमतस्य स्वरूपमात्रेण परिस्फुरता यथार्थत्वेन निबध्यमानस्य तद्विदाह्लादविधानानुपपत्तेर्मनाङ्मात्रमपि न वैचित्र्यमुत्प्रेक्षामहे, प्रचुरप्रवाहपतितेतरपदार्थसामान्येन प्रतिभासनात्।

यथा—

दूर्वाकाण्डमिव श्यामा तन्वी श्यामलता यथा॥१७॥

इत्यत्र नूतनोल्लखमनोहारिणः पुनरेतस्य लोकोत्तरविन्यसनविच्छित्तिविशेषितशोभातिशयस्य किमपि तद्विदाह्लादकारित्वमुद्भिद्यते।

यथा—

अस्याः सर्गविधौ इति॥१८॥

यथा—

किं तारुण्यतरोः इति॥१९॥

तदेवं पृथग्भावेनापि भवतोऽस्य कविकौशलायत्तवृत्तित्वलक्षणवाक्यवक्रतान्तर्भाव एव युक्तियुक्ततामवगाहते। तदिदमुक्तम्—

वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा।

यत्रालङ्कारवर्गोऽसो सर्वोऽप्यन्तर्भविष्यति॥२०॥

स्वभावोदाहरणं यथा—

तेषां गोपवधूविलाससुहृदां राधारहःसाक्षिणां

क्षेमं भद्र कलिन्दशैलतनयातीरे लतावेश्मनाम्।

विच्छिन्ने स्मरतल्पकल्पनमृदुच्छेदोपयोगेऽधुना

ते जाने जरठीभवन्ति विगलन्नीलत्विषः पल्लवाः॥२१॥

अत्र यद्यपि सहृदयसंवेद्यं वस्तुसम्भवि स्वभावमात्रमेव वर्णितम्, तथाप्यनुत्तानतया व्यवस्थितस्यास्य विरलविदग्धहृदयैकगोचरं किमपि नूतनोल्लेखमनोहारि पदार्थान्तरलीनवृत्ति सूक्ष्मसुभगं तादृक् स्वरूपमुन्मीलितं येन वाक्यवक्रतात्मनः कविकौशलस्य काचिदेव काष्ठाधिरूढिरुपपद्यते। यस्मात्तद्व्यतिरिक्तवृत्तिरर्थातिशयो न कश्चिचल्लभ्यते। रसोदाहरणं यथा—

लोको यादृशमाह साहसधनं तं क्षत्रियापुत्रकं

स्यात्सत्येन स तादृगेव न भवेद्वार्त्ता विसंवादिनी।

एकां कामपि कालविप्रुषममी शौर्योष्मकण्डूव्यय-

व्यग्राः स्युश्चिरविस्मृतामरचमूडिम्बाहवा बाहवः॥२२॥

अत्रोत्साहाभिधानः स्थायिभावः समुचितालम्बनविभावलक्षणविषयसौन्दर्यातिशयश्लाघाश्रद्धालुतया विजिगीषोर्वैदग्धभङ्गीभणितिवैचित्र्येण परां परिपोषपदवीमधिरोपितः सन् रसतामानीयमानः किमपि वाक्यवक्रभावस्वभावं कविकौशलमावेदयति। अन्येषां पूर्वप्रकरणोदाहरणानां प्रत्येकं तथाभिहितिजीवितलक्षणं वक्रत्वं स्वयमेव सहृदयैर्विचारणीयम्।

वक्रतायाः प्रकाराणामौचित्यगुणशालिनाम्।

एतदुत्तेजनायालं स्वस्पन्दमहतामपि॥२३॥

रसस्वभावालङ्कारा आसंसारमपि स्थिताः।

अनेन नवतां यान्ति तद्विदाह्लाददायिनीम्॥२४॥

इत्यन्तरश्लोकौ।

एवमभिधानाभिधेयाभिधालक्षणस्य काव्योपयोगिनस्त्रितयस्य स्वरूपमुल्लिख्य वर्णनीयस्य वस्तुनो विषयविभागं विदधाति—

भावानामपरिम्लानस्वभावौचित्यसुन्दरम्।

चेतनानां जडानां च स्वरूपं द्विविधं स्मृतम्॥५॥

भावानां वर्ण्यमानवृत्तीनां स्वरूपं परिस्पन्दः। कीदृशम्— द्विविधम्। द्वे दिधे प्रकारौ यस्य तत्तथोक्तम्। स्मृतं सूरिभिराम्नातम्। केषां भावानाम्— चेतनानां जडानां च। चेतनानां संविद्वतां प्राणिनामिति यावत्; जडानां तद्व्यतिरेकिणां चैतन्यशून्यानाम्। एतदेव च धर्मिद्वैविध्य धर्मिद्वैविध्यस्य निबन्धनम्। कीदृक्स्वरूपम्— अपरिम्लानस्वभावौचित्यसुन्दरम्। अपरिम्लानः प्रत्यग्रपरिपोषपेशलो यः स्वभावः पारमार्थिको धर्मस्तस्य यदौचित्यमुचितभावः प्रस्तावोपयोग्यदोषदुष्टत्वं तेन सुन्दरं सुकुमारं तद्विदाह्लादकमित्यर्थः।

एतदेव द्वैविध्यं विभज्य विचारयति—

तत्र पूर्वं प्रकाराभ्यां द्वाभ्यामेव विभिद्यते।

सुरादिसिंहप्रभृतिप्राधान्येतरयोगतः॥६॥

तत्र द्वयोः स्वरूपयोर्मध्यात् पूर्वं यत्प्रथमं चेतनपदार्थसम्बन्धि तद् द्वाभ्यामेव राश्यन्तराभावात् प्रकाराभ्यां विभिद्यते भेदमासादयति, द्विविधमेव सम्पद्यते। कस्मात्— सुरादिसिंहप्रभृतिप्राधान्येतरयोगतः। सुरादिः त्रिदशप्रभृतयो ये चेतनाः सुरासुरसिद्धविद्याधरगन्धर्वप्रभृतयः, ये चान्ये सिंहप्रभृतयः। केसरिप्रमुखास्तेषां यत्प्राधान्यं

मुख्यत्वमितरदप्राधान्यं च ताभ्यां यथासंख्येन प्रत्येकं यो योगः सम्बन्धस्तस्मात् कारणात्।

तदेवं सुरादीनां मुख्यचेतनानां स्वरूपमेकं कवीनां वर्णनास्पदम्। सिंहादीनाममुख्यचेतनानां पशुमृगपक्षिसरिसृपाणां स्वरूपं द्वितीयमित्येतदेव विशेषेणोन्मीलयति—

मुख्यमक्लिष्टरत्यादिपरिपोषमनोहरम्।

स्वजात्युचितहेवाकसमुल्लेखोज्ज्वलं परम्॥७॥

मुख्यं यत्प्रधानं चेतनसुरासुरादिसम्बन्धिस्वरूपं तदेवं विधं सत्कवीनां वर्णनास्पदं भवति स्वव्यापारगोचरतां प्रतिपद्यते। कीदृशम्— अक्लिष्टरत्यादिपरिपोषमनोहरम्। अक्लिष्टः कदर्थनाविरहितः प्रत्यग्रतामनोहरो यो रत्यादिः स्थायिभावस्तस्य परिपोषः शृङ्गारप्रभृतिरसत्वापादनम्, स्थाय्येव तु रसो भवेदिति न्यायात्। तेन मनोहरं हृदयहारि। अत्रोदाहरणाणि विप्रलम्भशृङ्गारे चतुर्थेऽङ्के विक्रमोर्वश्यामुन्मत्तस्य पुरुरवसः प्रलपितानि। यथा—

तिष्ठेत्कोपवशात्प्रभावपिहिता दीर्घं न सा कुप्यति

स्वर्गायोत्पतिता भवेन्मयि पुनर्भावार्द्रमस्या मनः।

तां हर्तुं विबुधद्विषोऽपि न च मे शक्ताः पुरोवर्तिनीं

सा चात्यन्तमगोचरं नयनयोर्यातेति कोऽयं विधिः॥२५॥

अत्र राज्ञो वल्लभाविरहवैधुर्यदशावेशविवशवृत्तेस्तदसम्प्राप्तिनिमित्तमनधिगच्छतः प्रथमतरमेव स्वाभाविकसौकुमार्यसम्भाव्यमानम् अनन्तरोचितविचारापसार्यमाणोपपत्ति किमपि तात्कालिकविकल्पोल्लिख्यमानमनवलोकनकारणमुत्प्रेक्षमाणस्य तदासादनसमन्वयासम्भवान्नैराश्यनिश्चयविमूढमानसतया रसः परां परिपोषपदवीमधिरोपितः।

तथा चैतदेव वाक्यान्तरैरुद्दीपितं यथा—

पदभ्यां स्पृशेद्वसुमतीं यदि सा सुगात्री

मेधाभिवृष्टसिकतासु वनस्थलीषु।

पश्चान्नता गुरुनितम्बतया ततोऽस्या

दृश्येत चारुपदपङ्क्तिरलक्तकाङ्का॥२६॥

अत्र पद्भ्यां वसुमतीं कदाचित् स्पृशेदित्याशंसया तत्प्राप्तिः सम्भाव्येत। यस्माज्जलधरसलिलसेकसुकुमारसिकतासु वनस्थलीषु गुरुनितम्बतया रमणीयवृत्तिश्चरणविन्यासपरम्परा दृश्येत, तस्मान्नैराश्यनिश्चितिरेव सुतरां समुज्जृम्भिता, या तदुत्तरवाक्योन्मत्तविलपितानां निमित्ततामभजत्।

करुणरसोदाहरणानि तापसवत्सराजे द्वितीयेऽङ्के वत्सराजस्य परिदेवितानि। यथा—

धारावेश्म विलोक्य दीनवदनो भ्रान्त्वा च लीलागृह-

न्निश्वस्यायतमाशु केसरलतावीथीषु कृत्वा दृशः।

किं मे पार्श्वमुपैषि पुत्रक कृतैः किं चाटुभिः क्रूरया

मात्रा त्वं परिवर्जितः सह मया यान्त्यातिदीर्घां भुवम्॥२७॥

अत्र रसपरिपोषनिबन्धनं विभावादिसम्पत्समुदयः कविना सुतरां समुज्जृम्भितः। तथा चास्यैव वाक्यस्यावतारकं विदूषकवाक्यमेवं प्रयुक्तम्—

पमादो एसो क्खु देवीए पुत्तकिदको हरिणपोदो अत्तभवंतं अणुसरदि॥२८॥

(प्रमादः एषः खलु देव्याः पुत्रकृतको हरिणपोतोऽत्रभवन्तमनुसरति।)

एतेन करुणरसोद्दीपनविभावता हरिणपोतकधारागृहप्रभृतीनां सुतरां समुत्पद्यते। तथा चायमपरः क्षते क्षारावक्षेप इति रुमण्वद्वचनादनन्तरमेतत्परत्वेनैव वाक्यान्तरमुपनिबद्धम्।

यथा —

कर्णान्तस्थितपद्मरागकलिकां भूयः समाकर्षता

चञ्च्वा दाडिमबीजमित्यभिहृता पादेन गण्डस्थली।

येनासौ तव तस्य नर्मसुहृदः खेदान्मुहुः क्रन्दतो

निःशङ्कं न शुकस्य किं प्रतिवचो देवि त्वया दीयते॥२९॥

अत्र शुकस्यैवंविधदुर्ललितयुक्तत्वं वाल्लभ्यप्रतिपादनपरत्वेनोपात्तम्। 'असौ' इति कपोलस्थल्याः स्वानुभवस्वदमानसौकुमार्योत्कर्षपरामर्शः। एवमेवोद्दीपनविभावैकजीविततत्वेन करुणरसः काष्ठाधिरूढिरमणीयतामनीयत।

एवं विप्रलम्भशृङ्गारकरुणयोः सौकुमार्यादुदाहरणप्रदर्शनं विहितम्। रसान्तराणामपि स्वयमेवोत्प्रेक्षणीयम्।

एवं द्वितीयमप्रधानचेतनसिंहादिसम्बन्धि यत्स्वरूपं तदित्थं कवीनां वर्णनास्पदं सम्पद्यते। कीदृशम्— स्वजात्युचितहेवाकसमुल्लेखोज्ज्वलम्। स्वा प्रत्येकमात्मीया सामान्यलक्षणवस्तुस्वरूपा या जातिस्तस्याः समुचितो यो हेवाकः स्वभावानुसारी परिस्पन्दस्तस्य समुल्लेखः सम्यगुल्लेखनं वास्तवेन रूपेणोपनिबन्धस्तेनोज्ज्वलं भ्राजिष्णु, तद्विदाह्लादकारीति यावत्।

यथा—

कदाचिदेतेन च पारियात्रगुहागृहे मीलितलोचनेन।

व्यत्यस्तहस्तद्वितयोपविष्टदंष्ट्राङ्कुराञ्चच्चिबुकं प्रसुप्तम्॥३०॥

अत्र गिरिगुहागेहान्तरे निद्रामनुभवतः केसरिणः स्वजातिसमुचितं स्थानकमुल्लिखितम्। यथा वा—

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः

पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्।

शष्पैर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा

पश्योदग्रेप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति॥३१॥

एतदेव प्रकारान्तरेणोन्मीलयति—

रसोद्दीपनसामर्थ्यविनिबन्धनबन्धुरम्।

चेतनानाममुख्यानां जडानां चापि भूयसा॥८॥

चेतानानां प्राणिनाममुख्यानामप्रधानभूतानां यत्स्वरूपं तदेवंविधं तद्वर्णनीयतां प्रतिपद्यते प्रस्तुताङ्गतयोपयुज्यमानम्। कीदृशम्— रसोद्दीपनसामर्थ्यविनिबन्धनबन्धुरम्। रसाः शृङ्गारादयस्तेषामुद्दीपनमुल्लासनं परिपोषस्तस्मिन् सामर्थ्यं शक्तिस्तया विनिबन्धनं निवेशस्तेन बन्धुरं हृदयहारि। यथा—

चूताङ्कुरास्वादकषायकण्ठः पुंस्कोकिलो यन्मधुरं चुकूज।

मनस्विनीमानविघातदक्षं तदेव जातं वचनं स्मरस्य॥३२॥

जडानां चापि भूयसा— जडानामचेतनानां सलिलतरुकुसुमसमयप्रभृतीनामेवंविधं स्वरूपं रसोद्दीपनसामर्थ्यविनिबन्धनबन्धुरं वर्णनीयतामवगाहते। यथा—

इदमसुलभवस्तुप्रार्थनादुर्निवारं प्रथममपि मनो मे पञ्चबाणः क्षिणोति।

किमुत मलयवातोन्मूलितापाण्डुपत्रैरुपवनसहकारैर्दर्शितेष्वङ्कुरेषु॥३३॥

यथा वा —

उद्भेदाभिमुखाङ्कुराः कुरबकाः शैवालजालाकुल-

प्रान्तं भान्ति सरांसि फेनपटलैः सीमन्तिताः सिन्धवः।

किञ्चास्मिन् समये कृशाङ्गि विलसत्कन्दर्पकोदण्डिक-

क्रीडाभाञ्जि भवन्ति सन्ततलताकीर्णान्यरण्यान्यपि॥३४॥

एवं स्वाभाविकसुन्दरपरिस्पन्दनिबन्धनं पदार्थस्वरूपमभिधाय तदेवोपसंहरति—

शरीरमिदमर्थस्य रामणीयकनिर्भरम्।

उपादेयतया ज्ञेयं कवीनां वर्णनास्पदम्॥९॥

अर्थस्य वर्णनीयस्य वस्तुनः शरीरमिदम् उपादेयता ज्ञेयं ग्राह्यत्वेन बोद्धव्यम्। कीदृशं सत्— रामणीयकनिर्भरम्, सौन्दर्यपरिपूर्णम्, औपहत्यरहितत्वेन तद्विदावर्जकमिति यावत्। कवीनामेतदेव यस्माद्वर्णनास्पदमभिधाव्यापारगोचरम्। एवंविधस्यास्य स्वरूपशोभातिशयभ्राजिष्णोर्विभूषणान्युपशोभान्तरमारभन्ते।

एतदेव प्रकारान्तरेण विचारयति—

धर्मादिसाधनोपायपरिस्पन्दनिबन्धनम्।

व्यवहारोचितं चान्यल्लभते वर्णनीयताम्॥१०॥

व्यवहारोचितं चान्यत्। अपरं पदार्थानां चेतनाचेतनानां स्वरूपमेवंविधं वर्णनीयतां लभते कविव्यापारविषयतां प्रतिपद्यते। कीदृशम्— व्यवहारोचितम्, लोकवृत्तयोग्यम्। कीदृशं सत्— धर्मादिसाधनोपायपरिस्पन्दनिबन्धनम्। धर्मादेश्चतुर्वर्गस्य साधने सम्पादने उपायभूतो यः परिस्पन्दः स्वविलसितं तदेव निबन्धनं यस्य तत्तथोक्तम्। तदिदमुक्तं भवति— यत् काव्ये वर्ण्यमानवृत्तयः प्रधानचेतनप्रभृतयः सर्वे पदार्थाश्चतुवर्गसाधनोपायपरिस्पन्दप्राधान्येन वर्णनीयाः, येऽप्यप्रधानचेतनस्वरूपाः पदार्थस्तेऽपि धर्मार्थाद्युपायभूतस्वविलासप्राधान्येन कवीनां वर्णनीयतामवतरन्ति। तथा च राज्ञां शूद्रकप्रभृतीनां मन्त्रिणां च शुकनासमुख्यानां चतुवर्गानुष्ठानोपदेशपरत्वेनैव चरितानि वर्ण्यन्ते। अप्रधानचेतनानां हस्तिहरिणप्रभृतीनां संग्राममृगयाद्यङ्गतया परिस्पन्दसुन्दरं स्वरूपं लक्ष्ये वर्ण्यमानतया परिदृश्यते। तस्मादेव च तथाविधस्वरूपोल्लेखप्राधान्येन काव्यकाव्योपकरणकवीनां चित्रचित्रोपकरणचित्रकरैः साम्यं प्रथममेव प्रतिपादितम्। तदेवंविधं स्वभावप्राधान्येन रसप्राधान्येन द्विप्रकारं सहजसौकुमार्यसरसं स्वरूपं वर्णनाविषयवस्तुनः शरीरमेवालङ्कार्यतामेवार्हति।

तत्र स्वाभाविकं पदार्थस्वरूपमलङ्करणं यथा न भवति तथा प्रथममेव प्रतिपादितम्। इदानीं रसात्मनः प्रधानचेतनपरिस्पन्दवर्ण्यमानवृत्तेरलङ्कारकारान्तराभिमतामलङ्कारतां निराकरोति—

अलङ्कारो न रसवत् परस्याप्रतिभासनात्।

स्वरूपादतिरिक्तस्य शब्दार्थासङ्गतेरपि॥११॥

अलङ्कारो न रसवत्। रसवदिति योऽयमुत्पादितप्रतीतिर्नामालङ्कारस्तस्य विभूषणत्वं नोपपद्यते इत्यर्थः। कस्मात् कारणात्— स्वरूपादतिरिक्तस्य परस्याप्रतिभासनात्। वर्ण्यमानस्य वस्तुनो यत् स्वरूपमात्मीयः परिस्पन्दस्तस्मादिरिक्तस्यात्यधिकस्य परस्याप्रतिभासनाद् अनवबोधनात्। तदिदमत्र तात्पर्यम्— यत् सर्वेषामेवालङ्कृतीनां सत्कविवाक्यानामिदमलङ्कार्यमिदमलङ्करणम् इत्यपोद्धारविहितो विविक्तभावः सर्वस्य कस्यचित् प्रमातुश्चेतसि परिस्फुरति। रसवदलङ्कारवदिति वाक्ये पुनरवहितचेतसोऽपि न किञ्चिदेतदेव बुध्यामहे।

तथा च— यदि शृङ्गारादिरेव प्राधान्येन वर्ण्यमानोऽलङ्कार्यस्तदन्येन केनचिदलङ्करणेन भवितव्यम्। यदि वा तत्स्वरूपमेव तद्विदाह्लादनिबन्धनत्वादलङ्करणमित्युच्यते तथापि तद्व्यतिरिक्तमन्यदलङ्कार्यतया प्रकाशनीयम्। तदेवंविधो न कश्चिदपि विवेकश्चिरन्तनालङ्काराभिमते रसवदलङ्कारलक्षणोदाहरणमार्गे मनागपि विभाव्यते। यथा च—

रसवद्दर्शितस्पष्टशृङ्गारादि॥३५॥

(इति) रसवल्लक्षणम्। अत्र दर्शिताः स्पष्टाः वा शृङ्गारादयो यत्रेति व्याख्याने काव्यव्यतिरिक्तो न कश्चिदन्यः समासार्थभूतः संलक्ष्यते। योऽसावलङ्कारः काव्यमेवेति चेत्,

तदपि न सुस्पष्टसौष्ठवम्। यस्मात् काव्यैकदेशयोः शब्दार्थयोः पृथक् पृथगलङ्काराः सन्तीत्युपक्रम्येदानीं काव्यमेवालङ्करणमित्युपक्रमोपसंहारवैषम्यदुष्टत्वमायाति।

यदि वा दर्शिताः स्पष्टं शृङ्गारादयो येनेति समासः, तथापि वक्तव्यमेव कोऽसाविति? प्रतिपादनवैचित्र्यमेवेति चेत्, तदपि न सम्यक् समर्थनार्हम्। यस्मात् प्रतिपाद्यमानादन्यदेव तदुपशोभानिबन्धनं प्रतिपादनवैचित्र्यम्, न पुनः प्रतिपाद्यमेव। स्पष्टतया दर्शितं रसानां प्रतिपादनवैचित्र्यं यद्यभिधीयते, तदपि न सुप्रतिपादनम्। स्पष्टतया दर्शने शृङ्गारादीनां स्वरूपपरिनिष्पत्तिरेव पर्यवस्यति। किञ्च, रसवतः काव्यस्यालङ्कार इति तथाविधस्य सतस्तस्यासाविति न किञ्चिदनेन तस्याभिधेयं स्यात्।

अथवा तेनैवालङ्कारेण रसवत्त्वं तस्याधीयते, तदेवं तर्ह्यसौ न रसवतोऽलंङ्कारः प्रत्युत रसवानलङ्कार इत्यायाति, तन्माहात्म्यात् काव्यमपि रसवत् सम्पद्यते। यदि वा तेनैवाहितरससम्बन्धस्य रसवतः काव्यस्यालङ्कार इति तत्पश्चाद्रसवदलङ्कारव्यपदेशमासादयति— यथाग्निष्टोमयाज्यस्य पुत्रो भवितेत्युच्यते— तदपि न सुप्रतिबद्धसमाधानम्। यस्माद् 'अग्निष्टोमयाजि'-शब्दः प्रथमं भूतलक्षणे विषयान्तरे निष्प्रतिपक्षतया समासादितप्रसिद्धिः पश्चाद् भविष्यति वाक्यार्थसम्बन्धलक्षणयोग्यतया तमनुभवितुं शक्नोति। न पुनरत्रैवं प्रयुज्यते। यस्माद्रसवतः काव्यस्यालङ्कार इति तत्सम्बन्धितयैवास्य स्वरूपलब्धिरेव। तत्सम्बन्धिनिबन्धनं च काव्यस्य रसवत्त्वमित्येवमितरेतराश्रयलक्षणदोषः केनापसार्यते। यदि वा रसो विद्यते यस्यासौ तद्वानलङ्कार एवास्तु इत्यभिधीयते तथाप्यलङ्कारः काव्यं वा नान्यत् तृतीयं किञ्चिदत्रास्ति। तत्पक्षद्वितयमपि प्रयुक्तम्। उदाहरणं लक्षणैकयोगक्षेमत्वात् पृथङ् न विकल्प्यते।

मृतेति प्रेत्य सङ्गन्तुं यथा मे मरणं स्मृतम्।

सैवावन्ती मया लब्धा कथमत्रैव जन्मनि॥३६॥

अत्र रतिपरिपोषलक्षणवर्णनीयशरीरभूतायाश्चित्तवृत्तेरतिरिक्तमन्यद्विभक्तं वस्तु न किञ्चिद्विभाव्यते। तस्मादलङ्कार्यतैव युक्तिमती। यदपि कैश्चित्—

स्वशब्दस्थायिसञ्चारिविभावाभिनयास्पदम्॥३७॥

इत्यनेन पूर्वमेव लक्षणं विशेषितम्, तत्र स्वशब्दास्पदत्वं रसानामपरिगतपूर्वमस्माकम्। ततस्त एव रससर्वस्वसमाहितचेतसस्तत्परमार्थविदो विद्वांसः परं प्रष्टव्याः — किं स्वशब्दास्पदत्वं रसानामुत रसवत इति। तत्र पूर्वस्मिन् पक्षे— रस्यन्त इति रसास्ते स्वशब्दास्पदास्तेषु तिष्ठन्तः शृङ्गारादिषु वर्तमानाः सन्तस्तज्ज्ञैरास्वाद्यन्ते। तदिदमुक्तं भवति यत्— स्वशब्दैरभिधीयमानाः श्रुतिपथमवतरन्तश्चेतनानां चर्वणचमत्कारं कुर्वन्तीत्यनेन न्यायेन घृतपूरप्रभृतयः पदार्थाः स्वशब्दैरभिधीयमानास्तदास्वादसम्पदं सम्पादयन्तीत्येवं सर्वस्य कस्यचिदुपभोगसुखार्थिनस्तैरुदारचरितैरयत्नेनैव तदभिधानमात्रादेव त्रैलोक्यराज्यसम्पत्सौख्यसमृद्धिः प्रतिपाद्यते इति नमस्तेभ्यः।

रसवतस्तदास्पदत्वं नोपपद्यते, रसस्यैव स्ववाच्यस्यापि तदास्पदत्वाभावात्। किमुतान्यस्येति। तदलङ्कारत्वं च प्रथममेव प्रतिषिद्धम्। शिष्टं स्थाय्यादिलक्षणं पूर्वं व्याख्यातमेवेति न पुनः पर्यालोच्यते।

यदपि

रसवद्रससंश्रयात्॥३८॥

इति कैश्चिल्लक्षणमकारि तदपि न सम्यक् समाधेयतामधितिष्ठति। तथा हि— रसः संश्रयो यस्यासौ रससंश्रयः, तस्मात् कारणादयं रसवदलङ्कारः सम्पद्यते। तथापि वक्तव्यमेव— कोऽसौ रसव्यतिरिक्तवृत्तिः पदार्थः। काव्यमेवेति चेत् तदपि पूर्वमेव प्रत्युक्तम्, तस्य स्वात्मनि क्रियाविरोधादलङ्कारत्वानुपपत्तेः। अथवा रसस्य संश्रयो रसेन संश्रियते

यस्तस्माद् रससंश्रयादिति। तथापि कोऽसाविति व्यतिरिक्तत्वेन वक्तव्यतामेवायाति। उदाहरणजातमप्यस्य लक्षणस्य पूर्वेण समानयोगक्षेमप्रायमिति (न) पृथक् पर्यालोच्यते।

रसपेशलम्॥३९॥

इति पाठे न किञ्चिदत्रातिरिच्यते। अथ ....। प्रतिपादकवाक्योपारूढपदार्थसार्थस्वरूपमलङ्कार्यरसस्वरूपानुप्रवेशेन (विगलितस्वपरिस्पन्दानां द्रव्यानामिव.....) कथमलङ्करणं भवतीत्येतदपि चिन्त्यमेव। किञ्च तथाभ्युपगमेऽपि प्रधानगुणभावविपर्यासः पर्यस्यतीति न किञ्चिदेतत्।

अत्रैव .... उपक्रमते— शब्दार्थासङ्गतेरपि। शब्दार्थयोरभिधानाभिधेययोरसमन्वयाच्च रसवदलङ्कारोपपत्तिर्नास्ति। अत्र च रसो विद्यते तिष्ठति यस्येति मत्प्रत्ययविहिते तस्यालङ्कार इति षष्ठीसमासः क्रियते। रसवांश्चासावलङ्कारश्चेति विशेषणसमासो वा। तत्र पूर्वस्मिन् पक्षे—रसव्यतिरिक्तमन्यत् पदार्थान्तरं विद्यते यस्यासावलङ्कारः। काव्यमेवेती चेत् तत्रापि तद्व्यतिरिक्तः कोऽसौ पदार्थो यत्र रसवदलङ्कारव्यपदेशः सावकाशतां प्रतिपद्यते? विशेषातिरिक्तः पदार्थो न कश्चित् परिदृश्यते यस्तद्वानलङ्कारस्य इति व्यवस्थितिमासादयति। तदेवमुक्तलक्षणे मार्गे रसवदलङ्कारस्य शब्दार्थसङ्गतिर्नकदाचिदस्ति।

यदि वा निदर्शनान्तरविषयतया समासद्वितयेऽपि शब्दार्थसङ्गतियोजना विधीयते, यथा—

तन्वी मेघजलार्द्रपल्लवतया धौताधरेवाश्रुभिः
शून्येवाभरणैः स्वकालविरहाद् विश्रान्तपुष्पोद्गमा।
चिन्तामौनमिवास्थिता मधुकृतां शब्दैर्विना लक्ष्यते
चण्डी मामवधूय पादपतितं जातानुतापेव सा॥४०॥

यथा वा—

तरङ्गभ्रूभङ्गा क्षुभितविहगश्रेणिरशना

विकर्षन्ती फेनं वसनमिव संरम्भशिथिलम्।

यथाविद्धं याति स्खलितमभिसन्धाय बहुशो

नदीभावेनेयं ध्रुवमसहना सा परिणता॥४१॥

अत्र रसत्वमलङ्कारश्च प्रकटं प्रतिभासते। तस्मान्न कथञ्चिदपि तद्विवेकस्य दुरवधानता। तेन रसवतोऽलङ्कार इति षष्ठीसमासपक्षे शब्दार्थयोर्न किञ्चिदसङ्गतत्वम्, रसपरिपोषपरत्वादलङ्कारस्य तन्निबन्धनमेव रसवत्त्वम्। रसवांश्चासावलङ्कारश्चेति विशेषणसमासपक्षे.......। तथा चैतयोरुदाहरणयोर्लतायाः सरितश्चोद्दीपनविभावत्वेन वल्लभाभावितान्तःकरणतया नायकस्य तन्मयत्वेन (निश्चेतन?)-मेव पदार्थजातं सकलमवलोकयतः तत्साम्यसमारोपणं तद्धर्माध्यारोपणं चेत्युपमारूपककाव्यालङ्कारयोजनं विना न केनचित् प्रकारेण घटते, तल्लक्षणवाक्यत्वात्। सत्यमेतत्, किन्तु 'अलङ्कार' शब्दभिधानं विना विशेषणसमासपक्षे केवलस्य रसवानित्यस्य प्रयोगः प्राप्नोति। रसवानलङ्कार इति चेत् प्रतीतिरभ्युपगम्यते तदपि युक्तियुक्ततां नार्हति....देरभावात्। रसावतोऽलङ्कार इति षष्ठीसमासपक्षोऽपि न सुस्पष्टसमन्वयः । यस्य कस्यचित् काव्यत्वं रसवत्त्वमेव। यस्यातिशयत्वनिबन्धनं तथाविधं तद्विदाह्लादकारि काव्यं करणीयमिति तस्यालङ्कार इत्याश्रिते सर्वेषामेव रूपकादीनां रसवदलङ्कारत्वमेव न्यायोपपन्नतां प्रतिपद्यते। अलङ्कारस्य यस्य कस्यचिद्रसवत्त्वाद्। विशेषणसमासेऽप्येषैव वार्त्ता।

किञ्च, तदभ्युपगम प्रत्येकमुत्स्खलितलक्षणोल्लेखवि ... ... कृतपरिपोषतया लब्धात्मनामलङ्काराणां प्रातिस्विकलक्षणाभिहितातिशयव्यतिरिक्तमनेन किञ्चिदाधिक्यमास्थीयते। तस्मात्तल्लक्षणकरणवैचित्र्यं प्रतिवारितप्रसरमेव परापतति। न

चैवंविधविषये रसवदलङ्कारव्यवहारः सावकाशः, तज्ज्ञैस्तथावगमात्, अलङ्काराणां च मुख्यतया व्यवस्थानात्।

अथवा, चेतनपदार्थगोचरतया रसवदवलङ्कारस्य निश्चेतनवस्तुविषयत्वेन चोपमादीनां विषयविभागो व्यवस्थाप्यते, तदपि न विद्वज्जनावर्जनं विदधाति। यस्मादचेतनानामपि रसोद्दीपनसामर्थ्यसमुचितसत्कविसमुल्लिखितसौकुमार्यसरसत्वादुपमादीनां प्रविरलविषयता निर्विषयत्वं वा स्यादिति शृङ्गारादिनिस्यन्दसुन्दरस्य सत्कविप्रवाहस्य च नीरसत्वं प्रसज्यत इति प्रतिपादितमेव पूर्वसूरिभिः। यदि वा वैचित्र्यान्तरमनोहारितया रसवदलङ्कारः प्रतिपाद्यते, यथाभियुक्तैस्तैरेवाभ्यधायि—

प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः।

काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः॥४२॥

इति। यत्रान्यो वाक्यार्थः प्राधान्यादलङ्कार्यतया व्यस्थितस्तस्मिन् तदङ्गतया विनिबध्यमानः शृङ्गारादिरलङ्कारतां प्रतिपद्यते। यस्माद् गुणप्राधान्यं भावाभिव्यक्तिपूर्वमेवंविधविषये विभूष्यते। भूषणविवेकव्यक्तिरुज्जृम्भते, यथा —

क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोंऽशुकान्तं

गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः सम्भ्रमेण।

आलिङ्गन् योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः

कामीवार्द्रापराधः स दहतु दुरितं शाम्भवो वः शराग्निः॥४३॥

न च शब्दवाच्यत्वं नाम समानं कामिशराग्नितेजसोः सम्भवतीति न तावतैव तयोस्तथाविधविरुद्धधर्माध्यासादिविरुद्धस्वभावयोरैक्यं कथञ्चिदपि व्यवस्थापयितुं पार्यते, परमेश्वरप्रयत्नेऽपि स्वभावस्यान्याथाकर्तुमशक्यत्वात्। न च तथाविधशब्दवाच्यतामात्रादेव तद्विदां तदनुभवप्रतीतिरस्ति। 'गुडखण्ड'- शब्दाभिधानादपि प्रतिविषादेस्तदास्वादप्रसङ्गात्

तदनुभवप्रतीतौ सत्यां रसद्वयसमावेशदोषोऽप्यनिवार्यतामाचरति। यदि वा भगवत्प्रभावस्य मुख्यत्वं द्वयोरप्येतयोरङ्गत्वाद् भूषणत्वमित्युच्यते तदपि न समीचीनम्। यस्मात् कारणस्य वस्तवत्वादिरेव स्यात्। निर्मूलत्वादेव तयोर्भावाभावयोरिव न कथञ्चिदपि साम्योपपत्तिरित्यलमनुचितविषयचर्वणचातुर्यचापलेन।

यदि वा निदर्शनेऽस्मिन्ननाश्वस्तः समाम्नातलक्षणोदाहरणसङ्गतिं सम्यक् सम्मोहमानाः समर्षणा उदाहरणान्तरविन्यासं रसवदलङ्कारस्य व्याचख्युः, यथा—

किं हास्येन न मे प्रयास्यसि पुनः प्राप्तश्चिराद्दर्शनं

केयं निष्करुण प्रवासरुचिता केनासि दूरीकृतः।

स्वप्नान्तेष्विति ते वदन् प्रियतमव्यासक्तकण्ठग्रहो

बुद्ध्वा रोदिति रिक्तबाहुवलयस्तारं रिपुस्त्रीजनः॥४४॥

अत्र भवद्विनिहतवल्लभो वैरिविलासिनीसमूहः शोकावेशादशरणः करुणरसकाष्ठाधिरूढिविहितमेवंविधवैशसमनुभवतीति तात्पर्यप्राधान्ये वाक्यार्थस्तदङ्गतया विनिबध्यमानः प्रवासविप्रलम्भशृङ्गारः (प्रतिभासन्? परत्वमत्र परमार्थः?) परस्परान्वितपदार्थसमर्प्यमाणवृत्तिर्गुणभावेनावभासनादलङ्करणमित्युच्यते। तस्य च निर्विषयत्वाभावाद् रसवदालम्बनविभावादिस्वकारणसामग्रीविरहविहिता लक्षणानुपपत्तिर्न सम्भवति। रसद्वयसमावेशदुष्टत्वमपि दूरमपास्तमेव। द्वयोरपि वास्तवस्वरूपस्य विद्यमानत्वात्तदनुभवप्रतीतौ सत्यां नात्मविरोधः, स्पर्धित्वाभावात्। तेन तदपि तद्विदाह्लादविधानसामर्थ्यसुन्दरम्, करुणरसस्य निश्चायकप्रमाणाभावात्।

प्रवासविप्रलम्भस्य स्वकारणभूतवाक्योपारुढालम्बनविभावादिसमर्प्यमाणत्वं स्वप्नान्तरसमये च तथाविधत्वं युक्त्या सम्भवतस्तस्योभयमुत्पन्नमिति प्रथमतरमेव कथमसौ समुद्भवतीति चे (त) दपि न समञ्जसप्रायम्। यस्माच्चादुविषयमहापुरूष-

प्रतापाक्रान्तिचकितचेतसामितस्ततः स्ववैरिणां तत्प्रेयसीनां च प्रवासनैरपि (प्रकाश०?) पृथगवस्थानं न युक्तिप्रयुक्ततामतिवर्तते ... ... तमेव तदपि चतुरस्रम्। करुणरसस्य सत्यपि निश्चये, तथाविधपरिपोषदशाधाराधिरूढेरेकाग्रतास्तिमितमानसस्य तथाभ्यस्तरसवास-नाधिवासितचेतसः सुचिरात्समासादितस्वप्नसमागमः पूर्वानुभूतवृत्तान्तसमुचितसमारब्धका-न्तसंलापः कथमपि सम्प्रबुद्धः प्रबोधसमनन्तरसमुल्लसितपूर्वपरानुसन्धानविहित-प्रस्तुतवस्तुविसंवादविदारितान्तःकरणो भवद्वैरिविलासिनीसार्थो रोदितीति करूणस्यैव परिपोषपदवीमधिरोहः।

तथाविधव्यभिचार्यौचित्यचारुत्वं तत्स्वरूपानुप्रवेशो वेति कुतः प्रवासविप्रलम्भस्य पृथग्व्यापारे रसगन्धोऽपि? यदि वा प्रेयसः प्राधान्ये तदङ्गत्वात् करुणरसस्यालङ्कारणत्वमित्यभिधीयते तदपि न निरवद्यम्। यस्माद् द्वयोऽरप्येतयोरुदाहरणयोर्मुख्यभूतो वाक्यार्थः करुणात्मनैव विवर्तमानवृत्तिरूपनिबद्धः। पर्यायोक्तान्यापदेशन्यायेन वाच्याताव्यतिरिक्तयोः प्रतीयमानतया न करुणस्य रसत्वाद् व्यङ्ग्यस्य सतो वाच्यत्वमुपपन्नम्। नापि गुणीभूतव्यङ्ग्यस्य विषयः, व्यङ्ग्यस्य करुणात्मनैव प्रतिभासनात्। न च द्वयोरपि व्यङ्ग्यत्वम्, अङ्गाङ्गिभावस्यानुपपत्तेः। एतच्च यथासम्भवमस्माभिर्विकल्पितम्। न पुनस्तन्मात्र... ... ण।

किञ्च, 'काव्ये तस्मिन्नलङ्कारो रसादिः' इति रस एवालङ्कारः केवलः, न तु रसवदिति मत्प्रत्ययस्य जीवितम् न किञ्चिदभिहितं स्यात्। एवं सति शशार्थः .. .. .. दनस्थैव (शशविषाणवदनस्थैव?) तिष्ठतीत्येतदपि न किञ्चित्।

प्रेयो गृहागतं कृष्णमवादीद्विदुरो यथा।

अद्य या मम गोविन्द जाता त्वयि गृहागते।

कालेनैषा भवेत्प्रीतिस्तवैवागमनात्पुनः॥४५॥

तदेवं न क्षोदक्षमतामर्हति। तथा च, कालेनेत्युच्यते तदेव वर्ण्यमानविषतया वस्तुनः स्वभावः, तदेव लक्षणकरणमित्यलङ्कार्यं न किञ्चिदवशिष्यते। तस्यैवोभयमलङ्कार्यमलङ्करणत्वञ्चेत्ययुक्तियुक्तम्। एकक्रियाविषयं युगपदेकस्यैव वस्तुनः कर्मकरणत्वं नोपपद्यते। यदि दृश्यन्ते तथाविधानि वाक्यानि येषामुभयमपि सम्भवति (यथा)—

आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना।

आत्मना कृतिना च त्वमात्मन्येव प्रलीयसे॥४६॥

इत्यभिधीयते, तदपि निःसमन्वयप्रायमेव। यस्मादत्र वास्तवेऽप्यभेदे काल्पनिकमुपचारसत्तानिबन्धनं विभागमाश्रित्य तद्व्यवहारः प्रवर्तते। किञ्च विश्वमयत्वात् परमेश्वरस्य परमेश्वरमयत्वाद्वा विश्वस्य पारमार्थिकेऽप्यभेदे माहात्म्यप्रतिपादनार्थं प्रातिस्विकपरिस्पन्दविचित्रां जगत्प्रपञ्चरचनां प्रति सकलप्रमातृतास्वसंवेद्यमानो भेदावबोधः स्फुटावकाशतां न कदाचिदप्यतिक्रामति। तस्मादत्र परमेश्वरस्यैव रूपस्य कस्यचित्तदाप्यमानत्वाद्वेदनादेः क्रियायाः कर्मत्वम्, कस्यचित् साधकतमत्वात् करणत्वमिति...। उदाहरणे पुनरपोद्धारबुद्धिरिति कल्पनयापि न कथञ्चिद्विभागो विभाव्यते। तस्मात्—

स्वरूपादतिरिक्तस्य परस्याप्रतिभासनात्॥४७॥

इति दूषणमत्रापि सम्बन्धनीयम् । ...... पक्षे च यदेवालङ्कार्यं तदेवालङ्करणमिति प्रेयसो रसवतश्च स्वात्मनि क्रियाविरोधात्—

आत्मैव नात्मनः स्कन्धं क्वचिदप्यधिरोहति॥४८॥

इति स्थितमेव।

इन्दोर्लक्ष्म त्रिपुरजयिनः कण्ठमूलं मुरारि-

दिङ्नागानां मदजलमसीभाञ्जि गण्डस्थलानि।

अद्याप्युर्वीवलयतिलकश्यामलिम्नानुलिप्ता-

न्याभासन्ते वद धवलितं किं यशोभिस्त्वदीयैः॥४९॥

अत्र प्रेयोऽभिहितिरलङ्कार्यः, व्याजस्तुतिरलङ्करणम्। न पुनरुभयोरलङ्कारप्रतिभासो येन तद्व्यपदेशः सङ्करव्यपदेशो वा......, तृतीयस्यालङ्कार्यतया वस्त्वन्तरस्याप्रतिभासनात्।

अन्यस्मिन् विषये प्रेयो (प्रायो?) भणितिविविक्ते वर्णनीयान्तरे प्रेयसो विभूषणत्वादुपमादेरिवोपनिबन्धः प्राप्नोति इति न क्वचिदपि दृश्यते। तस्मादन्यत्रान्यथा (दा?) प्रेयसो न युक्तियुक्तमलङ्करणत्वम् रसवतोऽपि तदेव, योगक्षेमत्वात्।

एवमलङ्करणतां प्रेयसः प्रत्यादिश्य वर्णनीयशरीरत्वात्तदेकरूपाणामन्येषां प्रत्यादिशति

ऊर्जस्व्युदात्ताभिधयोः पौर्वापर्यप्रणीतयोः।

अलङ्करणयोस्तद्वद्भूषणत्वं न विद्यते॥१२॥

न विद्यते, न सम्भवति। कथम् — तद्वत्। तदित्यनन्तरोक्तरसवदादिपरामर्शः। ...... रसवदादिवदेव तयोर्विभूषणत्वं नास्ति।

अनौचित्यप्रवृत्तानां कामक्रोधादिकारणात्।

भावानां च रसानाञ्च बन्ध ऊर्जस्वि कथ्यते॥५०॥

तथा कामोऽस्य ववृधे यथा हिमगिरेः सुताम्।

सङ्ग्रहीतुं प्रववृते हठेनापास्य सत्पथम्॥५१॥

ऊर्जस्वि कर्णेन यथा पार्थाय पुनरागतः।

द्विः सन्दधाति किं कर्णः शल्येत्यहिरपाकृतः॥५२॥

अपहर्ताऽहमस्मीति हृदि ते मास्म भूद्भयम्।

विमुखेषु न मे खड्गः हर्तुं जातु वाञ्छति॥५३॥

समुचितोऽपि रसः परमसौन्दर्यमावहति, तत्र कथमनौचित्यपरिम्लानः कामादिकारणकल्पनोपसंहतवृत्तिरलङ्कारताप्रतिभासः प्रयास्यति।

पशुपतिरपि तान्यहानि कृच्छ्रादगमयदद्रिसुतासमागमोत्कः।

कमपरमवशं न विप्रकुर्युर्विभुमपि तं यदमी स्पृशन्ति भावाः॥५४॥

भरतनयनिपुणमानसैः उदाहरणमेवोर्जितम्। तदेवमयं प्रधानचेतनलक्षणोपकृतातिशयविशिष्टचित्तवृत्ति (वि) शेषवस्तुस्वभाव एव मुख्यतया वर्ण्यमानत्वादलङ्कार्यो न पुनरलङ्कारः।

उदात्तमृद्धिमद्वस्तु॥५५॥

अत्र यद्वस्तु यदुदात्तम् अलङ्करणम्। कीदृशमित्याकाङ्क्षायाम् 'ऋद्धिमत्' इत्यनेन यदि विशेष्यते, तद्यदेव सम्पदुपेतं वस्तु वर्ण्यमानमलङ्कार्यं यदेवालङ्करणमिति स्वात्मनि क्रियाविरोधलक्षणस्य दोषस्य दुर्निवारत्वात् स्वरूपातिरिक्तस्य वस्त्वन्तरस्याप्रतिभासनादूर्जस्विवत्।

अथवा ऋद्धिमद्वस्तु यस्मिन् यस्य वेत्यपि व्याख्यानं क्रियते, तथापि तदन्यपदार्थलक्षणं वस्तु वक्तव्यमेव यत्समानार्थतामुपनीतम्। तदृद्धिमद्वस्तु यस्मिन् तस्य वेति तत्काव्यमेव तथाविधं भविष्यतीति चेत् तदपि न किञ्चिदेव। यस्मात्काव्यस्यालङ्कार इति प्रसिद्धिः, न पुनः काव्यमेवालङ्करणमिति।

यदि वा ऋद्धिमद्वस्तु यस्मिन् यस्य वेत्यसावलङ्कारः। तथापि वर्णनीयालङ्कारणव्य(म?)तिरिक्तमलङ्करणकल्पमन्यदत्र किञ्चिदेवोपलभ्यत इत्युभयथापि शब्दार्थासङ्गतिलक्षणदोषः सम्प्राप्तावसरः सम्पद्यते।

द्वितीयस्याप्युदात्तप्रकारस्यालङ्कार्यत्वमेवोपपन्नम्, न पुनरलङ्कारभावः। तथा चैतस्य लक्षणम्-

चरितञ्च महात्मनाम्।

उपलक्षणतां प्राप्तं नेतिवृत्तत्वमागतम्॥५६॥

इति। तत्र वाक्यार्थपरमार्थविद्भिरेवं पर्यालोच्यताम्— यन्महानुभावानां व्यवहारस्योपलक्षणमात्रवृत्तेरन्वयः प्रस्तुते वाक्यार्थे कश्चिद्विद्यते वा न वेति। तत्र पूर्वस्मिन् पक्षे — तत्र तदलीनत्वात् पृथगभिधेयस्यापि पदार्थान्तरवत्तदवयवत्वेनैव व्यपदेशो न्याय्यः। पाण्यादेरिव शरीरे। न पुनरलङ्कारभावोऽपीति। अन्यस्मिन् पक्षे — तदन्वयाभावादेव वाक्यान्तरवर्तिपदार्थवत्तस्य तत्र सत्तैव न सम्भवति, किं पुनरलङ्करणत्वचर्चा।

तथा समाहितस्यापि प्रकारद्वयशोभिनः॥१३॥

तथा तेनैव पूर्वोक्तेन प्रकारेण समाहिताभिधानस्य चालङ्कारस्य भूषणत्वं न विद्यते नास्तीत्यर्थः।

रसाभावतदाभासवृत्तेः प्रशमबन्धनम्।

अन्यानुभावनिःशून्यरूपं यत्तत्समाहितम्॥५७॥

रसभावतदाभासतत्प्रशान्त्यादिरक्रमः।

अन्यानुभावनिःशून्यरूपो यस्तत्समाहितम्॥

अक्ष्णोः स्फुटाश्रुकलुषोऽरुणिमा विलीनः

शान्तं च सार्धमधरस्फुरणं भ्रुकुट्या।

भावान्तरस्य (तव) गण्डगतोऽपि कोपो

नोद्गाढवासनतया प्रसरं ददाति॥५८॥

यदपि कैश्चित् प्रकारान्तरेण समाहिताख्यमलङ्करणमाख्यातं तस्यापि तथैव भूषणत्वं न विद्यते। तदभिधत्ते- प्रकारद्वयशोभिनः पूर्वोक्तेन प्रकारेण चापरेणेति द्वाभ्यां शोभमानस्य समाहितस्यालङ्कारत्वं न सम्भवति।

किञ्चिदारभमाणस्य कार्यं दैववशात्पुनः।

तत्साधन-समापत्तिर्या तदाहुः समाहितम्॥५९॥

मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः।

उपकाराय दिष्ट्यैतदुदीर्णं घनगर्जितम्॥६०॥

तदेवं चेतनाचेतनपदार्थभेदभिन्नं स्वाभाविक-सौकुमार्य-मनोहरं वस्तुनः स्वरूपं प्रतिपादितम्। इदानीं तदेव कविप्रतिभोल्लिखितलोकोत्तरातिशयशालितया नवनिर्मितं मनोज्ञतामुपनीयमानलोच्यते। तथाविधभूषणविन्यासविहितसौन्दर्यातिशयव्यतिरेकेण भूतत्वनिमित्तभूतं न तद्विदाह्लादकारितायाः कारणम्।

यथा स रसवन्नाम सर्वालङ्कारजीवितम्।

काव्यैकसारतां याति तथेदानीं विवेच्यते॥१४॥

रसेन वर्तते तुल्यं रसवत्त्वविधानतः।

योऽलङ्कारः स रसवत् तद्विदाह्लादनिर्मितेः॥२५॥

यथेत्यादि। यथा स रसवन्नाम यथा येन प्रकारेण पूर्वप्रत्याख्यातवृत्तिरलङ्कारो रसवदभिधानः काव्यैकसारतां याति काव्यैकसर्वस्वतां प्रतिपद्यते सर्वालङ्कारजीवितं सर्वेषामलङ्काराणामुपमादीनां जीवितं स्फुरितं सम्पद्यते। तथा तेन प्रकारेणेदानीमधुना विविच्यते विचार्यते लक्षणोदाहरणभेदेन वितन्यते।

तमेव रसवदलङ्कारं लक्षयति— रसेनेत्यादि। 'योऽलङ्कारः स रसवत्' इत्यन्वयः। यः किल एवंस्वरूपो रूपकादिः रसवदभिधीयते। किं स्वभावेन— रसेन वर्तते तुल्यम्।

शृङ्गारादिना तुल्यं वर्तते, यथा ब्राह्मणवत् क्षत्रियस्तथैव स रसवदलङ्कारः। कस्मात्— रसवत्त्वविधानतः। रसोऽस्यास्तीति रसवत् काव्यम् तस्य भावस्तत्त्वम् ततः, सरसत्वसम्पादनात्। तद्विदाह्लादनिर्मितेश्च। तत् काव्यं विदन्तीति तद्विदः, तज्ज्ञास्तेषामाह्लादनिर्मितेरानन्दनिष्पादनात्। यथा (तथा?) रसः काव्यस्य रसवत्तां तद्विदाह्लादञ्च विदधाति। एवमुपमादिरप्युभयं निष्पादन् भिन्नो रसवदलङ्कारः सम्पद्यते। यथा—

उपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम्।

यथा समस्तं तिमिरांशुकं तथा पुरोऽपि रागाद्गलितं न लक्षितम्॥६१॥

अत्र स्वावसरसमुचितसुकुमारस्वरूपयोर्निशाशशिनोर्वर्णनायां .... रूपकालङ्कारः समारोपितकान्तवृत्तान्तः कविनोपनिबद्धः। स च श्लेषच्छायामनोज्ञविशेषणवक्रभावाद् विशिष्टलिङ्गसामर्थ्याच्च .... काव्यस्य सरसतामुल्लासयंस्तद्विदाह्लादमादधानः स्वयमेव रसवदलङ्कारतां समासादितवान्।

चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं

रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः।

करौ व्याधुन्वत्याः पिबसि रतिसर्वस्वमधरं

वयं तत्त्वान्वेषान्मधुकर! हतास्त्वं खलु कृती॥६२॥

अत्र परमार्थः — प्रधानवृत्तेः शृङ्गारस्य भ्रमरसमारोपितकान्तवृत्तान्तो रसवदलङ्कारः शोभातिशयमाहितवान्।

यथा वा—

कपोले पत्राली॥६३॥

इत्यादौ।

तदेवमनेन न्यायेन—

क्षिप्तो हस्तावलग्नः॥६४॥

इत्यत्र रसवदलङ्कारप्रत्याख्यानमयुक्तम्। सत्यमेतत्, किन्तु विप्रलम्भशृङ्गारता तत्र निवार्यते। शेषस्य पुनस्तत्तुल्यवृत्तान्ततया रसवदलङ्कारत्वमनिवार्यमेव।

न चालङ्कारान्तरे सति रसवदपेक्षानिबन्धनः संसृष्टि-सङ्करव्यपदेशप्रसङ्गः प्रत्याख्येयतां प्रतिपद्यते। यथा—

अङ्गुलीभिरिव केशसञ्चयं सन्निगृह्य तिमिरं मरीचिभिः।

कुड्मलीकृतसरोजलोचनं चुम्बतीव रजनीमुखं शशी॥६५॥

अत्र रसवदलङ्कारस्य रूपकादीनाञ्च सन्निपातः सुतरां न समुद्भासते। तत्र 'चुम्बतीव रजनीमुखं शशी' इत्युत्प्रेक्षालक्षणस्य रसवदलङ्कारस्य प्राधान्ये निबन्धनम्, तदङ्गत्वेनोपदीनां केवलस्य प्रस्तुतपरिपोषाय परिनिष्पन्नवृत्तेः।

ऐन्द्रं धनुः पाण्डुपयोधरेण शरद्दधानार्द्रनखक्षताभम्।

प्रसादयन्ती सकलङ्कमिन्देदुं तापं रवेरभ्यधिकं चकार॥६६॥

'प्रसादयन्ती रवेरभ्यधिकं तापं शरच्चकार' इति समयसम्भवः पदार्थस्वभावस्तद्वाचक- 'वारिद'-शब्दाभिधानं विना प्रतीयमानोत्प्रेक्षालक्षणेन रसवदलङ्कारेण कविना कामपि कमनीयतामधिरोपितः. प्रतीत्यन्तर-मनोहारिणां 'सकलङ्का'दीनां वाचकादीनामुपनिबन्धात्, 'पाण्डुपयोधरेणार्द्रनखक्षताभमैन्द्रं धनुर्दधाना' इति श्लेषोपमयोश्च तदानुगुण्येन विनिवेशनात्। एवं 'सकलङ्कमपि प्रसादयन्ती (शरत्) परस्याभ्यधिकं तापं चकार' इति रूपकालङ्कारनिबन्धनः प्रकटाङ्गनावृत्तान्तसमारोपः सुतरां समन्वयमासादितवान्। अत्रापि प्रतीयमानवृत्ते रसवदलङ्कारस्य प्राधान्यम्, तदङ्गत्वमुपमादीनामिति पूर्ववदेव सङ्गतिः।

लग्नाद्विरेफाञ्जनभक्तिचित्रं मुखे मधुश्रीतिलकं प्रकाश्य।

रागेण बालारुणकोमलेन चूतप्रवालोष्ठमलञ्चकार॥६७॥

अयं रसवतां सर्वालङ्काराणां चूडामणिरिवाभाति।

एवं नीरसानां पदार्थानां सरसतां समुल्लासयितुं रसवदलङ्कारं सामासादिवान्। इदानीं स्वरूपमात्रेणैवावस्थितानां वस्तूनां कमप्यतिशयमुद्दीपयितुं दीपकालङ्कारमुपक्रमते। तच्च पूर्वाचार्यैरादिदीपकं मध्यदीपकमन्तदीपकमिति दीप्यमानपदापेक्षया वाक्यस्यादौ मध्ये चान्ते च व्यवस्थितमिति क्रियापदमेव दीपकाख्यमलङ्करणमाख्यातम्।

मदो जनयति प्रीतिं, सानङ्गं मानुभङ्गुरम् ।

स प्रियासङ्गमोत्कण्ठां, सासह्यां मनसः शुचम्॥६८॥

मालिनीरंशुकभृतः स्त्रियोऽलङ्कुरूते मधुः।

हारीतशुकवाचश्च, भूधराणामुपत्यकाः॥६९॥

चीरीमतीररण्यानीः सरितः शुष्यदम्भसः।

प्रवासिनाञ्च चेतांसि शुचिरन्तं निनीषति॥७०॥

तत्र क्रियापदानां दीपकत्वं प्रकाशमत्वम्, यस्मात् क्रियापदैरेव प्रकाश्यन्ते स्वसम्बन्धितया स्याप्यन्ते।

तदेवं सर्वस्य कस्यचिद्दीपकव्यतिरेकिणोऽपि क्रियापदस्यैकरूपत्वात् दीपकाद् द्वैतं प्रसज्यते।

किञ्च शोभाकारित्वस्य युक्तिशून्यत्वादलङ्करणत्वानुपपत्तिः।

अन्यच्च आस्तां तावत्क्रिया, एवं यस्य कस्यचिद्वाक्यवर्तिनः पदस्य सम्बन्धितया पदान्तरद्योतनस्वभाव एव, परस्परान्वयसम्बन्धनिबन्धनाद्वाक्यार्थस्वरूपस्येति पुनरपि दीपकद्वैतमायाताम्।

आदौ मध्ये चान्ते वा व्यवस्थितं क्रियापदमतिशयमासादयति, येनालङ्कारतां प्रतिपद्यते। तेषां वाक्यादीनां परस्परं तथाविधः कः स्वरूपातिरेकः सम्भवति?

क्रियापदप्रकारभेदनिबन्धनं वाक्यस्य यदादिमध्यान्तं तदेव तदर्थवाचकेष्वपि सम्भवतीत्येवं दीपकप्रकारानन्त्यप्रसङ्गः। दीपकालङ्कारविहितवाक्यान्तर्वतिनः क्रियापदस्य भ्वादिव्यतिरिक्तस्यैव काव्यान्तरव्यपदेशः। यदि वा समानविभक्ती(क्ता?)नां बहूनां कारकाणां नामेकक्रियापदं प्रकाशकं दीपकमित्युच्यते, तत्रापि काव्यच्छायातिशयकारितायाः किं निबन्धनमिति वक्तव्यमेव।

प्रस्तुताप्रस्तुतविध्यसामर्थ्यसम्प्राप्तिप्रतीयमानवृत्तिसाम्यमेव नान्यत्किञ्चिदित्यभियुक्ततरैः प्रतिपादितमेव—

आदिमध्यान्तविषयाः प्राधान्येतरयोगिनः।

अन्तर्गतोपमा धर्मा यत्र तद्दीपकं विदुः॥७१॥

चंकमति करीन्दा दिसागअमअगन्धहारिअहिअआ।

दुक्खं वणे च कइणो मणिइबिसममहाकइ मग्गे॥७२॥

(चङ्क्रम्यन्ते करीन्द्रा दिग्गजमदगन्धहारितहृदयाः।

दुःखं वने च कवयो भणितिविषमहाकविमार्गे॥)

यथा दिक्कुञ्जरमदामोदहारितमानसाः करीन्द्राः कानने कथमपि दुःखं चङ्क्रम्यन्ते, तथा भणितिविषमे वक्रोक्तिविचित्रे महाकविमार्गे... कवय इति 'च' शब्दार्थः।

औचित्यावहमम्लानं तद्विदाह्लादकारणम्।

अशक्तं धर्ममर्थानां दीपयद्वस्तु दीपकम्॥१॥

तदिदानीं दीपकमलङ्कारान्तरकारणं कलयन् कामपि काव्यकमनीयतां कल्पयितुं प्रकारान्तरेण प्रक्रमते— औचित्यावहमित्यादि। वस्तु दीपकं वस्तुसिद्धरूपमलङ्करणं

भवतीति सम्बन्धः, क्रियान्तराश्रवणात्। तदेवं सर्वस्य कस्यचिद्वस्तुनः तद्भावापत्तिरित्याह-दीपयत् प्रकाशयदलङ्करणं सम्पद्यते। किं कस्येत्यभिधत्तेधर्मं परिस्पन्दविशेषमर्थानां वर्णनीयानाम्। कीदृशम्—अशक्तम् अप्रकटम् तेनैव प्रकाश्यमानत्वात्। किंस्वरूपञ्च—औचित्यावहम्। औचित्यमौदार्यम् आवहति यः स तथोक्तः। अन्यच्च किंविधम्, अम्लानम्, प्रत्यग्रम्। अनालीढमिति यावत्। एवं स्वरूपात् तद्विदाह्लादकारणम्, काव्यविदानन्दनिमित्तम्।

एकं प्रकाशकं सन्ति भूयांसि भूयसां क्वचित्।

केवलं पङ्क्तिसंस्थं वा द्विविधं परिदृश्यते॥१७॥

अस्यैव प्रकारान्निरूपयति— द्विविधं परिदृश्यते। द्विप्रकारमवलोक्यते, लक्ष्ये विभाव्यते! कथम् केवलमसहायम्, पक्तिसंस्थं वा पङ्क्तौ व्यवस्थितं तत्तुल्यकक्ष्यायां सहायान्तरोपरचितायां वर्तमानम्। कथम् एकं बहूनां पदार्थानामेकं प्रकाशकं दीपकं केवलमित्युच्यते। यथा—

असारं संसारम्॥७३॥

इत्यादि। अत्र 'विधातुं व्यवसितः' कर्ता संसारादीनामसारत्वप्रभृतीन् धर्मानुद्योतयन् दीपकालङ्कारतामाप्तवान्।

पङ्क्तिसंस्थम्—भूयांसि बहूनि वस्तूनि दीपनानि भूयंसां प्रभूतानां वर्णनीयानां सन्ति वा क्वचिद् भवन्ति वा कस्मिंश्चिद्विषये। यथा—

कइकेसरी वअणाणं मोत्तिअरअणाणं आइवेअटिओ।

ठाणाठाणं जाणइ कुसुमाणं अ जीणमालारो॥७४॥

चन्दमऊएहिणिसा णलिनी कमलेहि कुसुमगुच्छेहि लआ।

हंसेहि सारअसोहा कव्वकहा सज्जनेहि करइ गरुई॥७५॥

(चन्द्रमयूखैर्निशा नलिनी कमलैः कुसुमगुच्छैर्लता।

हंसैश्शरदशोभा काव्यकथा सज्जनैः क्रियते गुर्वी॥)

यदपरं पंक्तिसस्थं नाम... कारणात् त्रिप्रकारम्। त्रयः प्रकाराः प्रभेदा यस्येति विग्रहः। तत्र प्रथमस्तावदनन्तरोक्तो 'भूयांसि भूयसां क्वचिद्भवन्ति' इति।

द्वितीयो— दीपकं दीपयत्यन्यत्रान्यदिति, अन्यस्यातिशयोत्पादकत्वेन दीपकम्। यद्दीपितं तत्कर्मभूतमन्यत् कर्तृभूतं दीपयति प्रकाशयति तदप्यन्यद्दीपयतीति।

द्वितीयदीपकप्रकारो यथा—

क्षोणीमण्डनमण्डनं नृपतयस्तेषां श्रियो भूषणं

ताः शोभां गमयत्यचापलमिदं प्रागल्भ्यतो राजते।

तद्भूष्यं नयवर्त्मनस्तदपि च क्रौर्यक्रियालङ्कृतं

बिभ्राणं यदियत्तदा त्रिभुवनं छेत्तुं व्यवस्येदपि॥७६॥

अत्रोत्तरोत्तराणि पूर्वपूर्वपददीपकानि मालायां कविनोपनिबद्धानीति।

यथा वा—

शुचि भूषयति श्रुतं वपुः प्रशमस्तस्य भवत्यलङ्क्रिया।

प्रशमाभरणं पराक्रमः स नयापादितसिद्धिभूषणः॥७७॥

यथा च—

चारुतावपुरभूषयदासाम्॥७८॥

तृतीयप्रकारेऽत्रैव श्लोकार्द्धे 'दीपक'- स्थाने 'दीपित'मिति पाठान्तरं विधाय व्याख्येयः। तदयमत्रार्थः यद्दीपितं यदन्येन केनचिदुत्पादितातिशयं सम्पादितं वस्तु तत्कर्तृभूतमन्यद्दीपयदुत्तेजयति...।

यथा —

मदो जनयति प्रीतिम्। इत्यादि॥७९॥

ननु पूर्वाचार्यैश्चैतदेव पूर्वमुदाहृतम्। तदेव प्रथमं प्रत्याख्ययेदानीं समाहितमित्यभिप्रायो व्याख्यातव्यः।

सत्यमुक्तम्। तदयं व्याख्यायते— क्रियापदमेकमेव दीपकमिति तेषां तात्पर्यम्, अस्माकं पुनः कर्तृपदादिनिबन्धनानि दीपकानि बहूनि सम्भवन्तीति।

यथायोगि क्रियापदं मनःसंवादि तद्विदाम्।

वर्णनीयस्य विच्छित्तेः कारणं वस्तुदीपकम्॥१८॥

इदानीमेतदेवोपसंहरति— यथायोगि क्रियापदमित्यादि। यथा येन प्रकारेण युज्यते इति यथायोगि क्रियापदं यस्य तत्तथोक्तम्। येन यथा सम्बन्धमनुभवितुं शक्नोति तथा दीपके क्रिया। (अन्यच्च किं रूपम्? मनःसंवादि तद्विदाम्) तद्विदां काव्यज्ञानां मनसि संवदति चेतसि प्रतिफलति यत्तत्तथोक्तम्।

तस्मादेव सहृदयहृदयसंवादमाहात्म्यात्— 'मुखमिन्दुः' इत्यादौ न केवलं रूपकमिति यावत्। 'किं तारुण्यतरोः' इत्येवमाद्यपि। तस्मादेव च सूक्ष्ममतिरिक्तं वा न किञ्चिदुपमानात् साम्यं तस्य निमित्तमिति सचेतसः प्रमाणम्।

अन्यच्च कीदृशम्- वर्णनीयस्य विच्छत्तेः कारणम्। वर्णनीयस्य प्रस्तावाधिकृतस्य पदार्थस्य विच्छित्तेरुपशोभायाः कारणं निमित्तभूतम् (न पुनर्जन्यत्वप्रमेयत्वादिसामान्यम्)। यस्मात् पूर्वोक्तलक्षणेन साम्येन वर्णनीयं सहृदयहारितामावहति।

उपचारैकसर्वस्वं यत्र तत् साम्यमुद्वहत्।

यदर्पयति रूपं स्वं वस्तु तद्रूपकं विदुः॥१९॥

रूपकं विविनक्ति — उपचारेत्यादि। वस्तु तद्रूपकं विदुः तद्वस्तु पदार्थस्वरूपं रूपकाख्यमलङ्कारं विदुः जना इति शेषः। कीदृशम्— यदर्पयतीत्यादि— यत् कर्तृभूतमर्पयति विन्यस्यति। किम्— स्वमात्मीयं रूपं, वाक्यस्य वाचकात्मकं परिस्पन्दम्,

अलङ्कारप्रस्तावदलङ्कारस्यैव स्वसम्बन्धित्वात्। किं कुर्वत् - साम्यमुद्वहत् समत्वं धारयत् (कीदृशम्) उपचारैकसर्वस्वम्— उपचारस्तत्त्वाध्यारोपस्तस्यैकं सर्वस्वं केवलमेव जीवितं तन्निबन्धनत्वाद्, उपचारैः रूपकस्य प्रवृत्तेः।

यस्मादुपचारवक्रताजीवितमेतदलङ्करणं प्रथममेव समाख्यातम्। यन्मूला रसोल्लेखा— रूपकादिरलङ्कृतिः। (इति)

एवं रूपणदिसामान्यलक्षणमुल्लिख्य प्रकारपर्यालोचनेन तमेवोन्मीलयति—

समस्तवस्तुविषयमेकदेशविवर्ति च।

समस्तवस्तुविषयो यस्य तत्तथोक्तम्। तदयमत्रार्थ—यत् सर्वाण्येव प्राधान्येनः— वाच्यतया सकलवाक्योपारूढान्यभिधेयान्यलङ्कार्यतया सुन्दरस्वरूपपरिस्पन्द-समर्पणेन रूपान्तरापादितानि गोचरो यस्येति। यथा—

मृदुतनुलतावसन्तः सुन्दरबदनेन्दुबिम्बसितपक्षः।

मन्मथमातङ्गमदो जयत्यहो तरुणतारम्भः॥८०॥

अत्र पूर्वाचार्यैर्व्याख्यातम्— तथा यदेकदेशेन विवर्तते विघटते विशेषेण वा वर्तते (तत्) तथोक्तम् इति। उभयथाप्येतदयुक्तं भवति। यद्वाक्यस्य यत्कस्मिंश्चिदेव स्थाने स्वपरिस्पन्दसमर्पणात्मकरूपणमादधाति क्वचिदेवेति तदेकदेशविवर्तिरूपकम्। यथा—

तडिद्वलयकक्ष्याणां बलाकामालभारिणाम्।

पयोमुचां ध्वनिर्धीरो दुनोति मम तां प्रियाम्॥८१॥

अत्र विद्युद्वलयस्य कक्ष्यात्वेन, बलाकानां तन्मालात्वेन रूपणं विद्यते। पयोमुचां पुनर्दन्तिभावो नास्तीत्येकदेशविवर्तिरूपकमलङ्कारः। तदत्यर्थयुक्तियुक्तम्, यस्मादलङ्करणस्यालङ्कार्यशोभातिशयोत्पादनमेव प्रयोजनं नान्यत्किञ्चित्।

तदुक्तम्— रूपकापेक्षया किञ्चिद् विलक्षणमेतेन यदि सम्पाद्यते तदेतस्य रूपकप्रकारान्तरतोपपत्तिः स्यात्, तदेतदास्तां तावत्। प्रत्युत कक्ष्यादिनिमित्तरूपणोचितमुख्यवस्तुविषये विघटमानत्वादलङ्कारदोषत्वं दुर्निवारतामवलम्बते। तस्मादन्यच्चैवैतदस्मात्समाधीयते।

रूपकालङ्कारस्य परमार्थस्तावदयम्— यत् प्रसिद्धसौन्दर्यातिशयपदार्थसौकुमार्यनिबन्धनं वर्णनीयस्य वस्तुनः साम्यसमुल्लिखितं स्वरूपसमर्पणग्रहणसामर्थ्यमविसंवादि। तेन 'मुखमिन्दुः' इत्यत्र मुखमिवेन्दुः सम्पाद्यते, तेन रूपणं विवर्तते। तदेवमयमलङ्कारः-

हिमाचलसुतावल्लिगाढालिङ्गितमूर्तये।

संसारमरुमार्गैककल्पवृक्षाय ते नमः॥८२॥

(यथा वा)

उपोढरागेण विलोलतारकम्॥८३॥ इत्यादि।

प्रतीयमानरूपकं यथा—

लावण्यकान्तिपरिपूरितदिङ्मुखेऽस्मिन्

स्मेरेऽधुना तव मुखे तरलायताक्षि।

क्षोभं यदेति न मनागपि तेन मन्ये

सुव्यक्तमेव जलराशिरयं पयोधिः॥८४॥

नयन्ति कवयः काञ्चिद्वक्रभावरहस्यताम्।

अलङ्कारान्तरोल्लेखसहायं प्रतिभावशात्॥२०॥

तदेव विच्छित्त्यन्तरेण विशिनष्टि— एतदेव रूपकाख्यमलङ्करणं काञ्चिदलौकिकवक्रभावरहस्यतां वक्रत्वपरमार्थतां नयन्ति प्रापयन्ति। तथोपनिबद्धानि यथा वक्रताविच्छित्तिवैचित्र्यादिरूढिरमणीयतया तदेव तत्त्वं परं प्रतिभासते। कीदृशम्—

अलङ्कारान्तरोल्लेखसहायम्। अलङ्कारान्तरस्यान्यस्य ससन्देहोत्प्रेक्षाप्रभृतेः उल्लेखः समुद्भेदः सहायः काव्यशोभातिशयोत्पादने सहकारी यस्य तत्तथोक्तम्। कस्मान्नयन्ति— प्रतिभावशात्। स्वशक्तेरायत्तत्वात्। तथाविधे लोककान्तिक्रान्तिगोचरे विषये तस्योपनिबन्धो विधीयते। यत्र तथाप्रसिद्धाभावात् सिद्धव्यवहारावतरणं साहसिकमिवावभासते विभूषणान्तरसहायस्य पुनरुल्लेखत्वेन विधीयमानत्वात् सहृदयहृदयसंवादसुन्दरी परा प्रौढिरुत्पद्यते।

(यथा) —

किं तारुण्यतरो .... इत्यादि॥८५॥

अप्रस्तुतोऽपि विच्छित्तिं प्रस्तुतस्यावतारयन्।

यत्र तत्साम्यमाश्रित्य सम्बन्धान्तरमेव वा॥ २१॥

वाक्यार्थोऽसत्यभूतो वा प्राप्यते वर्णनीयताम्।

अप्रस्तुतप्रशंसेति कथितासावलङ्कृतिः॥२२॥

एवं रूपकं विचार्य तद्दर्शनसम्पन्निबन्धनामप्रस्तुतप्रशंसां प्रस्तौति— अप्रस्तुतोऽपीत्यादि। अप्रस्तुतप्रशंसेति कथितासावलङ्कृतिः— अप्रस्तुतप्रशंसेति नाम्ना सा कथिता अलङ्कारविद्भिरलङ्कृतिः। कीदृशी— यत्र यस्यामप्रस्तुतोऽप्यविवक्षितः पदार्थो वर्णनीयतां प्रति प्राप्यते वर्णनाविषयः सम्पाद्यते। किं कुर्वन्— प्रस्तुतस्य विवक्षितार्थस्य विच्छित्तिमुपशोभामवतारयन् समुल्लासयन्।

द्विविधो हि प्रस्तुतः पदार्थः सम्भवति— वाक्यान्तर्भूतपदमात्रसिद्धः सकलवाक्यव्यापककार्यो विविधस्वपरिस्पन्दातिशयविशिष्टप्राधान्येन वर्तमानश्च। तदुभयरूपमपि प्रस्तुतं प्रतीयमानतया चेतसि विधाय पदार्थान्तरमप्रस्तुतं तद्विच्छित्तिसम्पत्तये वर्णनीयतामस्यामलङ्कृतौ कवयः प्रापयन्ति। किं कृत्वा—

तत्साम्यमाश्रित्य। तदनन्तरोक्तं रूपकालङ्कारोपकारि साम्यं समत्वं निमित्तीकृत्य। सम्बन्धान्तरमेव वा निमित्तभावादि संश्रित्य। वाक्यार्थोऽसत्यभूतो वा— परस्परान्वयपदसमुदायलक्षणवाक्यकार्यभूतः। साम्यं सम्बन्धान्तरं वा समाश्रित्याप्रस्तुतं प्रस्तुतशोभायै वर्णनीयतां यत्र नयन्तीति।

साम्यसमाश्रयणाद्वाक्यान्तर्भूतप्रस्तुतपदार्थप्रशंसा (यथा)—

लावण्यसिन्धुरपरैव हि केयमत्र

यत्रोत्पलानि शशिना सह सम्प्लवन्ते।

उन्मज्जति द्विरदकुम्भतटी च यत्र

यत्रापरे कदलिकाण्डमृणालदण्डाः॥८६॥

सामाश्रयणात्मकलवाक्यव्यापकप्रस्तुतपदार्थप्रशंसा (यथा)—

छाया नात्मन एव या कथमसावन्यस्य निष्प्रग्रहा

ग्रीष्मोष्मापदि शीतलस्तलभुवि स्पर्शोऽनिलादेः कुतः।

वार्ता वर्षशते गते किल फलं भावीति वार्तैव सा

द्राघिम्णा मुषिताः कियच्चिरमहो तालेन बाला वयम्॥८७॥

सम्बन्धान्तराश्रयणाद्वाक्यान्तर्भूतप्रस्तुतपदार्थप्रशंसा (यथा)—

इन्दुर्लिप्त इवाञ्जनेन जडिता दृष्टिर्मृगीणामिव

प्रम्लानारुणिमेव विद्रुमलता श्यामेव हेमप्रभा।

कार्कश्यं कलया च कोकिलवधूकण्ठेष्विव प्रस्तुतं

सीतायाः पुरतश्च हन्त शिखिनां बर्हाः सगर्हा इव॥८८॥

सम्बन्धान्तराश्रयणात् सकलवाक्यव्यापकप्रस्तुतप्रशंसा (यथा)—

परामृशति सायकं क्षिपति लोचनं कार्मुके

विलोकयति वल्लभां स्मितसुधार्द्रवक्त्रं स्मरः।

मधोः किमपि भाषते भुवननिर्जयाग्र्यावनि

गतोऽहमिति हर्षितः स्पृशति गोत्रलेखामहो॥८९॥

तदेवमयमप्रस्तुतप्रशंसाव्यवहारः कवीनामतिविततप्रपञ्चः परिदृश्यते। तस्मात्सहृदयैश्च स्वयमेवोत्प्रेक्षणीयः। प्रशंसाशब्दोऽत्र अर्थप्रकाशादिवद्विपरीतलक्षणया वर्तते।

यद्वाक्यान्तरवक्तत्वं तदन्येन समर्थ्यते।

येनोपशोभानिष्पत्त्यै पर्यायोक्तं तदुच्यते॥२३॥

एवमप्रस्तुतप्रशंसां विचार्य विवक्षितार्थप्रतिपादनाय प्रकारान्तराभिधानत्वादनयैव समानप्रायं पर्यायोक्तं विचारयति— यद्वाक्यान्तरेत्यादि। पर्यायोक्तं तदुच्यते— पर्यायोक्तभिधानमलङ्करणं तदभिधीयते। कीदृशम्— यद्वाक्यान्तरवक्तव्यं वस्तु वाक्यार्थलक्षणं पदसमुदायान्तराभिधेयं तदन्येन वाक्यान्तरेण येन समर्थ्यते प्रतिपाद्यते। किमर्थम्— उपशोभानिष्पत्त्यै विच्छित्तिसम्पत्तये। तत्पर्यायोक्तमित्यर्थः।

तदेवं पर्यायवक्रत्वात् किमत्रातिरिच्यते? पर्यायवक्रत्वस्य पदार्थमात्रं वाच्यतया विषयः पर्यायोक्तस्य वाक्यार्थोप्यङ्गतयेति तस्मात्पृथगभिधीयते। उदाहरणं यथा—

चक्राभिघातप्रसभाज्ञयैव चकार यो राहुवधूजनस्य।

आलिङ्गनोद्दामविलासबन्ध्यं रतोत्सवं चुम्बनमात्रशेषम्॥९०॥

भूभारोद्वहनाय शेषशिरसां सार्थेन सन्नह्यते

विश्वस्य स्थितये स्वयं स भगवान् जागर्ति देवो हरिः।

अद्याप्यत्र च नाभिमानमसमं राजंस्त्वया तन्वता

विश्रान्तिः क्षणमेकमेव न तयोर्जातेति कोऽयं क्रमः॥९१॥

(यथा च—)

इन्दोर्लक्ष्मत्रिपुरजयिनः॥इति॥९२॥

(यथा वा—)

हे हेलाजित...।इति॥९३॥

(यथा च—)

नामाप्यन्यतरो....। इति॥९४॥

सम्भावनानुमानेन सादृश्येनोभयेन वा।

निर्वर्ण्यातिशयोद्रेकप्रतिपादनवाञ्छया॥२४॥

वाच्यवाचकसामर्थ्याक्षिप्तस्वार्थैरिवादिभिः।

तदिवेति तदेवेति वादिभिर्वाचकं विना॥२५॥

समुल्लिखितवाक्यार्थव्यतिरिक्तार्थयोजनम्।

उत्प्रेक्षा .... ॥२६॥

सम्भावनेत्यादि। समुल्लिखितवाक्यार्थव्यतिरिक्तार्थयोजनम् उत्प्रेक्षा। समुल्लिखितः सम्यगुल्लिखितः स्वाभाविकत्वेन समर्पयितुं प्रस्तावितो वाक्यार्थः पदसमुदायोऽभिधेयवस्तु तस्माद् व्यतिरिक्तस्यार्थस्य वाक्यान्तरतात्पर्यलक्षणस्य योजनमुपपादनमुत्प्रेक्षाभिधानमलङ्करणम्। उत्प्रेक्षणमुत्प्रेक्षेति विगृह्यते। किंसाधनेनेत्याह सम्भावनानुमानेन। सम्भावनया यदनुमानं सम्भाव्यमानस्य...तेन।

प्रकारान्तरेणाप्येषा सम्भवतीत्याह- सादृश्येनेति। सादृश्येन साम्येनापि हेतुना समुल्लिखितवाक्यार्थव्यतिरिक्तार्थयोजनमुत्प्रेक्षैव। द्विविधं सादृश्यं सम्भवति— वास्तवं काल्पनिकं च। तत्र वास्तवमुपमादिविषयम्। काल्पनिकमिहाश्रियते।

प्रकारान्तरमस्याः प्रतिपादयति—उभयेन वा। सादृश्यलक्षणेनोभयेन वा कारणद्वितयेन संवलितवृत्तिना प्रस्तुतव्यतिरिक्तार्थान्तरयोजनम्। उत्प्रेक्षा—प्रकारस्य तृतीयस्याप्यस्य केनाभिप्रायेणोपनिबन्धनमित्याह— निर्वर्ण्यातिशयोद्रेकप्रतिपादनवाञ्छया, वर्णनीयोत्कर्षोन्मेषसमर्पणाकाङ्क्षया। कथम्— तदिवेति तदेवेति वा द्वाभ्यां प्रकाराभ्याम्। तदिव अप्रस्तुतमिव, तदतिशयप्रतिपादनाय प्रस्तुतसादृश्योपनिबन्धः। तदेवेत्यप्रस्तुतमिवेति तत्स्वरूपप्रसारणपूर्वकं प्रस्तुतस्वरूपसमारोपः। प्रस्तुतोत्कर्षधाराधिरोहप्रतिपत्तये तात्पर्यान्तरयोजनम्। कैर्वाक्यैरुत्प्रेक्षा प्रकाश्यते इत्याह— इवादिभिः। इवप्रभृतिभिः— शब्दैर्यथायोगं प्रयुज्यमानैरित्यर्थः। न चेदिति पक्षान्तरमभिधत्ते— वाच्यवाचकसामर्थ्याक्षिप्तस्वार्थैः। तैरेव प्रयुज्यमानैः, प्रतीयमानवृत्तिभिर्वा।

सम्भावनानुमानोत्प्रेक्षोदाहरणं (यथा) —

आपीडलोभादुपकर्णमेत्य प्रत्याहितः पांशुयुतैर्द्विरेफैः।

अमृष्यमाणेन महीपतीनां सम्मोहमन्त्रो मकरध्वजेन॥९५॥

काल्पनिकसादृश्योदाहरणं (यथा)—

राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः॥९६॥

यथा वा —

निर्मोकमुक्तिरिव गगनोरगस्य इत्यादि॥९७॥

वास्तवसादृश्योदाहरणं (यथा) —

उत्फुल्लचारुकुसुमस्तबकेन नम्रा

येयं धुता रुचिरचूतलता मृगाक्ष्या।

शङ्के न वा विरहिणी मृदुमर्दनस्य

मारस्य तार्जितमिदं प्रति पुष्पचापम्॥९८॥

तदेवेत्यत्र वादिभिर्विनोदाहरणम्, यथा-

चन्दनासक्तभुजगनिःश्वासानिलमूर्च्छितः।

मूर्च्छयत्येष पथिकान् मधौ मलयमारुतः॥९९॥

यथा वा-

देवि त्वन्मुखपङ्कजेन इत्यादि॥१००॥

यथा वा-

त्वं रक्षसा भीरु इत्यादि॥१०१॥

तदेवेत्यत्र वाचकं विनोदाहरणम्

यथा—

एकैकं दलमुन्नमय्य इत्यादि॥१०२॥

प्रतिभासात्तथा बोद्धुः स्वस्पन्दमहिमोचितम्।

वस्तुनो निष्क्रियस्यापि क्रियायां कर्तृतार्पणम्॥२६॥

तदिदमपरमुत्प्रेक्षायाः प्रकारं परिदृश्यते— प्रतिभासादित्यादि। क्रियायां साध्यस्वरूपायां कर्तृतारोपणं स्वतन्त्रत्वसमारोपणम्। कस्य— वस्तुनः पदार्थस्य निष्क्रियस्य क्रियाविरहितस्यापि। कीदृशम्— स्वस्पन्दमहिमोचितम्। तस्य पदार्थस्य यः स्वस्पन्दमहिमा स्वभावोत्कर्षस्तस्योचितमनुरूपम्। कस्मात्— बोद्धुरनुभवितुस्तथा तेन प्रकारेण प्रतिभासादवबोधात्। 'निर्वर्ण्यातिशयोद्रेकप्रतिपादनवाञ्छया' 'तदिवेति तदेवेति वादिभिर्वाचकं विना' इति पूर्ववदिहापि सम्बन्धनीये। उदाहरणं यथा—

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः॥१०३॥

यथा वा-

तरन्तीवाङ्गानि स्खलदमललावण्यजलधौ॥१०४॥

अत्र दण्डिना विहितमिति न पुनर्विधीयते।

अपह्नुत्यान्यालङ्कारलावण्यातिशयश्रियः।

उत्प्रेक्षा प्रथमोल्लेखजीवितत्वेन जृम्भते॥१०५॥

इत्यन्तरश्लोकः।

यस्यामतिशयः कोऽपि विच्छित्त्या प्रतिपाद्यते।

वर्णनीयस्य धर्माणां तद्विदाह्लाददायिनाम्॥२७॥

एवमुत्प्रेक्षां व्याख्याय सातिशयत्वसादृश्यसमुल्लसितावसरामतिशयोक्तिं प्रस्तौति— यस्यामित्यादि। सातिशयोक्तिरलङ्कृतिरभिधीयते। कीदृशी—यस्यामतिशयः प्रकर्षकाष्ठाधिरोहः कोऽप्यतिक्रान्तप्रसिद्धव्यवहारसरणिः विच्छित्त्या प्रतिपाद्यते वैदग्ध्यभङ्गया समर्प्यते। कस्य— वर्णनीयस्य धर्माणाम्, प्रस्तावाधिकृतस्य वस्तुनः स्वभावानुसम्बन्धिनां परिस्पन्दानाम्। कीदृशानाम्— तद्विदाह्लाददायिनाम्, काव्यविदानन्दकारिणाम्। यस्मात्सहृदयहृदयाह्लादकारि स्वस्पन्दसुन्दरत्वमेव काव्यार्थः, ततस्तदतिशयपरिपोषिकायामतिशयोक्तावलङ्कारकृतः कृतादराः।

स्वपुष्पच्छविहारिण्या चन्द्रभासा तिरोहिताः।

अन्वमीयन्त भृङ्गालिवाचा सप्तच्छदद्रुमाः॥१०६॥

(यथा वा)—

शक्यमोषधिपतेर्नवोदयाः कर्णपूररचनाकृते तव।

अप्रगल्भयवसूचिकोमलाश्छेत्तुमग्रनखसम्पुटैः कराः॥१०७॥

(यथा वा)—

यस्य प्रोच्छ्रयति प्रतापतपने तेजस्विनामित्यलं

लोकालोकधराधरावति यशःशीतांशुबिम्बे प्रथा।

त्रैलोक्यप्रथितावदानमहिमक्षोणीशवंशोद्भवौ

सूर्याचन्द्रमसौ स्वयं तु कुशलच्छायां समारोहतः॥१०८॥

विवक्षितपरिस्पन्दमनोहारित्वसिद्धये।

वस्तुनः केनचित्साम्यं तदुत्कर्षवतोपमा॥२८॥

तां साधारणधर्मोक्तौ वाक्यार्थे वा तदन्वयात्।

इवादिरपि विच्छित्या यत्र वक्ति क्रियापदम्॥२९॥

इदानीं साम्यसमुद्भासिनो विभूषणवर्गस्य विन्यासविच्छित्तिं विचारयति— विवक्षितेत्यादि। यत्र यस्यां वस्तुनः प्रस्तावाधिकृतस्य केनचिदप्रस्तुतेन पदार्थान्तरेण साम्यं सादृश्यं सोपमा उपमालङ्कृतिरूपमित्युच्यते। किमर्थमप्रस्तुतेन साम्यमित्याह— विवक्षितपरिस्पन्दमनोहारित्वसिद्धये। विवक्षितो वक्तुमभिप्रेतो योऽसौ परिस्पन्दः कश्चिदेव धर्मविशेषः तस्य मनोहारित्वं हृदयरञ्जकत्वं तस्य सिद्धिर्निष्पत्तिस्तदर्थम्। कीदृशेन पदार्थान्तरेण— तदुत्कर्षवता। तदिति मनोहारित्वं परामृश्यते। तस्योत्कर्षं सातिशयत्वं नाम तदुत्कर्षः, स विद्यते यस्य स तथोक्तस्तेन तदुत्कर्षवता।

तदिदमत्र तात्पर्यम् — वर्णनीयस्य विवक्षितधर्मसौन्दर्यसिद्ध्यर्थं प्रस्तुतपदार्थस्य धर्मिणो वा साम्यं युक्तियुक्ततामर्हति। धर्मेणेति नोक्तं केवलस्य तस्यासम्भवात्। तदेवमयं धर्मद्वारको धर्मिणोरुपमानोपमेयलक्षणयोः फलतः साम्यसमुच्चयः पर्यवस्यति। ...

एवंविधामुपमां कः प्रतिपादयतीत्याह— क्रियापदमित्यादि। क्रियापदं धात्वर्थः। वाच्यवाचकसामान्यमात्रमत्राभिप्रेतम् न पुनराख्यातपदमेव। यस्मादमुख्यभावेनापि यत्र क्रिया वर्तते तदप्युपमावाचकमेव। ...

तदेवमुभयरूपोऽ(पम)पि क्रियापरिस्पन्दः ...तामुपमां वक्त्यभिधत्ते। कथम्— विच्छित्त्या, वैदग्ध्यभङ्ग्या। विच्छित्तिविरहेणाभिधानेन तद्विदाह्लादकत्वं न सम्भवतीति भावः।

तावत् क्रियापदं न केवलं तां वक्ति यावद् इवादिः इवप्रभृतिरपि। तत्समर्पणसामर्थ्यसमन्वितो यः कश्चिदेव शब्दविशेषः प्रत्ययोऽपि, समासो बहुव्रीह्यादिः विच्छित्त्या तां वक्तीत्यपिः समुच्चे। कस्मिन् सति— साधारणधर्मोक्तौ। साधारणः समानो यो साध्योपमानोपमेययोरुभयोरनुयायिनोः धर्मः...। कुत्र— वाक्यार्थे वा। परस्परान्वयसम्बन्धेन पदसमूहो वाक्यम्। तदभिधेयं वस्तु विभूष्यत्वेन विषयगोचरं तस्याः। कथम्— तदन्वयात्। तदिति पदार्थपरामर्शः। तेषां पदार्थानां समन्वयाद् अन्योऽन्यमभिसम्बद्धत्वात्। वाक्ये बहवः पदार्थाः सम्भवन्ति, तत्र परस्पराभिसम्बद्धत्वात्।

तदेवं तुल्येऽस्मिन् वस्तुसाम्ये सत्युपमोत्प्रेक्षावस्तुनोः पृथक्त्वमित्याह—

उत्प्रेक्षावस्तुसाम्येऽपि तात्पर्यगोचरो मतः॥३०॥

तात्पर्यं पदार्थव्यतिरिक्तवृत्ति वाक्यार्थजीवितभूतं वस्त्वन्तरमेव गोचरो विषयस्तद्विदामन्तःप्रतिभासः यस्य।

अमुख्यक्रियापदपदार्थोपमोदाहरणं यथा—

पूर्णेन्दोस्तव संवादि वदनं वनजेक्षणे।

पुष्णाति पुष्पचापस्य जगत्त्रयजिगीषुताम्॥१०९॥

इवादिप्रतिपाद्यपदार्थोपमोदाहरणं यथा—

निपीयमानस्तबका शिलीमुखैः॥ इत्यादि॥११०॥

आख्यातपदप्रतिपाद्यपदार्थोपमोदाहरणं यथा—

ततोऽरुणपरिस्पन्द॥ इत्यादि॥१११॥

तथाविधत्वाद्वाक्योपमोदाहरणं यथा—

मुखेन सा केतकपत्रपाण्डुना

कृशाङ्गयष्टिः परिमेयभूषणा।

स्थिताल्पतारां तरुणीन्दुमण्डलां

विभातकल्पां रजनीं व्यडम्बयत्॥११२॥

इत्यादि

अप्रतिपाद्यपदार्थोदाहरणं यथा—

चुम्बन्कपोलतलमुत्पुलकं प्रियायाः

स्पर्शोल्लसन्नयनमामुकुलीचकार।

आविर्भवन्मधुरनिद्रमिवारविन्द-

मिन्दुस्पृशास्तिमितमुत्पलमुत्पलिन्याः॥११३॥

तथाविधवाक्योपमोदाहरणं यथा—

पाण्ड्योऽयमंसार्पितलम्बहारः

क्लृप्ताङ्गरागो हरिचन्दनेन।

आभाति बालातपरक्तसानुः

सनिर्झरोद्गार इवाद्रिराजः॥११४॥

आदिग्रहणाद् इवादिव्यतिरिक्तेनापि तथादिशब्दोत्तरेणोपमाप्रतीतिरिति।

पूर्णेन्दुकान्तिवदना नीलोत्पलविलोचना॥११५॥

यान्त्या मुहुर्वलितकन्धरमाननं त-

दावृत्तवृन्तशतपत्रनिभं वहन्त्या।

दिग्धोऽमृतेन च विषेण च पक्ष्मलाक्ष्या

गाढं निखात इव मे हृदये कटाक्षः॥११६॥

माञ्जिष्ठीकृतपट्टसूत्रसदृशः पादानयं पुञ्जयन्

यात्यस्ताचलचुम्बिनीं परिणतिं स्वैरं ग्रहग्रामणीः।

वात्यावेगविवर्तिताम्बुजरजश्छत्रायमाणः क्षणं

क्षीणज्योतिरितोऽप्ययं स भगवानर्णोनिधौ मज्जति॥११७॥

रामेण मुग्धमनसा वृषलाञ्छनस्य

यज्जर्जरं धनुरभाजि मृणालभञ्जम्।

तेनाऽमुना त्रिजगदर्पितकीर्तिभारो

रक्षःपतिर्ननु मनाङ् न विडम्बितोऽभूत्॥११८॥

महीभृतः पुत्रवतोऽपि दृष्टिस्तस्मिन्नपत्ये न जगाम तृप्तिम्।

अनन्तपुष्पस्य मधोर्हि चूते द्विरेफमाला सविशेषसङ्गा॥११९॥

समानवस्तुन्यासोपनिबन्धना प्रतिवस्तूपमापि न पृथग् वक्तव्यतामर्हति, पूर्वोदाहरणेनैव समानयोगक्षेमत्वात्।

समानवस्तुन्यासेन प्रतिवस्तूपमोच्यते।

यथेवानभिधानेऽपि गुणसाम्यप्रतीतितः॥१२०॥

साधु साधारणत्वादिर्गुणोऽत्र व्यतिरिच्यते।

स साम्यमापादयति विरोधेऽपि तयोर्यथा॥१२१॥

कियन्तः सन्ति गुणिनः साधुसाधारणश्रियः।

स्वादुपाकफलानम्राः कियन्तो वाध्वशाखिनः॥१२२॥

अत्र समानविलसितानामुभयेषामपि कविविवक्षितविरलत्वलक्षणसाम्यव्यतिरेकि न किञ्चिदन्यन्मनोहारि जीवितमतिरिच्यमानमुपलभ्यते।

तदेवं प्रतिवस्तूपमायाः प्रतीयमानोपमायामन्तर्भावोपपत्तौ सत्यामिदानीमुपमेयोपमादेरुपमायामन्तर्भावो विचार्यते—

सामान्या, न व्यतिरिक्ता, लक्षणानन्यथास्थितेः॥३१॥

तत्स्वरूपाभिधानं लक्षणं, तस्यानन्यथास्थितेः अतिरिक्तभावेन नावस्थानात्।सा भवत्युपमितिः स्फुटम्।

(तुल्ययोगिताया उदाहरणे)

जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनन्द्यसत्त्वौ।

गुरुप्रदेयाधिकनिस्पृहोऽर्थी नृपोऽर्थिकामादधिकप्रदश्च॥१२३॥

यथा च

उभौ यदि व्योम्नि पृथक्प्रवाहावाकाशगङ्गापयसः पतेताम्।

तेनोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य वक्षः॥१२४॥

न्यूनस्यापि विशिष्टेन गुणसाम्यविवक्षया।

तुल्यकार्यक्रियायोगादित्युक्ता तुल्ययोगिता॥१२५॥

शेषो हिमगिरिस्त्वं च महान्तो गुरवः स्थिराः।

यदलङ्घतमर्यादाश्चलन्तीं बिभृथ क्षितिम्॥१२६॥

उक्तलक्षणे तावदुपमान्तर्भावस्तुल्ययोगितायाः। (अनन्वयोदाहरणं यथा)

तत्पूर्वानुभवे भवन्ति लघवो भावा शशाङ्कादय-

स्तद्वक्त्रोपमितेः परं परिणमेच्चेतो रसायाम्बुजात्।

एवं निश्चिनुते मनस्तव मुखं सौन्दर्यसारावधि।

बध्नाति व्यवसायमेतुमुपमोत्कर्षं स्वकान्त्या स्वयम्॥१२७॥

तदेवमभिधावैचित्र्यप्रकाराणामेवंविधं वैश्वरूप्यम्, न पुनर्लक्षणभेदानाम्।

यत्र तेनैव तस्य स्यादुपमानोपमेयता।

असादृश्यविवक्षातस्तमित्याहुरनन्वयम्॥१२८॥

ताम्बूलरागवलयं स्फुरद्दशनदीधिति।

इन्दीवराभनयनं तदेव वदनं तव॥१२९॥

निदर्शनमप्येवं प्रायमेव।

यैर्वा दृष्टा न वा दृष्टा मुषिताः सममेव ते।

हृतं हृदयमेतेषामन्येषां चक्षुषः फलम्॥१३०॥

(यथा वा)

यत्काव्यार्थनिरूपणं प्रियकथालापा रहोवस्थितिः।

कण्ठान्तं मृदुगीतमादृतसुहृद्दुःखान्तरावेदनम्॥

.... ॥१३१॥

(यथा वा)

तद्वल्गुना युगपदुन्मिषितेन तावत्

सद्यः परस्परतुलामधिरोहतां द्वे।

प्रस्पन्दमानपरुषेतरतारमन्त-

श्चक्षुस्तव प्रञ्चलितभ्रमरं च पद्मम्॥१३२॥

हेलावभग्नहरकार्मुक एष सोऽपि॥ इत्यादि॥

क्रिययैव विशिष्टस्य तदर्थस्योपदर्शनात्।

ज्ञेया निदर्शना नाम यथेववतिभिर्विना॥१३३॥

अयं मन्दद्युतिर्भास्वानस्तं प्रति यियासति।

उदयः पतनायेति श्रीमतो बोधयन्नरान्॥१३४॥

ततः प्रतस्थे कौबेरीं भास्वानिव रघुर्दिशम्।

शरैरुस्रैरिवोदीच्यादुद्धरिष्यन् रसानिव॥१३५॥

निर्याय विद्याथ दिनादिरम्याद्विम्बादिवार्कस्य मुखान्महर्षेः।

पार्थाननं वह्निकणावदाता दीप्तिः स्फुरत्पद्ममिवाभिपेदे॥१३६॥

परिवृत्तिरप्यनेन न्यायेन पृथङ्नास्तीति निरूप्यते।

विनिवर्तनमेकस्य यत्तदन्यस्य वर्तनम्।

न परिवर्तमानत्वादुभयोरत्र पूर्ववत्॥३२॥

तदेवं परिवृत्तेरलङ्करणत्वमयुक्तमित्याह— विनिवर्तनमित्यादि। यदेकस्य पदार्थस्य विनिवर्तनम् अपसारणं तदन्यस्य तद्व्यतिरिक्तस्य परस्य वर्तनं तदुपनिबन्धनम्। तदलङ्करणं न भवति। कस्मात्—उभयोः परिवर्तमानत्वात् मुख्येनाभिधीयमानत्वात्। कथम्—पूर्ववत्, यथापूर्वम्। प्रत्येकं प्राधान्यान्नियमानिश्चितेश्च न क्वचित्कस्यचिदलङ्करणम्। तद्वदिहापि न च तावन्मात्ररूपतया तयोः परस्परविभूषणभावः प्राधान्ये निर्वर्तनप्रसङ्गात्। रूपान्तरनिरोधेषु पुनः साम्यसद्भावे भवत्युमितिरेषा चालङ्कृतिः समुचिता। उपमा पूर्ववदेव।

यथा —

सदयं बुभुजे महाभुजः सहसोद्वेगमियं व्रजेदिति।

अचिरोपनतां स मेदिनीं नवपाणिग्रहणां वधूमिव॥१३७॥

विषयान्तरपरिवर्तनोदाहरणं यथा—

स्वल्पं जल्प बृहस्पते! सुरगुरो! नैषा सभा वज्रिणः॥१३८॥

(धर्मान्तरपरिवर्तनोदाहरणं यथा—)

विसृष्टरागादधरान्निवर्तितः स्तनाङ्गरागारुणिताच्च कन्दुकात्।

कुशाङ्कुरादानपरिक्षताङ्गुलिः कृतोऽक्षसूत्रप्रणयी तया करः॥१३९॥

अत्र गौर्याः करकमललक्षणो धर्मः परिवर्तितः।

क्वचिदेकस्यैव धर्मिणः समुचितस्वसंवेदिधर्मावकाशे धर्मान्तरं परिवर्तते। यथा—

धृतं त्वया वार्द्धकशोभि वल्कलम्॥१४०॥

क्वचिद् बहूनामपि धर्मिणां परस्परस्पर्धिनां पूर्वोक्ताः सर्वे विपरिवर्तन्ते। तथा च लक्षणकारेणात्रैवोदाहरणं दर्शितम्। यथा—

शस्त्रप्रहारं ददता भुजेन तव भूभुजाम्।

चिरार्जितं हृतं तेषां यशः कुमुदपाण्डुरम्॥१४१॥

निर्दिष्टां कुलपतिना स पर्णशालामध्यास्य प्रयतपरिग्रहद्वितीयः।

तच्छिष्याध्ययननिवेदितावसानां संविष्टः कुशशयने निशां निनाय।।

स्वाभिप्रायसमर्पणप्रवणया माधुर्यमुद्राङ्कया

विच्छित्या हृदयेऽभिजातमनसामन्तः किमप्युल्लिखत्।

आरूढं रसवासनापरिणते काष्ठां कवीनां परं

कान्तानाञ्च विलोकितं विजयते वैदग्ध्यवक्रं वचः॥१४३॥

येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतो

यश्चोद्वृत्तभुजङ्गहारवलयोगङ्गाञ्च योऽधारयत्।

यस्याहुः शशिमच्छिरोहर इति स्तुत्यञ्च नामामराः।

पायात्स स्वयमन्धकक्षयकरस्त्वां सर्वदोमाधवः॥१४४॥

मालामुत्पलकन्दलैः प्रतिकचं स्वायोजितां बिभ्रती

नेत्रेणासमदृष्टिपातसुभगेनोद्दीपयन्ती स्मरम्।

काञ्चीदामनिबद्धभङ्गि दधती व्यालम्बिना वाससा

मूर्तिः कामरिपोः सिताम्बरधरा पायाच्च कामस्त्रियः॥१४५॥

दृष्ट्या केशव! गोपरागहृतया किञ्चिन्न दृष्टं मया।

तेनात्र स्खलितास्मि नाथ! पतितां किन्नाम नालम्बसे।

एकस्त्वं विषमेषुखिन्नमनसां सर्वाबलानां गति-

र्गोप्यैवं गदितः सलेशमवताद् गोष्ठे हरिर्वश्चिरम्॥१४६॥

सति तच्छब्दवाच्यत्वे धर्मसाम्येऽन्यथास्थितेः।

व्यतिरेचनमन्यस्मात् प्रस्तुतोत्कर्षसिद्धये॥३३॥

शाब्दः प्रतीयमानो वा व्यतिरेकोऽभिधीयते॥३४॥

एवं श्लेषमभिधाय साम्यैकनिबन्धनत्वादुक्तरूपश्लेषकारणं व्यतिरेकमभिधत्ते— सतीत्यादि। तच्छब्दवाच्यत्वे, स चासौ शब्दश्चेतिविगृह्य, तच्छब्दशक्त्या श्लेषनिमित्तभूतः शब्दः परामृश्यते। तस्य वाच्यत्वेऽभिधेयत्वे सति विद्यमाने। धर्मसाम्ये सत्यपि परस्परस्पन्दसादृश्ये विद्यमाने...। तथाविधशब्दवाच्यत्वस्य धर्मसाम्यस्य चोभयनिष्ठत्वादुभयोः प्रकृतत्वात् प्रस्तुताप्रस्तुतयोरेव तयोर्धर्मादेकस्य यथारुचि केनापि विवक्षितपदार्थान्तरेण अन्यथास्थितेरतथाभावेनावस्थितेः व्यतिरेचनं पृथक्करणम्। (कस्मात्) अन्यस्माद् उपमेयस्योपमानादुपमानस्य वा तस्मात्,। स व्यतिरेकनामालङ्कारोऽभिधीयते कथ्यते। किमर्थम्— प्रस्तुतोत्कर्षसिद्धये। प्रस्तुतस्य वर्ण्यमानस्य वृत्तेश्छायातिशयनिष्पत्तये। स च द्विविधः सम्भवति शाब्दः प्रतीयमानो वा। शाब्दः कविप्रवाहप्रसिद्धः तत्समर्पणसमर्थाभिधानेनाभिधीयमानः। प्रतीयमानो वाक्यार्थसामर्थ्यमात्रावबोध्यः।

प्राप्तश्रीरेष कस्मात्पुनरपि मयि तं मन्थखेदं विदध्या-

न्निद्रामप्यस्य पूर्वामनलसमनसो नैव सम्भावयामि।

सेतुं बध्नाति भूयः किमिति च सकलद्वीपनाथानुयात-

स्त्वय्यायाते वितर्कानिति दधत इवाभाति कम्पः पयोधेः॥१४७॥

(अत्र) तत्त्वाध्यारोपणात् प्रतीयमानतया रूपकमेव पूर्वसूरिभिराम्नातम्।

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।

व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥१४८॥

(श्लेषव्यतिरेको यथा) —

श्लाध्याशेषतनुं सुदर्शनकरः सर्वाङ्गलीलाजित-

त्रैलोक्यां चरणारविन्दललितेनाक्रान्तलोको हरिः।

बिभ्राणां मुखमिन्दुरूपमखिलं चन्द्रात्मचक्षुर्दधत्-

स्थाने यां स्वतनोरपश्यदधिकां सा रुक्मिणी वोऽवतात्॥१४९॥

लोकप्रसिद्धसामान्यपरिस्पन्दाद्विशेषतः।

व्यतिरेको यदेकस्य स परस्तद्विवक्षया॥३५॥

अस्यैव प्रकारान्तरमाह—लोकप्रसिद्धेत्यादि। परोऽन्यः स व्यतिरेकालङ्कारः। कीदृशः— यदेकस्य वस्तुनः कस्यापि व्यतिरेकः पृथक्करणम्। कस्मात्— लोकप्रसिद्धसामान्यपरिस्पन्दात्। लोकप्रसिद्धो जगत्प्रतीतः सामान्यभूतः सर्वसाधारणो यः परिस्पन्दो व्यापारस्तस्मात्। कुतो हेतोः— विशेषतः, कुतश्चिदतिशयात्। कथम्? तद्विक्षया।'तद्' इत्युपमादीनां परमार्थस्तेषां विवक्षया। तद्विवक्षितत्वेन विहितः।

(यथा)

चापं पुष्पितभूतलं सुरचिता मौर्वी द्विरेफावलिः

पूर्णेन्दोरुदयोऽभियोगसमयः पुष्पाग्रेसकरोऽरः।

शस्त्राण्युत्पलकेतकीसुमनसो योग्यात्मनः कामिना।

त्रैलोक्ये मदनस्य सोऽपि ललितोल्लेखो जिगीषाग्रहः॥१५०॥

अत्र सकललोकप्रसिद्धशस्त्राद्युपकरणकलापाच्च जिगीषाव्यवहारान्मन्मथः सुकुमारोपकरणत्वाज्जिगीषा... ...। ननु च भूतलादीनां चापादिरूपणाद्रूपकव्यतिरेक एवायाम्। नैतदस्ति। रूपकव्यतिरेके हि रुपणं विधाय तस्मादेव व्यतिरेचनं विधियते। एतस्मिन् पुनः सकललोकप्रसिद्धात्सामान्यव्यवहारतात्पर्याद् व्यतिरेचनम्। भूतलादीनां चापादिरूपणं विशेषान्तरनिमित्तमात्रमवधार्यताम्।

यत्रोक्ते गम्यतेऽन्योऽर्थस्तत्समानविशेषणः।

सा समासोक्तिरुद्दिष्टा सङ्क्षिप्तार्थतया यथा॥१५१॥

स्कन्धवानृजुरव्यालः स्थिरोऽनेकमहाफलः।

जातस्तरुरयञ्चोच्चैः पातितश्च नभस्वता॥१५२॥

अत्र तरोर्महापुरुषस्य च द्वयोरपि मुख्यत्वे महापुरुषपक्षे विशेषणानि सन्तीति विशेष्यविधायकं पदान्तरमभिधातव्यम्। यदि वा विशेषणेऽन्यथानुपपत्त्या प्रतीयमानतया विशेष्यं परिकल्प्यते तदेवंविधस्य कल्पनस्य स्फुरितं न किञ्चिदिति स्फुटमेव शोभाशून्यता।

अनुरागवती सन्ध्या दिवसस्तत्पुरःसरः।

अहो दैवगतिः कीदृक् न तथापि समागमः॥१५३॥

तुल्यकाले क्रिये यत्र वस्तुद्वयसमाश्रये।

पदनैकेन कथ्येते सहोक्तिः सा मता यथा॥१५४॥

हिमपाताविलदिशो गाढालिङ्गनहेतवः॥

वृद्धिमायान्ति यामिन्यः कामिनां प्रीतिभिः सह॥१५५॥

अत्र परस्परसाम्यसमन्वयो मनोहारि (त्व) निबन्धनमित्युपमैव।

यत्रैकेनैव वाक्येन वर्णनीयार्थसिद्धये।

उक्तिर्युगपदार्थानां सा सहोक्तिः सतां मता॥३६॥

प्रमाणोपपन्नमभिधत्ते तत्र सहोक्तेस्तावत्— यत्रेत्यादि। सा सहोक्तिरलङ्कृतिर्मता प्रतिभाता सतां तद्विदां समाम्नातेत्यर्थः। कीदृशी— यत्र यस्याम् एकेनैव वाक्येनाभिन्नेनैव पदसमूहेन अर्थानां वाक्यार्थतात्पर्यभूतानां वस्तूनां युगपत्तुल्यकालमुक्तिरभिहितिः। किमर्थम्— वर्णनीयार्थसिद्धये। वर्णनीयस्य प्रधानत्वेन विवक्षितस्यार्थस्य वस्तुनः सम्पत्तये। तदिदमुक्तं भवति— यत्र वाक्यान्तरवक्तव्यमपि वस्तु प्रस्तुतार्थनिष्पत्तये विच्छित्त्या तेनैव वाक्येनाभिधीयते। यथा—

हे हस्त दक्षिण मृतस्य शिशोर्द्विजस्य

जीवातवे विसृज शूद्रमुनौ कृपाणम्।

रामस्य पाणिरसि निर्भरगर्भखिन्न-

देवीविवासनपटोः करुणा कुतस्ते॥१५६॥

(यथा च) —

उच्यतां स वचनीयमशेषं नेश्वरे परुषता सखि साध्वी।

आनयैनमनुनीय कथं वा विप्रियाणि जनयन्ननुनेयः॥१५७॥

(यथा वा) —

किं गतेन न हि युक्तमुपैतुं कः प्रिये सुभगमानिनि मानः।

योषितामिति कथासु समेतैः कामिभिर्बहुरसा धृतिरूहे॥१५८॥

यथा वा—

सर्वक्षितिभृतान्नाथ दृष्टा सर्वाङ्गसुन्दरी।

रामा रम्ये वनोद्देशे मया विरहिता त्वया॥१५९॥

अत्र प्रधानभूतविप्रलम्भशृङ्गाररसपरिपोषणसिद्धये वाक्यार्थद्वयमुपनिबद्धम्।

ननु चानेकार्थसम्भवेऽत्र श्लेषानुप्रवेशः कथं न सम्भवतीत्यभिधीयते— तत्र यस्माद्— द्वयोरेकतरस्य वा मुख्यभावे श्लेषः ... तस्मिन् पुनस्तथाविधाभावात्। बहूनां द्वयोर्वा सर्वेषामेव गुणभावः प्रधानार्थपरत्वेनावसानात्। अन्यच्च, तस्मिन्नेकेनैव शब्देन युगपत्प्रदीपप्रकाशवदर्थद्वयप्रकाशनं शब्दार्थद्वयप्रकाशनं वेति शब्दस्तत्र सामान्याय विजृम्भते। सहोक्तेः पुनस्तथाविधस्वाङ्गाभावादेकेनैव वाक्येन पुनः पुनरावर्तमानतया वस्त्वन्तरप्रकाशनं विधीयते। तस्मादावृत्तिरत्र शब्दन्यायतां प्रतिपद्यते।

'सर्वक्षितिभृतां नाथ' इत्यत्र वाक्यैकदेशे श्लेषानुप्रवेशः सम्भवतीत्युच्य...। अत्र वाक्यैकदेशे श्लेषस्याङ्गत्वम्, मुख्यभावः पुनः सहोक्तेरेव।

तदेवमावृत्य वस्त्वन्तरावगतौ सहोक्तेः सहभावाभावादर्थान्वयं परिहाणिः प्रसज्येते। नैतदस्तीति यस्मात्सहोक्तिरित्युक्तम्, न पुनः सहप्रतिपत्तिरिति। तेनात्यन्तसहाभिधानमेव प्रतिपन्नोत्कर्षावगतिरिति न किञ्चिदसम्मद्धम्।

कैश्चिदेषा समासोक्तिः सहोक्तिः कैश्चिदुच्यते।

अर्थान्वयाच्च विद्वद्भिरन्यैरन्यत्वमेतयोः॥१६०॥

वस्तुसाम्यं समाश्रित्य यदन्यस्य प्रदर्शनम्॥३७॥

दृष्टान्तं दावदभिधत्ते— वस्तुसाम्येत्यादि। यदन्यस्य वर्ण्यमानप्रस्तुताद्व्यतिरिक्तवृत्तेः पदार्थान्तरस्य प्रदर्शनमुपनिबन्धनं स दृष्टान्तमालङ्कारोऽभिधीयते। कथं — वस्तुसाम्यं सादृश्यं समाश्रित्य निमित्तीकृत्य। लिङ्गसङ्ख्या-विभक्तिस्वरूपसाम्यवर्जितमिति वस्तुग्रहणम्। (यथा) —

सरसिजमनुविद्धं शैवलेनापि रम्यं

मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।

इयमधिकमनोज्ञा वल्कलेनापि तन्वी

किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥१६१॥

पादत्रयमेवोदाहरणम्, चतुर्थे भूषणान्तरसम्भवात्।

वाक्यार्थान्तरविन्यासो मुख्यतात्पर्यसाम्यतः।

ज्ञेयः सोऽर्थान्तरन्यासः यः समर्पकतयाहितः॥३८॥

अर्थान्तरन्यासभिधत्ते— वाक्यर्थेत्यापि। ज्ञेयः सोऽर्थान्तरन्यासः। अर्थान्तरन्यासनामालङ्कारो ज्ञेयः परिज्ञातः (व्यः)। कः— यः वाक्यार्थान्तरविन्यासः। परस्परान्वितपदसमुदायाभिधेयवस्तु वाक्यार्थः तस्मादयन्त्। प्रकृतत्वात् प्रस्तुतव्यतिरेकि वाक्यार्थान्तरम्। तस्य विन्यासो विशिष्टं न्यसनं तद्विदाह्लादकारितयोनिबन्धः। कस्मात्कारणात्- मुख्यातात्पर्यसाम्यतः मुख्यं प्रस्तावधिकृतत्वातधान् भूतं वस्तुः तस्य तात्पर्यं यत्परत्वेन .... तस्य साम्यतः सादृश्यात्। कथम्— समर्पकतयाहितः। समर्पकत्वेनोपनिबद्धः, तत्तदुपपत्तियोजनेनेति यावत्। यथा**—**

किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥१६२॥

यथा वा —

अशंसयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः।

सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः॥१६३॥

निषेधच्छाययाक्षेपः कान्तिं प्रथयितुं पराम्

आक्षेप इति स ज्ञेयः प्रस्तुतस्यैव वस्तुनः॥३९॥

आक्षेपमभिधत्ते**—** निषेधच्छाययेत्यादि। आक्षेप इति स ज्ञेयः सोऽयमाक्षेपालङ्कारो ज्ञातव्यः। स कीदृशः— प्रस्तुतस्यैव वस्तुनः प्रकृतस्यैवार्थस्य आक्षेपः क्षेपकृत्।

अभिप्रेतस्यापि निर्वर्तनमिति। कथम्— निषेधच्छायया प्रतिषेधविच्छित्त्या। किमर्थम्—कान्तिं प्रथयितुं पराम्। उपशोभां प्रकयितुं प्रकृष्टाम्।

वर्णनीयस्य केनापि विशेषेण विभावना।

स्वकारणपरित्यागपूर्वकं कान्तिसिद्धये॥४०॥

एवं स्वरूपप्रतिषेधवैचित्र्यच्छायातिश्यमलङ्करणमभिधाय कारणप्रतिषेधोत्तेजितातिशयमभिधत्ते— स्वकारणेत्यादि। वर्णनीयस्य प्रस्तुतस्यार्थस्य विशेषेण .... केनाप्यलौकिकेन रूपान्तरेण विभावनेत्यलङ्कृतिरभिधीयते। कथम्— स्वकारणपरित्यागपूर्वकम्। तस्य विशेषस्य स्वमात्मीयं कारणं यन्निमित्तं तस्यपरित्यागः प्रहाणं पूर्वं प्रथमं यत्र। तत्कृत्वेत्यर्थः। किमर्थम्— कान्तिसिद्धये शोभानिष्पत्तये। तदिदमुक्तम्भवति—यया लोकोत्तरविशेषविशिष्टता वर्णनीयतां नीयते। यथा—

असम्भृतं मण्डनमङ्गयष्टेरनासवाख्यं करणं मदस्य।

कामस्य पुष्पव्यतिरिक्तमस्त्रं बाल्यात्परं साऽथ वयः प्रपेदे॥१६४॥

अत्र कृत्रिमकारणपरित्यागपूर्वकं लोकोत्तरसहजविशेषविशिष्टता कवेरभिप्रेता।

यस्मिन्नुत्प्रेक्षितं रूपं सन्देहमेति वस्तुनः(?)।

उत्प्रेक्षान्तरसद्भावाद् विच्छित्त्यै ....॥४१॥

तदेवमसम्भाव्यकारणत्वादविभाव्यमानस्वभावतां विचार्य विचारगोचरस्वरूपतया स्वरूपसन्देहसमर्पितातिशयमभिधत्ते— यस्मिन्नित्यादि। यस्मिन्नलङ्करणे सम्भावनानुमानात् साम्यसमन्वयाश्च स्वरूपान्तरसमारोपद्वारेण उत्प्रेक्षितं प्रतिभालिखितं रूपं पदार्थपरिस्पन्दलक्षणं सन्देहमेति संशयमारोहति। कस्मात् कारणात्— उत्प्रेक्षान्तरसद्भावात्। उत्प्रेक्षाप्रकर्षपरस्यारोहति। कस्मात् कारणात् — उत्प्रेक्षान्तरसद्भवात्।

उत्प्रेक्षाप्रकर्षपरस्यापरस्यापि तद्विषयस्य सद्भावात् किमर्थम्— विच्छित्त्यै शोभायै। तदेवंविधमभिवैचित्र्यं सन्देहाभिधानं वदन्ति। यथा—

रञ्जिता नु विविधास्तरुशैला नामितं नु गगनं स्थगितं नु।

पूरिता नु विषमेषु धरित्री संहृता नु ककुभस्तिमिरेण॥१६५॥

निमीलदाकेकरलोलचक्षुषां प्रियोपकण्ठं कृतगात्रवेपथुः।

निमज्जतीनां श्वसितोद्धतस्तनः श्रमो नु तासां मदनो नु पप्रथे॥१६६॥

(यथा वा) —

किं सौन्दर्यमहार्थसञ्चितजगत्कोशैकरत्नं विधेः

किं शृङ्गाररसरःसरोरुहमिदं स्यात्सौकुमार्यावधि।

किं लावण्यपयोनिधेरभिनवं बिम्बं सुधादीधिते-

र्वक्तुं कान्ततमाननं तव मया साम्यं न निश्चीयते॥१६७॥

अन्यदर्पयितुं रूपं वर्णनीयस्य वस्तुनः।

स्वरूपापह्नवो यस्यामसावपह्नुतिर्मता॥४२॥

एव स्वरूपसन्देहसुन्दरं ससन्देहमभिधाय स्वरूपापह्नुतिरमणीयामपह्नुतिमभिधत्ते— अन्यादित्यादि। पूर्ववदुत्प्रेक्षामूलत्वमेव जीवितमस्याः। सम्भावनानुमानात् सादृश्याच्च वर्णनीयस्य वस्तुनः प्रस्तुतमस्यार्थस्य। अन्यत्किमप्यूर्वं रूपमर्पयितुं रूपान्तरं विधातुं स्वरूपाह्नवः स्वभावालापः सम्भवति यस्याम्, असौ तथाविधभणितिरेवापह्नुतिर्मता प्रतिभाता तद्विदाम्।

पूर्णेन्दोः परिपोषकान्तिवपुषः स्फारप्रभामासुरं

नेदं मण्डलमभ्युदेति गगने भासोज्जिहीर्षोर्जगत्।

मारस्योच्छ्रितमातपत्रमधुना पाण्डुप्रदोषश्रियो

मानो बन्धुजनाभिलाषदलनोऽधोच्छिद्यने किं न ते॥१६८॥

(यथा च) —

तव कुसुम शरत्वं शीतरश्मित्वमिन्दो-

र्द्वयमिदमयथार्थं दृश्यते मद्विधेषु।

विसृजति हिमगर्भैरग्निमन्तर्मयूखै

स्त्वमपि कुसुमबाणान् वज्रसारीकरोषि॥१६९॥

(संसृष्टिर्यथा) —

आश्लिष्टो नवकुङ्कुमारुणरविव्यालोकितैकाश्रितो

लम्बान्ताम्बरया समेत्य भुवने ध्यानान्तरे सन्ध्यया।

चन्द्रांशूत्करकोरकाकुलमतिर्ध्वान्तद्विरेफोऽधुना

देव्या स्थापितदोहृदे कुरवके भाति प्रदोषागमः॥१७०॥

(यथा च)—

ग्लानिं वान्तविषानलेन नयनव्यापारलब्धात्मना

नीता राजभुजङ्ग पल्लवमृदुर्नुनं लतेयं त्वया।

अस्मिन्नीश्वरशेखरेन्दुकिरणस्मेरस्थलीलाञ्छिते

कैलासोपवने यथा सुगहने नैति प्ररोहं पुनः॥१७१॥

(सङ्कीर्णं यथा) —

रूढा जालैर्जटानामुरगपतिफणैस्तत्र पातालकुक्षौ

प्रोद्यद्वालाङ्कुरश्रीर्दिशि दिशि दशनैरेभिराशागजानाम्।

अस्मिन्नाकाशदेशे विकसितकुसुमा राशिभिस्तारकाणां

नाथ त्वत्कीर्तिवल्ली फलति फलमिदं बिम्बमिन्दोः सुराद्रेः॥१७२॥

(यथा वा)—

निर्मिकमुक्तिरिव गगनोरगस्य। इति॥१७३॥

(यथा च)—

अस्याः सर्गविधौ प्रजापतिरभूचन्द्रो। इत्यादि॥१७४॥

भूषणान्तरभावेन शोभाशून्यतया तथा।

अलङ्कारास्तु ये केचिन्नालङ्कारतया मनाक्॥४३॥

एवं यथोपपत्त्यालङ्कारान् लक्षयित्वा केषाञ्चिदलक्षितत्वाल्लक्षणाव्याप्तिदोषं परिहर्तुमुपक्रमते— भूषणेत्यादि। ये पूर्वोक्तव्यतिरिक्ताः केचिदलङ्कारास्तेऽलङ्कारतया मनाङ् न विभूषणत्वेनाभ्युपगताः। केन हेतौना— भूषणान्तरभावेन। तेभ्यो व्यतिरिक्तमन्यद् भूषणं भूषणान्तरम्, तत्स्वभावत्वेन पूर्वोक्तानामेवान्यतमत्वेनेत्यर्थः। शोभाशून्यतया तथा— शोभा कान्तिस्तया शून्यं रहितं शोभाशून्यम्, तस्य भावः शोभाशून्यता तया हेतुभूतया......। तेषामलङ्करणत्वमनुपपन्नम्।

भूयसामुपदिष्टानामर्थानामसधर्मणाम्।

क्रमशो योऽनुनिर्देशो यथासंख्यं तदुच्यते॥१७५॥

पद्मेन्दुभृङ्गमातङ्गपुंस्तकोकिलकलापिनः।

वक्त्रकान्तीक्षणगतिवाणीवालैस्त्स्वया जिताः॥१७६॥

आशिषो भणितिवैचित्र्यविरहान्न काचिदत्र कान्तिर्विद्यते। लक्षणोदाहरणानि नेह पठ्यन्ते, तेषु चाशंसनीयस्यैवार्थस्य मुख्यतया वर्णनीयत्वादलङ्कार्यत्वमिति प्रेयोवङ्कारोक्तानि दूषणान्यापतन्ति।

विशेषोक्तेरलङ्कारान्तरभावेनालङ्कार्यतया च भूषमत्वानुपपत्तिः।

(यथा) —

स एकस्त्रीणि जयति जगन्ति कुसुमायुधः।

हरतापि तनुं यस्य शम्भुना न हृतं बलम्॥१७७॥

अत्र सकललोकप्रसिद्धजयित्वव्यतिरेकिकन्दर्पस्वभावमात्रमेव वाक्यार्थः।

हेतुश्च सूक्ष्मो लेशोऽथ नालङ्कारतया मतः।

समुदायाभिधानस्य वक्रोक्त्यनभिधानतः॥१७८॥

(सूक्ष्मं यथा)—

सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया।

हसन्नेत्रार्पिताकूतं लीलापद्मं निमिलितम्॥१७९॥

(हेतुर्यथा)—

अयमान्दोलितप्रौढचन्दनद्रुमपल्लवः।

उत्पादयति सर्वस्य प्रीतिं मलयमारूतः॥१८०॥

(लेशो यथा) —

राजकन्यानुरक्तं मां रोमोद्भेदेन रक्षकाः।

अवगच्छेयुराज्ञातमहो शीतानिलं वनम्॥१८१॥

केचिदुपमारूपकाणामलङ्करणत्वं मन्यन्ते। तदयुक्तम्, अनुपपद्यमानत्वात्।

(यथा) —

समग्रगगनायाममानदण्डो रथाङ्गिनः।

पादो जयति सिद्धस्त्रीमुखेन्दुनवदर्पणः॥१८३॥

लावण्यादिगुणोज्ज्वला प्रतिपदन्यासैर्विलासाञ्चिता

विच्छत्या रचितैर्विभूषणभरैरल्पैर्मनोहारिणी।

अत्यर्थं रसवत्तयार्द्रहृदया ——— उदाराभिधा

वाक् .... मनो हर्तुं यथा नायिका ॥१८४॥

इति कुन्तलकविरचिते वक्रोक्तिजीविते तृतीयोन्मेषः समाप्तः।

चतुर्थोन्मेष

एवं सकलसाहित्यसर्वस्वकल्पवाक्यवक्रता प्रकाशनान्तरमवसरप्राप्तां प्रकरणवक्रतामवतारयति

यत्र निर्यन्त्रणोत्साहपरिस्पन्दोवशोभिनी।

व्यावृत्तिर्व्यवहर्तृणां स्वाशयोल्लेखशालिनी॥१॥

अव्यामूलादनाशंक्यसमुत्थाने मनोरथे।

काप्युन्मीलति निःसीमा सा प्रबन्धांशवक्रता॥२॥

वक्रता वक्रभावो भवतीति सम्बन्धः। कीदृशी— निःसीमा निरवधिः। यत्र यस्यां व्यवहर्तृणां तद्वयापारपरिग्रहव्यग्राणां व्यावृत्तिः प्रवृत्तिः काप्यलौकिकप उन्मीलति उद्भिद्यते। किंविशिष्टा— निर्यन्त्रणोत्साहपरिस्पन्दोपशोभिनी निरर्गलव्यवसायस्फुरितस्फारविच्छत्तिः। अत एव स्वाशयोल्लेषशालिनी निरुपमनिजहृदयोल्लासितालङ्कृतिः। कस्मिन् सति— अव्यामूलादनाशंक्यसमुत्थाने मनोरथे। कन्दांत्प्रभृत्यसम्भाव्यसमुद्भेदे समीहिते। तदयमत्रार्थ.........।

तत्र नीलस्य सेनापतेर्वचनम्—

शैलाः सन्ति सहस्रशः प्रतिदिशं वल्मीककल्पा इमे

दोर्ददण्डाश्च कठोरविक्रमरसक्रीडासमुत्कण्ठकाः।

कर्णास्यादितकुम्भसम्भवकथाः किन्नाम कल्लोलिनः

प्रायोः गोष्पदपूरणेऽपि कपयः कोतूहलं नास्तिः वः॥१॥

वानराणामुत्तरवाक्यं नेपथ्ये कलकलानन्तरम्—

आन्दोल्यन्ते कति न गिरयः कन्दुकानन्दमुद्रां

व्यातन्वानां करपरिसरे कौतुकोत्कर्षहर्ष।

लोपमुद्रापरिवृढकथाभिज्ञताप्यस्ति किन्तु

व्रीडावेशः पवनतनयोच्छिष्टसंस्पर्शनेन॥२॥

... रामेण पर्यनुयुक्तजाम्बवतोऽपि वाक्यम्—

अनङ्कुरितनिःसीममनोरथरुहेष्वपि।

कृतिनस्तुल्यसंरम्भमारभन्ते जयन्ति च॥३॥

एवं विधमपरमपि तत एव विभावनीयमभिनवाद्भूतं भोगभङ्गीसुभङ्गो सुभाषितसर्वस्वम्।

(एतावदुक्त्वा प्रतियातुकामं शिष्यं महर्षेर्नृपतिर्निषिध्य।)

किं वस्तु विद्वन् गुरवे प्रदेयं त्वया कियद्वेति तमन्वयुङ्क्त॥४॥

गुर्वर्थमर्थी श्रुतपारदृश्वा रघोः सकाशादनवाप्य कामम्।

गतो वदानयान्तरमित्ययं मे मा भूत्परीवादनवावतारः॥५॥

तं भूपतिर्भासुरहेमराशि लब्धं कुवेरादभियास्यमानात्।

दिदेश कौत्साय समस्तमेव पादं सुमेरोरिव वज्रभिन्नम्॥६॥

जनस्य साकेतनिवासिनस्तौ द्वावप्य भूतामभिनन्द्यसत्त्वौ।

गुरुप्रदेयाधिकनिःस्पृहोऽर्थी नृपोर्थिकामादधिकप्रदश्च॥७॥

कुबेरम्प्रति सामन्तसम्भावनया जयाध्यवसायः कामपि सहृदयहृदयहारिता प्रतिपद्यते। अन्यच्च 'जनस्य साकेत' इत्यादि, अत्रापि गुरूप्रदेयदक्षिणातिरिक्तकार्तस्वरमप्रतिगृह्णतः कौत्सस्य रघोरपि प्रार्थितशतगुणं सहस्रगुणं वा प्रयच्छतो निरवधिनिः स्पृहतौदार्यसम्पत्सा-केतवासिनमाश्रित्यापूर्वां कामपि महोत्सवमुद्रामाततान। स्पृहतौदार्यसम्पत्साकेतवासिनमाश्रित्यापूर्वां कामपि महोत्सवमुद्रामातवान्। एवमेषां महाकविप्रबन्धेषु प्रकरणवक्रताविच्छित्तिः रसनिष्यन्दिनी सहृदयैः स्वयमुत्प्रेक्षणीयाः।

इमामेव प्रकारान्तरेण प्रकाशयति—

इतिवृत्तप्रयुक्तेऽपि कथावैचित्र्यवर्त्मनि।

उत्पाद्यलवलावण्यादन्या भवति वक्रता॥३॥

तथा यथा बन्धस्य सकलस्यापि जीवितम्।

भाति करणं काष्ठाधिरूढरसनिर्भरम्॥४॥

तथा उत्पाद्यलवलावण्यादन्या भवति वक्रता— तेन प्रकारेण कृत्रिमसंविधानककामनीयकालौकिकी वक्रभावभङ्गी समुज्जृम्भते, सहृदयानावर्जयतीति यावत्। क्व— कथावैचित्र्यवर्त्मनि-काव्यस्य...... वैचित्र्यभावमार्गे। किंविशिष्टे— इतिवृत्तप्रयुक्तेऽपि इतिहासपरिग्रहेऽपि। तथेति यथाप्रयोगमपेक्षत इत्याह— यथा प्रबन्धस्य सकलस्यापि जीवतं भाति प्रकरणम्। येन प्रकारेण सर्गबन्धादेः समग्रस्यापि प्राणप्रतिममञ्ज्। कीदृग्भूतम्- काष्ठाधिरूढरसनिर्भरम्। प्रथमधाराध्यासितशृङ्गारादिपरिपूर्णम्।

विचिन्तयन्ती यमनन्यमानसा

तपोनिधिं वेत्सि न मामुपस्थितम्।

स्मरिष्यति त्वां न स बोधितोऽपि सन्

कथां प्रमत्तः प्रथमं कृतामिव॥८॥

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्

पर्यत्सुकीभवति यत् सुखितोऽपि जन्तुः।

तच्चेतसा स्मरति नूनमबोधपूर्वं भावस्थिराणि जननान्तरसौहृदानि॥९॥

प्रत्यादिष्टविशेषमण्डनविधिर्वामप्रकोष्ठार्पितं

बिभ्रत्काञ्चनमेकमेव वलयं श्वासोपरक्ताधरः।

चिन्ताजागरणप्रतान्तनयनस्तेजोगुणादात्मनः।

संस्कारोल्लिखितो महामणिरिवजोगुणादात्मनः

अक्लिष्टबालतरुपल्लवलोभनीयं

पीतं मया सदयमेव रतोत्सवेषु।

बिम्बधरं स्पृशसि चेद्भ्रमरप्रियाया-

स्त्वां कारयामि कमलोदरबन्धनस्थम्॥११॥

उत्पाद्यलवलालण्यादिति द्विधा व्याख्येयम्। क्वचिदसदेवोत्पाद्यमथवा आहृतम्, क्वचिदौचित्यत्यक्तं सदप्यन्यथा सम्पाद्यं सहृदयहृदयाह्लादनाय। यथोदात्तरराघवे मारीचवधः। तच्च प्रागेव व्याख्यातम्। एवमन्यदप्यस्या वक्रताविच्छित्तेरुदाहरणं महाकविप्रबन्धेषु स्वयमेवोत्प्रेक्षणीयम्।

निरन्तररसोद्गारगर्भसन्दर्भनिर्भराः।

गिरः कवीनां जीवन्ति न कथामात्रमाश्रिताः॥१२॥

इत्यन्तरश्लोकः

अपरमपि प्रकरणवक्रताप्रकारमाविर्भावयति—

प्रबन्धस्यैकदेशानां फलबन्धानुबन्धवान्।

उपकार्योपकतृत्वपरिस्पन्दः परिस्फुरत्॥५॥

असामान्यसमुल्लेखप्रतिभाप्रतिभासिनः।

सूते नूतनवक्रत्वरहस्यं कस्यचित्कवेः॥६॥

सूते समुन्मीलयति। किम—नूतनवक्रत्वरहस्यम् अभिनववक्र भावोपनिषदम्। कस्यचित्, न सर्वस्य कवेः …… । प्रस्तुतौचित्यचारूरचनाविचक्षणम्येति यावत्। कः— उपकार्योपकर्तृत्वपरिस्पन्दः, अनुग्राह्यानुग्राहकत्वमहिमा। किं कुर्वन्— परिस्फुरन् (समान… (उ)न्मीलन् किं विशिष्टः फलबन्धानुबन्धावान् प्रधानकार्यानुसन्धानवान्,

कार्यानुसन्धाननिपुणः। कस्यैवंविध इत्याह— असामान्यसमुल्लेखप्रतिभाप्रतिभासिनः निरुपमोन्मीलितशक्तिविभावभ्राजिष्णोः। केषाम्— प्रबन्धस्यैकदेशानाम् प्रकरणाम्। तदिदमुक्तम्भवति— सार्वत्रिकसन्निवेशशोभिनाम् प्रकरणानाम्। तदिदमुक्तम्भवति- प्रबन्धावयवानां प्रधानकार्यसम्बन्धनिबन्धनानुग्राह्यग्राहकभावः स्वभावसुभगप्रतिभाप्रकाश्यमानः कस्यचिद्विचक्षणस्य वक्रताचमत्कारिणः कवेरलौकिकं वक्रतोल्लेखलावण्यं समुल्लासयति।

यथा— पुष्पदूषितके द्वितीयेऽङ्केप्रस्थानात्प्रतिनिवृत्य निविङानुकारतः नवरायाविभावद् अमन्दमदनोन्मादमुद्रेण समुद्रदत्तेन निजमहिमकेतनं तुल्यदिवसमानन्दयन्ती समाननाय मलिम्लुचेनेव प्रविशता प्रकम्पावेगविकलालसकायनिपातनिहितानिद्रस्य द्वारदेशशायिनः कलहायमानस्य कुवलयस्यात्कोचकारणं स्वकरादङ्गुलीयकदानं यत्कृतं तच्चतुर्थेऽङ्के मथुराप्रतिनिवृत्तेन तेनैवाशमदमस्य निष्क्रमे समावेदितसमुद्रदत्तवत्तान्तेन कुलकलङ्कातङ्ककदर्थ्यमानस्य सार्थवाहसागरदत्तस्य स्वतनयस्पर्शमानसमाविदूरस्नुषा शीलशुद्धिमुन्मीलयत्तदुपकाराय कल्प्यते। ....।

यथा चोत्तररामचरिते पृथुगर्भभरखेदितदेहाया विदेहाराचदुहितुर्विनोदाय दाशरथिना चिरन्तनराजचरितचित्ररूचिं दर्शयता निर्व्याजविजयिविजृम्भमाणजृम्भकास्त्राण्युद्दिश्य ‘सर्वथेदानी’ त्वत्प्रसूतिमुपस्थास्यन्ति’ इति यदभिहितं तत्पञ्चमेङ्के प्रवीरचर्याचतुरेण चन्द्रकेतुना क्षणं समरकेलिमाकाङ्क्षती तदन्तरायकलितकलकलाड़म्बाराणां वरूथिनीनां सहजजयोत्कण्ठाभ्राजिष्णोर्जाकीनन्दनस्य जम्भकास्त्रव्यापारेण कमप्युपकारमुत्पादयति। तथा च तत्र—

लवः - भवतु जृम्भकास्त्रेण तावत्सैन्यानि स्तम्भयामि इति।

सुमन्त्रः - (संसम्भ्रमम्) वत्स, कुमारेणानेन जृम्भकास्त्रमभिमन्त्रितम्।

चन्द्रकेतुः – आर्य, कः सन्देहः।

व्यतिकर इव भीमो वैद्यतस्तामसश्च

प्रणिहितमपि चक्षुर्ग्रस्तमुक्तं हिनस्ति।

अभिलिखितमिवैतत्सैन्यमस्पन्दमास्ते,

नियतमजितवार्यं जृम्भते जघ्म्भते जघ्म्भकास्त्रम्॥१३॥

आश्चर्यम्—

पातालोदरकुञ्जपुञ्जिसमः श्यामैर्नभौजृम्भकै

रन्तः प्रस्फुरदारकूटकपिलज्योतिर्ज्वलद्दीप्तिभिः।

कल्पाक्षेपकठोरभैरवमरुद्वयस्तैरवस्तीर्यते

नीलाम्भोदतडित्कडारकुहरैर्विन्ध्याद्रिकूटेरिव॥१४॥

अस्या एव प्रकारान्तरं प्रकाशयति —

प्रतिप्रकरणं प्रौढप्रतिभाभोगयोजितः।

एक एवानिभिधेयात्मा बध्यमानः पुनः पुनः॥७॥

अन्यूननूतनाल्लेखरसालङ्करणोज्ज्वलः।

बध्नाति वक्रतोद्भेदभङ्गोमुत्पादिताद्भुताम्॥८॥

बध्यनातीति अत्र निबिडयताति यावत्। काम् वक्रतोद्भेदभङ्गम्, वक्रभावार्विभावात् शोभाम्। किविशिष्टाम्— उत्पादिताद्भुताम् कन्दलितकुतूहलाम्। कः— एक एवाभिधेयात्मा, तदेव वस्तुस्वरूपम्। किं क्रियमाणम्— बध्यमानम् प्रस्तुतौचित्यचारूरचनागोचरतामापद्यमानम्। कथम्— पुनः पुनः वार वारम्। क्व प्रतिप्रकरणम्, प्रकरणे प्रकरणे स्थाने स्थान इति यावत्।

नन्वेवं पुनरूक्तपात्रतामसौ समासादयतीत्याह—अन्यूननूतनोल्लखरसालङ्करणोज्जवलः, अविकलाभिनयोल्लासशृङ्गाररूपकादिपरिस्पन्द-भ्राजिष्णुः। यस्मात्प्रौढप्रतिभाभोगयोजितः, प्रगल्भतरप्रज्ञाप्रकरप्रकाशितः। अयमस्य परमार्थः तदेवं सकलचन्द्रोदयादिप्रकरणप्रकारेषु वस्तु प्रस्तुतकथासंविधानकानुरोधान्मुहुर्मुहुरूप-निबध्यमानं यदि परिपूर्णपूर्वविलक्षणरूपकाद्यलङ्काररामणीयकनिर्भरं भवति तदा कामपिं रामणीयक मर्यादां वक्रतामवतारयति।

कुरवकतरुर्गाढाश्लेषं मुखासवलालनाम्।

वकलविटपी रक्ताशोकस्तथा चरणाहतिम्॥१५॥

धारावेश्म विलोक्य दीनवदनो भ्रान्त्वा च लीलागृहा-

न्निश्वस्यायतमाशु केशरलतावीथीषु कृत्वा दृशः।

किं मे पार्श्वमुपैषि पुत्रककृतैः किं चाटुभिः कूरया

मात्रा त्वं परिवर्जितः सह मया यान्त्यातिदीर्घाभुवप्॥१६॥

कर्णान्तस्थितपद्मरागकलिकां भूयः समाकर्षता

चञ्च्वा दाडिमबीजमित्यभिहता पादेन गण्डस्थली।

येनासौ तव तस्य नर्मसुहृदः खेदान्मुहुः क्रन्दतो

निःशाङ्कं न शुकस्य किं प्रतिवचो देवि त्वया दीयते॥१७॥

राजा **(सास्रम्)—**

सर्वत्र ज्वलितेषु वेश्मसु भयादालीजने विद्रते

त्रासोत्कम्पविहस्तया प्रतिपदं देव्या पतन्त्या तदा।

हा नाथेति मुहुः प्रलापपरया दग्धं वराक्या तथा

शान्तेनापि वयं तु तेन दहनेनाद्यापि दह्यामहे॥१८॥

चतुर्थेऽङ्के राजा (सकरूणमात्मगतम्)—

चक्षुर्यस्य तवाननादपगतं नाभूत् क्वचिन्निर्वृतं

येनैषा सततं त्वदेकशयनं वक्षःस्थली कल्पिता।

येनोक्तासि त्वया विना वत जगच्छून्यं क्षणाज्जायते

सोऽयं दम्भघृतव्रतः प्रियतमे कर्तुं किमप्युद्यतः॥१९॥

भ्रूरभङ्ग रुचिरे ललाटफलके तारं समारोपयन्

वाष्पाम्बुप्लुतपीतपत्ररचनां कुर्यात्कपोलस्थलीम्।

व्यावृत्तैर्विनिबन्धचाटुमहिमामालोक्य लज्जानतां

तिष्ठेत्किं कृतकोपभारकरुणैराश्वासयैनां प्रियाम्॥२०॥

इति 'रोदिति' इत्यन्तेन मनागुन्मादमुद्राप्युन्मीलिता तमेव करूणरसमेव प्रोद्दपपयति। षष्ठेङ्केराजा हा देवि!

किं प्राणा न मया तवानुगमनं कर्तुं समुत्साहिता

बद्धा किन्न जटा न वा प्ररुदितं भ्रान्तं वने निर्जने।

त्वत्सम्प्राप्तिविलोभनेन पूनरप्यूनेन पापेन किं

किं कृत्वा कुपिता यदद्य न वचस्त्वं में ददासि प्रिये॥२१॥

षष्ठेऽङ्के राजा हा देवि!

त्वत्सम्प्राप्तिविलोभनेन सचिवैः प्राणा मया धारिता-

स्तन्मत्वा त्यजतः शरीरकमिदं नैवास्ति निः स्नेहता।

आसन्नोऽवसरस्तथानुगमने जाता धृतिः किन्त्वयं

खेदो यच्छतधा गतं न हृदयं तद्वत् क्षणे दारुणे॥२२॥

प्रमाद्यता दशरथेन राज्ञा स्थविरान्धनपस्विबालवधो व्यधीयतेति एकवाक्यशक्यप्रतिपादनः पुनरप्ययमर्थः परमार्थसरससरस्वतीसर्वस्वायमानप्रतिभाविधानकलेशेन तादृश्या विच्छित्त्या विस्फुरितश्चेतनचमत्कारकरणतामधितिष्ठति।

व्याघ्रानभीरभिमुखोत्पतितान्गुहाभ्यः

फुल्लासनाग्रविटपानिव वायुरुग्णान्।

शिक्षाविशेषलघुहस्ततया निमेषा-

तूणीचकार शरपूरितवक्त्ररन्ध्रान्॥२३॥

अपि तुरगसमीपादुत्पतन्तं मयूरं

न स रुचिरकलापं बाणलक्ष्यीचकार।

सपदि गतमनस्कश्चिमाल्यानुकीर्णे

रतिविगलितबन्धे केशपाशेप्रियायाः॥२४॥

लक्ष्यीकृतस्य हरिणस्य हरिप्रभावः

प्रेक्ष्य स्थितां सहचरीं व्यवधाय देहम्।

आकर्णकृष्टमपि कामितया स धन्वी

बाणं कृपामृदुमनाः प्रतिञ्जहार॥२५॥

स ललितकुसुमप्रवालशय्यां

ज्वलितमहौषधिदीपिकासनाथम्।

नरपतिरतिवाहयाम्बभूव

क्वचिदसमेतपरिच्छदस्त्रियायाम्॥२६॥ इति।

विस्मृतान्यकरणीयमात्मनः

सचिवावलम्बितधुरं धराधिपम्।

परिवृद्धरागमनुबन्धसेवया

मृगया जहार चतुरेव कामिनी॥२७॥

अथ जातु रुरोर्गृहीतवर्त्मा विपिने पार्श्वचरैरलक्ष्यमाणः।

श्रमफेनमुधा तपस्विगाढां तमसां प्राप नदीं तुरङ्गमेण॥२८॥

शापोऽप्यदृष्टनयननपद्मशोभे सानुग्रहो भगवता मयि पातितोऽयम्।

कृष्यां दहन्नपि खलु क्षितिमिन्धनेद्धो बीजप्ररोहजननीं ज्वलनः करोति॥२९॥

कथावैचित्र्यपात्रं तद्वक्रिमाणं प्रपद्यते।

यदङ्गं सर्गबन्धादेः सौन्दर्याय निबध्यते॥९॥

प्रसङ्गेनास्या एव प्रभेदान्तरमुन्मीलयति।........... वक्रिमाणम्। किं विशिष्टम्— कथावैचित्र्यपात्रम् प्रस्तुतसंविधानकभङ्गीभाजनम्। किं तत् यदङ्ग सर्गबन्धादेः सौन्दर्याय निबध्यते। यज्जलक्रिडादिप्रकरणं महाकाव्यप्रभृतेरूपशोभानिष्पत्त्यै निवेश्यते। अयमस्य परमार्थः प्रबन्धेषौ जलकेलिकुसुमावचयप्रभृतिप्रकरणं प्रकान्तसंविधानकानुबन्धिनिबध्यमानं निधानमिव कमनीयसम्पदः सम्पद्यते।

अथोर्मिलोलोन्मदाराजहंसे रोधोलतापुष्पवहे सरय्वाः।

विहर्तुमिच्छा वनितासखस्य तस्याम्भसि ग्रीष्मसुखे बभूव॥३०॥

अवैमि कार्यान्तरमानुषस्य विष्णोः सुताख्यामपरां तनुं त्वाम्।

सोऽहं कथन्नाम तवाचरेयमाराधनीयस्य धृतेविधातम्॥३१॥

कराभिधातोत्थितकन्दुकेयमालोक्य बालातिकुतूहलेन्।

हृदात्पतज्ज्योतिरिवान्तरिक्षादादत्त जैत्राभरणं त्वदीयम्॥३२॥

तदेतदाजानुविलम्बिना ते ज्याधातरेखाकिणलाञ्छनेन।

भुजेन रक्षापरिघेण भूमेरुपैतु योगं पुनरंसलेन॥३३॥

इमां स्वसारञ्च यवीयसीं मे कुमुद्वतीं नार्हसि नानुमन्तुम्।

आत्मापराधं नुदतीं चिराय शुश्रुषया पार्थिव पादयोस्ते॥३४॥

पुनरप्यस्याः प्रभेदमुद्भवयति-

यत्राङ्गिरसनिष्यन्दनिकषः कोऽपि लक्ष्यते।

पूर्वोत्तरैसम्पाद्यः साङ्कादेः कापि वक्रता॥१०॥

साङ्कादेः कापि वक्रता ...... प्रकरणस्य सा काप्यलौककी वक्रता वक्रभावो भवतीति सम्बन्धः। यत्राङ्गिरसनिष्यन्दनिकषः कोऽपि लक्ष्यते— यत्र यस्यामङ्गी रमो यः प्राणरूपः तस्य निष्यन्दः प्रवाहः, तस्य काञ्चनस्येव निकषः परीक्षापदविषयो विशेषः कोऽपि भूतनिर्वाणनिरूपमो लक्ष्यते......। किं विशिष्टः पूर्वोत्तरैरससम्पाद्यः, प्राक्परवृत्तैरङ्काद्यैः सम्पादयितुमशक्यः। यथा—

विक्रमोर्वश्यामुन्मत्ताङ्कः। (यत्र) विप्रललम्भशृङ्गारोऽङ्गी रसः।

तथा च तदुपक्रम एव राजा (ससम्भ्रमम्) — आ दुरात्मन्, तिष्ठ तिष्ट, क्व नु खलु प्रियतमामादाय गच्छसि। (विलोक्य) कथं शैलशिखराद् गगनमुत्प्लुत्य बाणैर्मामभिवर्षति। (विभाव्य सवाष्पम्) कथं विप्रलब्धोऽस्मि।

नवजलधरः सन्नद्धोऽयं न दृप्तनिशाचरः

सुरधनुरिदं दूराकृष्टं न नाम शरासनम्।

अयमपि पटर्धारासारो न बाणपरम्परा

कनकनिकषस्निग्धा विद्युत प्रिया न ममोर्वशी॥३५॥

(अन्यच्च)

पद्भ्यां स्पृशेद्वसुमतीम् ....। इत्यादि॥३६॥

(अन्यच्च)

तरङ्गभ्रुभङ्गा क्षुभितविहगश्रेणिरसना। इत्यादि॥३७॥

(यथा वा)

किरातार्जुनीये बाहुयुद्धप्रकरणम्।

पुनरिमामेवान्यथा प्रथयति-

प्रधानवस्तुनिष्पत्त्यै वस्त्वन्तरविचित्रता।

यत्रोल्लसति सोल्लेखा सापराप्यस्य वक्रता॥११॥

अपरापि अस्य प्रकरणस्य वक्रता वक्रभावो भवतीति सम्बन्धः। यतोल्लसति उन्मीलति सोल्लेखा अभिनवोद्भेमङ्गीसुभगा...... प्रतिरूपमितरद्वस्तु तस्य विचित्रता वैचित्र्यं नूतनचमत्कार इति यावत्। किमर्थम्— प्रधानवस्तुनिष्पत्तयै। प्रधानमविकृतं प्रकरणं कामपि वक्रिमाणमाक्रामति।

(ततः प्रविशति रज्जुहस्तः पुरुषः)

पुरुषः- छग्गुणसञ्जोअदिढा उवाअपरिवाडिदपासमुही।

चाणक्कणीदिरज्जू रिउसञ्जमणउजुआ जअदि॥३८॥

(षङ्गुणसंयोगदृढा उपायपरिपाटीघटितपाशमुखी।

चाणक्यनीतिरज्जू रिपुसंयमनऋजुका जयति॥३९॥)

राक्षसः - भद्र! अथाग्निप्रवेशे तव सुहृदः को हेतुः? किमौषधिपथातिगैरूपहतो महाव्याधिमः।

पुरूषः - अज्ज! णहि णहि। (आर्य! नहि नहि।)

राक्षसः - किमग्निविषकल्पया नरपतेर्निरस्तः क्रुधा?

पुरूषः - अज्ज! सन्तं पाबं, सन्तं पाबं। चन्दउत्तस्स जणपदेसु अणिसंसा पहिवक्षी। (आर्य! शान्तं पापं, शान्तं पापम्। चन्द्रगुप्तस्य जनपदेष्वनृशंसा प्रतिपत्तिः।)

राक्षसः — अलभ्यमनुरक्तवान् किमयमन्यनारीजनम्।

पुरुषः - (कर्णौ विधाय) अज्ज! सन्तं पाबं, सन्तं पाबं। अभूमी क्खु एसो विणअणिधाणस्स सेट्ठिजणस्स, बिसेसदो जिष्णुदासस्स। (आर्य! शान्तं पापं, शान्तं पापम्। अभूमिः खल्वेष विनयनिधानस्य वणिग्जनस्य, विशेषतो जिष्णुदासस्य।)

राक्षसः - किमस्य भवतो यथा सुहृद एव नाशो विषम्।

पुरुष - आर्य। अथ किम् (अज्ज! अध इं)

पुनर्भङ्ग्यन्तरेण व्याचष्टे-

सामाजिकजनाह्लादनिर्माणनिपुणैर्नटैः।
तद्भूमिकां समास्थाय निर्वर्तितनटान्तरम्॥१२॥

क्वचित्प्रकरणस्यान्तः स्मृतं प्रकरणान्तरम्।
सर्वप्रबन्धसर्वस्वकलां पुष्णाति वक्रताम्॥१३॥

सर्वप्रबन्धसर्वस्वकलां पुष्णाति वक्रताम्, सकलरूपकप्राणरूपकं समुल्लासयति वक्रिमाणम्। क्वचित्प्रकरणस्यान्तः स्मृतं प्रकारणान्तरम्— कस्मिंश्चित्कविकौशलोन्मेषशालिनि नाटके, न सर्वत्र। एकस्य मध्यवर्ति अङ्कान्तरगर्भीकृतम् गर्भो वा नाम इति यावत्। किंविशिष्टम्— निर्वर्तितनटान्तरम्, विभावितान्यनर्तकम्। नटैः कीदृशैः— सामाजिकजनाह्लादनिर्माणनिपुणैः सहृदलपरिषत्परितोषणनिष्णातैः। तद्भूमिकां समास्थाय सामाजिकीभूय।

इदमत्र तात्पर्यम्— कुत्रचिदेव निरङ्कुशकौशलाः कुशीलवा स्वीयभूमिकापरिग्रहेण रङ्गमलङ्कुर्वाणाः नर्तकान्तरप्रयुज्यमाने प्रकृतार्थजीवित इव गर्भवर्तिनि अङ्कान्तरे तरङ्गिणतवक्रतामहिम्नि सामाजिकीभवन्तो विविधाभिर्भावनाभङ्गीभिः साक्षात्सामाजिकानां

किमपि चमत्कारवैचित्र्यमासूत्रयन्ति। यथा — बालरामायणे चतुर्थेऽङ्के लङ्केश्वरानुकारी प्रहस्तानुकारिणा नटो नटेनानुवर्त्त्यमानः।

कर्पूर इव दग्धोऽपि शक्तिमान यो जने जने।

नामः शृङ्गारबीजाय तस्मै कुसुमधन्वने॥३९॥

श्रवणैः पेयमनेकैर्दृश्यं दीर्घश्च लोचनैर्बहुभिः।

भवदर्थमिव निबद्धं नाट्यं सीतास्वयंवरणम्॥४०॥

अपरमपि प्रकरणवक्रतायाः प्रकारमाविष्करोति—

मुखादिसन्धिसन्धायि संविधानकबन्धुरम्।

पूर्वोत्तरादिसाङ्गत्यादङ्गानां विनिवेशनम्॥१४॥

न त्वमार्गग्रहग्रस्तग्रहकाण्डकदर्थितम्।

वक्रतोल्लेखलावण्यमुल्लासयति नूतनम्॥१५॥

कस्मात्— पूर्वोत्तरादिसाङ्गत्यात्, पूर्वस्य पूर्वस्योत्तरेणोत्तरेण यत्साङ्गत्यमतिशयितसौगम्यम् उपजीव्योपजीवकभावलक्षणं तस्मात्।

इदमुक्तम्भवति— प्रबन्धेषु पूर्वप्रकरणम् अपरस्मात् परस्य परस्य प्रकरणान्तरस्य सरससम्पादितसन्धिसम्बन्धसंविधानकसमर्प्यमाणकता प्राणं प्रौढिप्ररूढवक्रतोल्लेखमाह्लादयति।

यथा 'पुष्पदूषितके' प्रथमं प्रकरणम्। अतिदारुणाभिनववेदानानिरानन्दस्य समागतस्य समुद्रतीरे समुद्रदत्तस्योत्कण्ठाप्रकाशनम्। द्वितीयमपि - प्रस्थानात् प्रतिनिवृत्तस्य निशीथिन्यामुत्कोचालङ्कारदानमूकीकृतकुवलयस्य कुसुमवाटिकायामनाकलितमेव तस्य सहचरीसङ्गमनम्। तृतीयमपि — सम्भावितदुर्विनयेऽपि नयदत्तनन्दिनीनिर्वासनव्यसनत-

त्समाधाननिबन्धनम्। चतुर्थमपि — मथुराम्प्रतिनिवृत्तस्य कुवलयप्रदृश्यमानाङ्गुलीयक-समावेदितविमलसम्पदः। कठोरतरगर्भभारखिन्नायां स्नुषायां निष्कारणनिष्कासनादनाहित-प्रवृत्तेर्महापातकिनमात्मानमन्यमानस्य सार्थवाहसागरदत्तस्य तीर्थयात्राप्रवर्तनम्। पञ्चममपि वनान्तः...समुद्रदत्तकुशलोदन्तकथनम्। षष्ठमपि — सर्वेषां विचित्रसङ्ख्यासमागमाभ्युपाय-सम्पादकमिति। एवमेतेषां रसनिष्यन्दतत्पराणां तत्परिपाटिः कामपि कामनीयकसम्पदमुद्भावयति।

यथा वा कुमारसम्भवे— पार्वत्याः प्रथमतारुण्यावतारवर्णम्। हरशुश्रूषा दुस्तरतारकपराभवपारावारोत्तरणकारणमित्यरविन्दसूतेरुपदेशः। कुसुमाकरसुहृदः कन्दर्पस्य पुरन्दरोद्देशाद् गौर्याः सौन्दर्यबलाद्विप्रहरतो हरिविलोचनविचित्रभानुना भस्मीकरणदुःखावेशविवशाया रत्याः विलपनम्। विवक्षितं विकलमनसो मेनकात्मजायास्तपश्चरणम्। निरर्गलप्राग्भारपरिभृष्टचेतसा विचित्रशिखण्डिभिः शिखरिनाथेन वारणम्, पाणिपीडनम् इति प्रकरणानि पौर्वापर्यपर्यवसितसुन्दरसंविधानाबन्धुराणि रामणीयकधारामधिरोहन्ति।

एवमन्येष्वपि महाकविप्रबन्धेषु प्रकरणवक्रतावैचित्र्यमेव विवेचनीयम्।

(इति वेणीसंहारे प्रतिमुखसन्ध्यङ्कभागिनी द्वितीयेऽके)

इतिवृत्तान्यथावृत्त-रससम्पदुपेक्षया।

रसान्तरेण रम्येण यत्र निर्वहणं भवेत्॥१६॥

तस्या एव कथामूर्तेरामूलोन्मीलितश्रियः।

विनेयानन्दनिष्पत्त्यै सा प्रबन्धस्य वक्रता॥१७॥

सा प्रबन्धस्य नाटकसर्गबन्धादेः वक्रता वक्रभावो भवतीति सम्बन्धः। यत्र निर्वहणं भवेत्, यस्यामुपसंहरणं स्यात्। रसान्तरेण इतरेण रम्येण रसेन रामणीयकविधिना। कया— इतिवृत्तान्यथावृत्तरससम्पदुपेक्षया। इतिवृत्तमितिहासोऽन्थाऽपरेण प्रकारेण वृत्ता निर्व्यूढा या रससम्पत् शृङ्गारादिभङ्गी तदुपेक्षया तदनादरेण तां परित्यज्येति यावत्। कस्याः— तस्या एव कथामूर्तेः, तस्यैव काव्यशरीरस्य। किम्भूतायाः— आमूलोन्मीलितश्रियः। आमूलं प्रारम्भादुन्मीलिता श्रीर्वाच्यवाचकरचनासम्पद् यस्यास्तथोक्ता तस्याः। किमर्थम्— विनेयानन्दनिष्पत्त्यै, प्रतिपाद्यपार्थिवादिप्रमोदसम्पादनाय।

रामायणमहाभारतयोश्च शान्ताङ्गित्वं पूर्वसूरिभिरेव निरूपितम्।

त्रैलोक्याभिनवोल्लेखनायकोत्कर्षपोषिणा।
इतिहासैकदेशेन प्रबन्धस्य समापनम्॥
तदुत्तरकथावर्तिविरसत्वजिहासया।
कुर्वीत यत्र सुकविः सा विचित्रास्य वक्रता॥१९॥

सा विचित्रा विविधभङ्गीभ्राजिष्णुरस्य प्रबन्धस्य वक्रता वक्रभावो भवतीति सम्बन्धः। कुर्वीत यत्र सुकविः कुर्वीत विदधीत यत्र यस्यां सुकविः औचित्यपद्धतिप्रभेदचतुरः प्रबन्धस्य समापनम् — प्रबन्धस्य सर्गबन्धादेः समापनमुपसंहरणं, समर्थनमिति यावत्। इतिहासैकदेशेन इतिवृत्तस्यावयवेन।

किम्भूतेना— त्रैलोक्याभिनवोल्लेखनायकोत्कर्षपोषिणा, जगदसाधारणस्फुरितनेतृप्रकर्षप्रकाशकेन। किमर्थम्- तदुत्तरकथावर्तिविरसत्वजिहासया। तस्मादुत्तरा या कथा तद्वर्ति तदन्तर्गतं यद्विरसत्वं वैरस्यमनार्जवं तस्य जिहासया परिजिहीर्षया।

इदमुक्तम्भवति— इतिहासोदाहृतां कश्चन महाकविः सकलां कथां प्रारभ्यापि तदवयवेन त्रैलोक्यचमत्कारकारणनिरुपमाननायकयशः समुत्कर्षोदयादायिना तदग्रिमग्रन्थ-प्रसरसम्भावितनीरसभावहरणेच्छया उपसंहरमाणस्य प्रबन्धस्य कामनीयकनिकेतनाय-मानवक्रिमाणमादधाति। यथा किरातार्जुनीये सर्गबन्धे—

द्विषां विघाताय विघातुमिच्छतो रहस्यनुज्ञामधिगम्य भूभृतः॥४१॥

रिपुतिमिरमुदस्योदीयमानं दिनादौ

दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूयः॥४२॥

एते दुरापं समवाप्य वीर्यमुन्मूलितारः कपिकेतनेन॥४३॥

इत्यादिना दुर्योधननिधनान्तां धर्मराजाभ्युदयदायिनीं सकलामपि कथामुपक्रम्य कविना निबध्यमानं यत् तेजस्विवृन्दारकस्य दुरोदरद्वारा दूरीभूतविभूतेः प्रभूतद्रुपदात्मजानिकारनिरतिशयोद्दीपितमन्योः कृष्णद्वैपायनोपदिष्टविद्यासंयोगसम्पदः पाशुपतादिदिव्यास्त्रप्राप्तये तपस्यतो गाण्डीवसुहृदः पाण्डुनन्दनस्यान्तरा किरातराजसम्प्रहरणात् समुन्मीलितानुपमविक्रमोल्लेखं कमप्यभिप्रायं प्रकाशयति।

भूयोऽपि भेदान्तरमस्याः सम्भावयति—

प्रधानवस्तुसम्बन्धतिरोधानविधायिना।

कार्यान्तरान्तरायेण विच्छिन्नविरसा कथा॥२०॥

तत्रैव तस्य निष्पत्तेर्निर्निबन्धरसोज्ज्वलाम्।

प्रबन्धस्यानुबध्नाति नवां कामपि वक्रताम्॥२१॥

प्रबन्धस्य सर्गबन्धादेरनुबध्नाति द्रढयति नवामपूर्वोल्लेखां कामपि सहृदयानुभूयमानाम् — न पुनरभिधागोचरसचमत्काराम् वक्रतां वक्रिमाणम्। कोऽसौ—

कार्यान्तरान्तरायेण विच्छन्नविरसा कथा। कार्यान्तरान्तरायेण अपरकृत्यप्रत्यूहेन। विच्छिन्नविरसा विच्छिन्ना चासौ विरसा च सा, विच्छिद्यमानत्वादनार्जनसञ्जेत्यर्थः। किम्भूतेन— प्रधानवस्तुसम्बन्धतिरोधानविधायिना, आधिकारिकफलसिद्ध्युपायतिरोधान-कारिणा। कृतः— तत्रैव तस्य निष्पत्तेः तत्रैव कार्यान्तरानुष्ठाने एतस्याधिकारिकस्य निष्पत्तेः संसिद्धेः। तत एव निर्निबन्धरसोज्जवलां निरन्तरायतरङ्गिताङ्गिरसप्रभाभ्राजिष्णुम्।

अयमस्य परमार्थः— या कलाधिकारिककथानिषेधिकार्यान्तरव्यवधानाज्झगिति विघटमाना अलब्धावकाशापि विकास्यमाना सा प्रस्तुतेतरव्यापारादेवं प्रस्तुतनिष्पन्नेन्दीवरसितरसनिर्भरा प्रबन्धस्य रामणीयकमनोहरं वक्रिमाणमादधाति।

यत्रैकफलसम्पत्तिसमुद्युक्तोऽपि नायकः।
फलान्तरेष्वनन्तेषु तत्तुल्यप्रतिपत्तिषु॥२२॥

धत्ते निमित्ततां स्फारयशःसम्भारभाजनम्।
स्वमाहात्म्यचमत्कारात् सापरा चास्य वक्रता॥२३॥

सापरापि अन्यापि, न प्रागुक्ता, अस्य रूपकादेर्वक्रता वक्रभावो भवतीति सम्बन्धः। यत्रैकफलसम्पत्तिसमुद्युक्तोऽपि नायकः— यत्र यस्याम् एकफलसम्पत्तिसमुद्युक्तोऽपि अपराभिमतवस्तुसाधनव्यवसितोऽपि नायकः फलान्तरेष्वनन्तेषु तत्तुल्यप्रतिपत्तिषु धत्ते निमित्तताम्। फलान्तरेष्वपि साध्यरूपेषु वस्तुषु अनन्तेषु अगणनां नीतेषु तत्तुल्यप्रतिपत्तिषु आधिकारिकफलसमानोपपत्तिषु, प्रस्तुतार्थसिद्धेरेवाधिगतसिद्धिष्विति।

यथा नागानन्दे— तत्र दुर्निवारवैरादपि वैनतेयान्तकादेक(म्) सकलकारुणि-कचूडामणिः शङ्खचूडं जीमूतवाहनो देहदानादभिरक्षन्न केवलं तत्कुल(म्)

आस्तां वस्तुषु वैदग्ध्यं काव्ये कामपि वक्रताम्।

प्रधानसंविधानाङ्कनाम्नापि कुरुते कविः॥२४॥

आस्तां वस्तुषु वैदग्ध्यम् — आस्तां दूरत एव वर्ततां वस्तुषु अभिधेयेषु प्रकरणेषु प्रतिपाद्येषु वैदग्ध्यं विच्छित्तिः। काव्ये कामपि वक्रतां कुरुते कविः काव्ये नाटके सर्गबन्धादौ कामपि वक्रतां कुरुते विदधाति कविरित्यद्भुतप्रतिभाप्रसारप्रकाशः। केन — संविधानाङ्कनाम्नापि। प्रधानप्रबन्धप्राणगतप्रायं यत्संविधानं कथायोजनं तदङ्कश्चिह्नमुपलक्षणं यस्य तत्तथोक्तं तच्च तन्नाम ......। 'अपि' शब्दो विस्मयमुद्योतयति।

यथा— अभिज्ञानशाकुन्तलमुद्राराक्षसप्रतिमानिरुद्ध- मायापुष्पककृत्याराव-णच्छलितराम-पुष्पदूषितकादीनि। पुनर्हयग्रीववधशिशुपालवध—पाण्डवाभ्युदय-रामानन्द-रामचरितप्रायाणि।

प्रबन्धवक्रतायाः प्रकारान्तरमप्याह—

अप्येककक्ष्यया बद्धाः काव्यबन्धाः कवीश्वरैः।

पुष्णन्त्यनर्घामन्योऽन्यवैलक्षण्येन वक्रताम्॥२५॥

पुष्णन्ति उल्लासयन्ति अनर्घामपरिच्छेद्याम् अन्योऽन्यवैलक्षण्येन परस्परवैसादृश्येन वक्रताम् वक्रभावम्। के ते— काव्यबन्धाः रूपकपुरसराः। किंविशिष्टाः— अप्येककक्ष्या बद्धाः एकेनापीतिवृत्तेन योजिताः। कैः कवीश्वरैः। एकत्र विस्तीर्णं वस्तु सङ्क्षिपद्भिः, अन्यत्र सङ्क्षिप्तं वा विस्तारयद्भिः... विचित्रवाच्यवाचकालङ्करणसङ्कलनया नवतां नयद्भिरित्यर्थः।

इदमत्र तात्पर्यम् — एकामेव कामपि कन्दलितकामनीयकां कथां निर्वदहद्भिर्बहुभिरपि कविकुञ्जरैर्निबध्यमाना बहवः प्रबन्धा मनागप्यन्योऽन्यसंवादमनासादयन्तं सहृदयहृदयाह्लादकं कमपि वक्रिमाणमादधाति। यथा — रामाभ्युदय-उदात्तराघव-वीरचरित-बालरामायण— कृत्यारावण-माया-पुष्पकप्रभृतयः। ते हि प्रबन्धप्रवरास्तेनैव कथामार्गेण

निरर्गलरसासारगर्भसम्पदा प्रतिपदं प्रतिवाक्यं प्रतिप्रकरणञ्च प्रकाशमानाभिनव- भङ्गीप्राया रमणीयताभ्राजिष्णवो नवनवोन्मीलितनायकगुणोत्कर्षास्तेषां हर्षातिरेकमनेकशोऽप्या-स्वाद्यमाना समुत्पादयन्ति सहृदयानाम्। एवन्यनदपि निदर्शनान्तरमुद्भावनीयम्।

कथोन्मेषसमानेऽपि वपुषीव निजैर्गुणैः।

प्रबन्धाः प्राणिन इव प्रभासन्ते पृथक्-पृथक्॥४४॥

इत्यन्तरश्लोकः

नूतनोपायनिष्पन्न-नयवर्त्मोपदेशिनाम्।

महाकविप्रबन्धानां सर्वेषामस्ति वक्रता॥२६॥

महाकविप्रबन्धानां नवनिर्माणनैपुण्यनिरूपमानकविप्रकाण्डानां प्रबन्धानां सर्वेषां सकलानामस्ति वक्रता वक्रभावविच्छित्तिः कीदृशानाम्— नूतनोपायनिष्पन्नन-यवर्त्मोपदेशिनाम्। नूतनाः प्रत्यग्राः उपायाः सामादिप्रयोगप्रकारास्तद्विदां गोचरा ये तैर्निष्पन्नं सिद्धं यन्नयवर्त्म नीतिमार्गः तदुपदिशन्ति शिक्षयन्ति ये ते तथोक्तास्तेषाम्।

इदमुक्तम्भवति सकलेष्वपि सत्कविप्रबन्धेषु अभिनवभङ्गीनिवेषपेशलताशालि नीत्याः फलमुपपद्यमानं प्रतिपाद्योपदेशद्वारेण किमपि कारणमुपलभ्यत एव। यथा — मुद्राराक्षसे। तत्र हि प्रवरप्रज्ञाप्रभावप्रपञ्चितविचित्रनीतिव्यापाराः प्रगल्भ्यन्त एव। तापसवत्सराजोद्देश एव व्याख्यातः। एवमन्यदप्युत्प्रेक्षणीयम्।

वक्रतोल्लेखवैकल्य .... लोक्यते।

प्रबन्धेषु कवीन्द्राणां कीर्तिकन्देषु किं पुनः॥४५॥

इत्यन्तरश्लोकः

असमाप्तोऽयं ग्रन्थः

परिशिष्ट-1

कारिकानुक्रमणिका

अक्लेशव्यञ्जिताक्तम्	43
अत्रारोचकिनः केचित्	58
अत्रालुप्तविसर्गान्तेः	56
अम्लानप्रतिभोद्भिन्न	39
अलङ्कारकृतां येषां	19
अलङ्कारस्य कवयो	61
अलङ्कृतिरलङ्कार्य	5
अविभावितसंस्थान	39
असमस्तपदन्यासः	51
असमस्तमनोहारि	44
आञ्जसेन स्वभावस्य	60
इत्युपादेयवर्गेऽस्मिन्	62
उभावेतावलङ्कार्यौ	18

एतत् त्रिष्वपि मार्गेषु	63
कविव्य पारवक्रत्व	24
गमकानि निबधन्ते	56
चतुर्वर्गफलास्वाद	4
धर्मादिसाधनोपायः	3
प्रतिभाप्रथमोद्भेद	46
प्रतीयमानता यत्र	47
भावस्वभावप्राधान्य	39
भूषणत्वे स्वभावस्य	20
माधुर्य्यादिगुणग्रामः	58
मार्गाणां त्रितयद्	68
मार्गोऽसौ मध्यमो नाम	58
यत् किञ्चनापि वैचित्र्यं	39
यत्र तद्वदलङ्कारैः	46
यत्र वक्तुः प्रमातुर्वा	61

यत्रान्यथाभवत्सर्वम्	47
यदप्यनूतनोल्लेखम्	47
यत्राति कोमलच्छायम्	57
रत्नरश्मिच्छटोत्सेक	46
लोकोत्तरचमत्कार	2
वक्रभावः प्रकरणे	33
वन्दे कवीन्द्रवक्त्रेन्दु	1
वर्णविन्यासवक्रत्वम्	24
वर्णविन्यासासविच्छित्ति	44
वाक्यस्य वक्रभावोऽन्यो	32
वाच्यवाचकवक्रोक्ति	35
वाच्यवाचकसौभाग्य	34
वाच्चोऽर्थो वाचकः शब्दः	12
विचित्रो यत्र वक्रोक्ति	47
वैचित्र्यं सौकुमार्यञ्च	55

वैदग्ध्यस्यन्दि माधुर्यम्	56
व्यवहारपरिस्पन्दं	4
शब्दार्थौ सहितावेव	21
शब्दार्थौ सहितौ वक्र	6
शब्दो विवक्षितार्थैक	13
शरीरं चेदलङ्कारः	20
श्रुतिपेशलताशालि	45
सम्प्रति तत्र ये मार्गाः	36
सर्वसम्पत्परिस्पन्द	62-63
साहित्यमनयोः शोभा	22
सुकुमाराभिधः सोऽयम्	39
सोऽतिदुःसञ्चरो येन	47
स्पष्टे सर्वत्र संसृष्टिः	20
स्वभावव्यतिरेकेण	19
स्वभावः सरसाकूतो	47

द्वितीय उन्मेषः

अभिधेयान्तरतमः	78
अलङ्कारोपसंस्कार	78
अव्ययीभावामुख्यानां	4
आगमादिपरिस्पन्द	93
एको द्वौ बहवो वर्णाः	67
औचित्यान्तरतम्येन	104
कर्त्तुरत्यन्तरङ्गत्वम्	99
कर्म्मादिसंवृत्तिः पञ्च	99
कुर्वन्ति काव्यवैचित्र्य	107
क्वचिदव्यवधानेऽपि	70
नातिनिर्बन्धविहिता	71
पदयोरुभयोरेक	109
परस्परस्य शोभायै	112
परिपोषयितुं काञ्चिद्	105

प्रत्यक्तापरभावश्च	108
प्रस्तुतौचित्यविच्छित्तिम्	92
भिन्नयोलिङ्गयोर्यस्यां	96
यत्र कारकसामान्यम्	105
यत्र दूरान्तरेऽन्यस्मात्	84
यत्र रूढेरसम्भाव्य	75
यत्र संव्रियते वस्तु	89
यन्मूला सरसोल्लेषा	85
यमकं नाम कोऽप्यस्याः	74
रसादि द्योतनं यस्यां	110
लोकोत्तरतिरस्कार	75
वर्गान्तियोगिनः स्पर्शाः	68
वर्णच्छायानुसारेण	73
वाग्वल्लयाः पदलपल्लवा	113
विशिष्टं योज्यते लिङ्गम्	97

विशेषणस्य माहात्म्यात् 88

विहितः प्रत्ययादन्यः 111

सति लिङ्गान्तरे यत्र 96-97

समानवर्णमन्यार्थम् 74

साध्यतामप्यनादृत्य 95

स्वयं विशेषणेनापि 78

तृतीय उन्मेषः

अन्यदर्पयितुं रूपम्	176
अपरा सहजाहार्य	119
अप्रस्तुतोऽपि विच्छित्ति	154
अलङ्कारो न रसवत्	132
उत्प्रेक्षावस्तुसाम्येऽपि	162
उदारस्वपरिस्पन्द	115
उपचारैकसर्वस्वम्	152
ऊर्जस्व्युदात्ताभिधयोः	141
एकं प्रकाशकं सन्ति	149
औचित्यावहमम्लानं	149
तत्र पूर्वं प्रकाराभ्याम्	126
तथा समाहितस्यापि	143
तां साधारणधर्मोक्तौ	161
धर्मादि साधनोपाय	131

नयन्ति कवयः काञ्चित्	153-154
निषेधच्छाययाक्षेपः	174-175
प्रतिभासात्तथा बौद्धः	159
भावानामपरिम्लान	126
भूषणान्तरभावेन	178
मनोज्ञफलकोल्लेख	122
मार्गस्थवक्रशब्दार्थ	122
मुख्यमक्लिष्टरत्यादि	127
यत्रैकेनैव वाक्येन	172
यथायोगि क्रियापदम्	151
यथा स रसवन्नाम्	144
यद् वाक्यान्तरवक्तव्यम्	156
यस्मिन्नुत्प्रेक्षितं रूपम्	175
यस्मामतिशयः कोऽपि	
रसेन वर्त्तते तुल्यम्	

रसोद्दीपनसामर्थ्य	130
लावण्यादिगुणोज्ज्वला	180
लोकप्रसिद्धसामान्य	170
वर्णनीयस्य केनापि	175
वस्तुसाम्यं समाश्रित्य	173
वाक्यार्थोऽसत्यभूतो	154
वाक्यार्थान्तरविन्यासो	174
वाच्यवाचकसामर्थ्य	157
विनिवर्तनमेकस्य	167
विवक्षितपरिस्पन्द	161
शरीरमिदमर्थस्य	131
शाब्दः प्रतीयमानो वा	169
सति तच्छब्दवाच्यत्वे	169
समस्तवस्तुविषयम्	
समुल्लिखितवाक्यार्थ	157

सम्भावनानुमानेन	157
सामान्यान व्यतिरिक्ता	165

चतुर्थ उन्मेषः

अन्यूननूतनोल्लेख	186
अप्येककक्षया बद्धाः	199
अध्यामूलादनाशङ्कय	181
असामान्यसमुल्लेख	184
आस्तां वस्तुषु वैदग्ध्यम्	199
इतिवृत्तप्रयुक्तेऽपि	183
इतिवृत्तान्यथावृत्त	195
कथावैचित्र्यपात्रम्	190
क्वचित्प्रकरणस्यान्तः	193
तत्रैव तस्य निष्पत्तेः	197
तथा यथा प्रबन्धस्य	183
तदुत्रकथावर्ति	196
तस्या एव कथामूर्ते	195
त्रैलोक्याभिनवोल्लेख	196

धत्ते निमित्तताम्	198
न त्वमार्गग्रहग्रस्त	194
नूतनोपायनिष्पन्न	200
प्रतिप्रकरणं प्रौषि	186
प्रधानवस्तुसम्बन्ध	197
प्रबन्धस्यैकदेशानाम्	184
मुखादिसन्धिसन्धायि	194
यत्र निर्यन्त्रणोत्साह	181
यत्राङ्गिरसनिष्यन्द	191
यत्रैकफलसम्पत्तिः	198
सामाजिकजनाह्लाद	193